निष्ठ शास्त्रविशारद् श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमो नमः

श्री बुद्धिसागरसूरीश्वरग्रन्थमाला ग्रन्थाङ्क २

(विविधजैनग्रन्थोद्धृतः)

जैनकथार्णवः

संग्राहकः

योगनिष्ठ–शास्त्रविशारद्–आचार्यभगवान् श्रीमद् बुद्धिसागरसूरीश्वरपट्टधर–शांतमूर्ति–आचार्यदेव
श्रीमत् कीर्तिसागरसूरीश्वरविनेयरत्न तपस्वी मुनिराज श्रीमद् जितेन्द्रसागरान्तिषद्
शांतमूर्ति पन्न्यास श्रीमत् कैलाससागरगणिवरः

प्रकाशकः–मुम्बापुरी नगरान्तर्गतकालिकादेवीमार्गस्थिताध्यात्मज्ञानप्रचारकमण्डल कार्यवाहकः–लल्लुभाइ करमचंद्र दलालः

विक्रमाब्द २००७ मूल्यम् पठनपाठनम् वीरनिर्वाणाब्द २४७७

राजनगरस्थ (अहमदावादस्थ) गांधीमार्गसन्निस्थित
नयनमुद्रणालये (प्रिन्टींगप्रेस)
झवेरचन्द्रात्मजमफतलालपण्डितेन
मुद्रितोऽयं ग्रन्थः

प्राप्तिस्थानम्
विजापुर जैन श्रीमद् बुद्धिसागरसूरिज्ञानमंदिर
विजापुर

શાસ્ત્રવિશારદ યોગનિષ્ઠ જૈનાચાર્ય ૧૦૮ ગ્રંથપ્રણેતા

શ્રીમદ્ બુદ્ધિસાગરસૂરીશ્વરજી મહારાજ

श्री गुरुस्तुति

श्रीमन्तं ज्ञानवन्तं विशदमतिमतां संमतं चारुमूर्त्तिः
सौभाग्यैकप्रधान प्रवरसुखदं सर्वशास्त्रप्रवीणम् ।
शुद्धानन्दप्रकाशं विबुधजनवरं कर्मभूमिखनित्रम्
बुध्यब्धिं सूरिवर्यं स्मरत भविजना सद्गुरुं दिव्यरूपं॥

જન્મ.
વિક્રમ સવત ૧૯૩૦ માહા વદિ ૧૪, વિજાપુર

દીક્ષા :
વિક્રમ સવત ૧૯૫૭ માગસર સુદિ ૬, પાલનપુર

આચાર્યપદ :
વિક્રમ સંવત ૧૯૭૦ માગશર સુદિ ૧૫, પેથાપુર

નિર્વાણ
વિક્રમ સવત ૧૯૮૧ જેઠ વદિ ૩, વિજાપુર

प्रास्ताविकम्

'जातस्य हि ध्रुवं मृत्युः' मृतस्य च स्वकृतानुसारेण गतिः इत्याद्यास्तिकभावनापरिप्लुतो भारतदेशो(आर्यमहाप्रजारूपः)ऽतएव तस्य संस्कृतिर्निवृत्तिप्रधाना.

स्वभुजाबलेन षट्खण्डसाधकचक्रवर्ती स्वकलाकौशलेनापरिमितवित्तसंग्राहको वणिक्, प्रचूरपरिश्रमेण विविधशास्त्र-संदर्भरहस्यवेत्ता विद्वान् विप्र इत्याद्यस्मिन् जगति ये केचिदुन्नतशिरसः ते सर्वेऽपि भारतीयार्यमहाप्रजासंस्कृतिप्लावितान्तकरणाः स्वजीवनसाफल्यं निवृत्तिमार्गप्राप्त्यैव मन्वाना विद्यन्ते.

यदा विज्ञानवादपरिकलिता आङ्ग्लभूम्यादिदेशा, वस्त्रपरिधानादिसंस्कारज्ञानरहिता आसन्, तस्मिन् कालेऽपि भारतवर्षीयाः कला–साहित्य—वाणिज्यादिविविधकलापरिनिष्ठिताः, सर्वसम्पत्तिसमन्विताः राज्यादिविविधसमृद्धित्यागेन विविधवनगह्वरादिपूनितस्थानेषु जीव-परभव-कर्मादि-विविधतत्त्वगवेषणां कुर्वन्तः, तपोध्यानादिशक्त्या निर्मुक्तजातिबद्धवैर-जीवसमूहपरिकलिता स्वपादविहारेण भारतवर्षं पुनाना आसन् . अतएव भारतीयार्यमहाप्रजा सर्वकलाक्रिया–व्यवहारे अध्यात्म-सौरभानुशीलनरता निवृत्तिप्रधानपरा च.

अध्यात्मभावनापरिकलिता भारतीयार्यमहाप्रजासंस्कृतिः संचालकभेदेन द्विविधा ब्राह्मण–संस्कृतिः श्रमण–संस्कृतिश्च, उपनिषद्–स्मृत्यादिविविधग्रन्थपरिभाविता ब्राह्मणसंस्कृतिः भारतवर्षीयवर्णाश्रम–गतव्यवहारशुद्धौ अतीवोन्नतोपकारकुशला द्विविधश्रमणवाहकैः श्रमणसंस्कृतिरपि द्विविधा जैनसंस्कृतिः बौद्धसंस्कृतिश्च.

बौद्धसंस्कृतिः कालप्रवाहेण विविधपरावर्तनेन परावर्तिता भारते जाता परिवर्द्धिताऽपि बहिर्देशेषु स्थिरीभूता, श्रमणसंस्कृतौ भारतवर्षे उत्पन्ना, स्थिरीभूता, परिवर्धिता केवला जैनसंस्कृतिरेव श्रमणसंस्कृतिः.

वसुधैव कुटुम्बकं मन्वाना निष्परिग्रहाः ब्रह्मव्रतधरा भैक्ष्यमात्रोपजीविनः सततं तत्वपरिशिलितान्तकरणाः श्रमणाः एव श्रमणसंस्कृतिमूलरूपाः. अस्या श्रमणसंस्कृत्याः प्रभावेणैव गगनचुंबितशिखरबद्धपताकाभिः 'यतो धर्मस्ततो जयः' इति सूत्रं सूचयन्तः भारतीयदानप्रवाहद्योतकाः देवप्रासादाः विविधविषयपरिकलिता ज्ञानभण्डाराश्च भारतवर्षीयसौरभरूपा विद्यन्ते.

श्रमणसंस्कृतेः प्रधानता अध्यात्मभावना, अध्यात्मभावना च न कदापि वैराग्यविरहिता. विषयवैमुख्यं च वैराग्यं. परिपूर्ण-तत्त्वज्ञानं विना विषयवैमुख्यं कदापि न भवति, अतएव तत्वज्ञानविचारणा उत्पत्ति–स्थिति–नाशतत्त्वत्रयविचारविस्ताररूपा-गमशास्त्रेषु अनेकविधा दर्शिता.

तत्त्वज्ञानविचारणायां विशिष्टबुद्धिपरिकलिता सत्त्वा एव समर्था भवन्ति. सामान्यजनास्तु न तथाविधाः, समुद्रेऽटतां सांयात्रिकाणां द्वीपदीपिका यथा मार्गदर्शिन्युपकारिणी तथैव संसारसमुद्रे भ्रमतां जीवानां आध्यात्मपरिप्लुष्टजीवितान्तःकरणानां मुनिवराणां जीवनगाथा एव द्वीपदिपिका. यासामवलम्बनेनानेके जीवा ऐहिकवासनात्यागेन अध्यात्ममार्गे आगच्छन्ति.

॥ २ ।

अयं ग्रंथो अध्यात्ममार्गे–मोक्षमार्गे प्रस्थितानां सफलीभूतानां मुनिवराणां जीवनगाथारूपोऽस्मिन् ग्रन्थे एकाशीति–महापुरुषचरित्रजीवनसौरभता.

क्रोधत्याग–मानत्याग–मायात्याग–लोभत्याग–सामायिक–प्रतिक्रमण–न्यायपरीषहसहन इत्यादि विविधगुणपरिकर्मित–महापुरुषाणां जीवनगाथाचिन्तनेन क्रोधत्यागादिगुणा वाचकमनसि आविर्भवेयुः। क्रोधादिकारणसमुत्पन्ने संयतपथादर्शस्मरणेन तज्जयाय प्रयत्नशीलाश्च वाचका भवेयुः इत्येव एतच्चरित्रनिर्देशस्य फलं. अतिमुक्तकमुनि–सुकोशलमुनि–कार्तिकश्रेष्ठि–चिलातीपुत्रादिकथानां निर्देशस्य फलं वैराग्यभावनाविर्भावः वाचकहृदये प्रसरतु इत्येव

अयं ग्रन्थो पूर्वाचार्यगुम्फितऋषिमण्डलवृत्ति–योगशास्त्र–उत्तराध्ययन–त्रिषष्ठिशलाकापुरुषचरितादिविविधग्रन्थोध्धृतच–रितसंकलनारूपोऽतोऽस्य ग्रन्थस्य प्रणेतारः जैनशासनप्रभावककार्योद्दिपितजीवनसौरभाः धर्मघोषसूरि–कलिकालसर्वज्ञ हेमचन्द्रसूरिवराद्यनेकतत्तद्ग्रन्थकारपूर्वमहर्षय एव

अत्र ग्रन्थनिर्माणे न काचिदस्माकं मनीषा, बुद्धिप्रागलभ्यं, चातुर्यं, विद्वत्वं च, वैराग्यमेवाभयं इति पद्यं सततपरिशीलनरतैः वैराग्यवाहितान्तःकरणैः पूज्यप्रवरशान्तमूर्तिपन्यासप्रवर कैलाससागरगणिवरैः अस्य ग्रन्थस्य संकलना स्वपठनपाठनगतवैराग्य वाहिचरित्राणां संग्रहेण कृता. अस्य ग्रन्थस्य प्रकाशनं च तैरेव पूज्यप्रवरैः वैराग्यप्रपारूपग्रन्थावलोकनश्रवणेन प्रशमीभूता भव्या निर्वेदमासाद्य भद्रं साधयन्तु इत्येकं कारणं पुरस्सरीकृत्यारब्धं. एष आशयः वाचका सफलीकुर्वन्तु इत्याशास्महे.

मुद्रणदोष–दृष्टिदोष—मतिवैकल्यादिभिः या दुर्निवाराः काश्चिदशुद्धयः ताः सर्वे शोधयन्तु विद्वांसः

वि. सं. २००७ अश्विनशुक्लद्वितीया   विदूषां वशंवदः

अहमदावाद   पं. मफतलाल.

जैनकथार्णवगतविशिष्टपद्यानि

१ शरीरं श्लथते नाशा, रूपं याति न पापधीः । जरा स्फुरति न ज्ञानं, धिग् स्वरूपं शरीरिणाम् ॥३६॥ पृ. २०-१-४

२ यथा लाभस्तथा लोभो, लाभाल्लोभः प्रवर्धते । मापद्वयाश्रितं कार्यं, कोट्याऽपि नहि निष्ठितम् ॥५२॥ पृ.२६-२-३

३ केसिं च वरं मरणं, जीवियमन्नेसिं । केसिंवि उभयंपि ॥ १ ॥ २९ २-८

४ स्त्रीरूपाऽपि क्षमैवैका, क्रोधयोधं जगत्यशुम् । गुणाः परे तु तं जेतुं, पुंरूपा अपि न क्षमाः ॥ २४ ॥ ३३-१-१

५ क्षमातपोभ्यां युक्तत्वात्, क्षमाश्रमण उच्यते । ३३-१-११

६ अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत् । अतिलोभाभिभूतात्मा सागरः सागरेऽपतत् ॥ १ ॥ ३७-२-६

७ यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् । अपन्थानं तु गच्छन्तं, सोदरोऽपि विमुञ्चति ३८-१-३

८ यस्याधारे प्रवर्तन्ते प्रजाः सौख्यसमृद्धिभिः । स एव कीर्त्यते राजा इति स्मृतिवचो यतः ॥ ४०-२-१२

९ विचार्य वाच्यं वचनं हितं मितं, न कर्कशं क्वाऽपि निगद्यते बुधैः ४१-१-५

१० अतर्कितानि सौख्यानि दुखान्यपि शरीरिणाम् । भवति तदलं क्लेशहेतुना चिन्तयाऽनया ॥ १० ॥ ४१-२-६

११ येन यादृग्वचः प्रोक्तं स तादृक्फलमश्नुते । ४२ २-१

१२ परिग्रहप्रौढशिलावलम्बिनः पतन्ति संसारमहाम्बुधौ जनाः । ४४-१-७

१३ शृङ्खलादृशं पुण्यं मर्कटीसदृशा रमा । ४४-२-१०

१४ स्वस्थानाद्यत्परस्थानं प्रमादस्य वशाद्गतः तत्रैव क्रमणं भूयः प्रतिक्रमणमुच्यते ४७-१-१

१५ सङ्कटे पतितेऽप्येवं ये न मुञ्चन्ति निश्चयम् । तेषां हस्तगतेव स्यात्, निर्वाणसुखसन्ततिः ॥ पृ. ४७-२-१२

१६ लब्धास्वादः पुमान् यत्र, तत्रासक्तिं न मुञ्चति । ४८-१-१०

१७ न हिताश्चाटुभाषिणः ४९-१-८

१८ आत्मभूताः प्रजा राज्ञो राजा न छेत्तुमर्हति ॥ ४९-१-११

१९ सर्वदोषप्रथलोभो लोभः सर्वगुणापहः । ४९-१-१२ यतः सन्तोषसाराणि सौख्यान्याहुर्महर्षयः ॥ ५०-२-४

२० आत्मन् यादृक् कृतं कर्म तादृशं फलमाप्नुहि । यादृक्षुप्यते बीजं फलं तादृक्षमाप्यते ॥ ३९ ॥ ५५-१-४

२१ नाऽसत्या यमिनां गिरः॥ ५६-२-२

२२ प्रमादसंगतेनाऽपि या वाक् प्रोक्ता मनस्विना । सा कथं दृषदुत्कीर्णाक्षरालीवाऽन्यथा भवेत् ॥ ५७-१-१५

२३ जहाति द्युमणिं को हि, विनायासमुपस्थितम् ॥ ५७-२-१

२४ धर्मकृत्येषु सारं हि वैयावृत्यं जगुर्जिनाः । तत्पुनर्ग्लानसम्बन्धि विना पुण्यं न लभ्यते ॥ ५८-२-३

२५ निषिद्धमपि कार्यं हि, कार्यमापदि धीधनैः ॥ ५९-२-१२

२६ स एव हि पूज्यो गुरुश्च जनकोऽपि च शिष्यं सुतं च यः क्वाऽपि नैवोन्मार्गे प्रवर्तयेत् ॥ ६०-२-१४

२७ भग्नचितोऽभवत्को या कामिनीभिर्न भिद्यते ?॥ ६३-१-१

२८ सह कलेवर! खेदमचिन्तयन् स्ववशता हि पुनस्तव दुर्लभा । बहुतरं सहिष्यसि जीव हे ! परवशो न च तत्र गुणोऽस्ति ते ॥ ६४-२-१३

२९ अपि देवबलाद्धर्मबलमेव विशिष्यते ॥ ६७-२-११

३० अक्कोसहणणमारण—धम्मब्भंसाण बालसुलहाणं । लाभं मण्णइ धीरो, जहुत्तराणं अलाभंमि ॥ ६८-२-१
३१ अकार्यं विद्यते किञ्चि—न्नाऽविमृश्य विधायिनाम् ॥ ६२-२-३
३२ मर्त्तव्यं कातरेणापि, धीरेणापि च भूस्पृशा । द्विधापि नियते मृत्यौ, धीरैर्भाव्यं मनस्विभिः ॥ ६२-२-९
३३ महर्षीणां सुराणां च न ह्यवज्ञा शुभावहा ! ॥ ७०-२-४
३४ स्वार्जितं भुज्यते कर्म, न परः कोऽपि कारणम् ॥ ७४-२-७
३५ राग-द्वेषादयस्तीव्राः, स्नेहपाशा भयङ्कराः ॥ ७७-१-१३
३६ शरीरं नौरिति प्राहुर्नाविको जीव उच्यते । संसारो वारिधिः प्रोक्तो, यं तरन्ति महर्षयः ॥ ७८-१-१३
३७ तदस्यां संसृतौ सर्वेऽनित्या भावा धनादयः ॥ ८१-२-९
३८ सुट्ठु गाइयं सुट्ठु वाइयं णच्चियं सामसुंदरी ! । अणुपालिय दिहराइ(ति)याउ सुमिणंतए मा पमायए ॥ ८४-१-४
३९ याति धर्ममकृत्वैवं, योऽमुत्र सोऽसुखी भवेत् । कृत्वा धर्मं पुनर्याति, सोऽल्पकर्मा सुखी भवेत् ॥ ९१-२-३
४० दाराः सुताः सुहृद्वर्गो, बन्धवश्च सहोदराः । जीवन्तमनुजीवन्ति, मृतान् [तं] नानुव्रजन्त्यपि ॥ ९५-१-८
४१ कालकूटं यथा पीतं, हन्ति शस्त्रं च दुर्धृतम् । एवं विषययुग् धर्मो, व्यापन्नो हन्ति भूतवत् ॥ ९७-२-१
४२ स्त्रीणामेकाकिनां हि, कामाग्निर्वाधतेऽधिकम् ॥ १०४-२-३
४३ दैवं हि दुर्मतिं दत्ते, चपेटां न कपोलयोः ॥ ११५-२-१३
४४ लोभाभिभूतमनसां विवेकः स्यात्कियच्चिरम् ॥ ११७-१-१४
४५ स्त्रियो मुग्ध ! सुधास्तुष्टा, रुष्टा हि विषमं विषम् ॥ १२०-१-१२

जैनकथार्णवविषयानुक्रमः

जैनकथार्णवशुद्धिपत्रकम्

अशुद्धम्	शुद्धम्	पृ०		पं०	अशुद्धम्	शुद्धम्	पृ०		पं०	अशुद्धम्	शुद्धम्	पृ०		पं०
पूर्वभवानि	पूर्वभवाः	१	१	७	दोपतः	दोषतः	४	१	१५	सेवये	सेवायै	९	१	५
प्रकार्पाद्	प्रकर्पाद्	१	१	११	पन्त्ये	पत्न्ये	४	२	१	तय	तया	९	१	७
क्वमागतम्	क्रमागतम्	१	२	६	३ासा	शता	४	२	३	पिष्टि	पिष्टे	९	१	८
भुक्तक्त	भुक्तक्ते	२	१	६	सङ्का	सङ्का	४	२	११	जापामाणि	जातपाणि	१२	१	२
हाराद्यलङ्कांराः	हाराद्यलङ्काराः	१	२	१०	सखेन	सुखेन	५	१	१०	मशिश्रयत्	मशिश्रियत्	९	२	५
किञ्चित	किञ्चित्	२	१	८	चतुषष्टि	चतुःषष्टि	५	१	११	घावक	घातक	९	२	६
जीवीका	जिविका	२	१	८	पभू	प्रभू	६	१	२	धावितः	धावितः	९	२	११
ग्राह	ग्राह	३	१	४	चतुःपष्टिर्गुणान्					विहरन्त्यथ	विहरन्त्वथ	१०	१	१२
च्युतः	च्युतः	३	१	११		चतुःपष्टिं गुणान्	६	२	१०	व्यणीषु	व्यतीषु	१०	२	११
बभूयु	बभूवु	३	२	१४	घट	घट	६	२	६	विघिना	विधिना	११	१	२
प्रासध्य	प्रसाध्य	४	१	१	मशिश्रयत्	मशिश्रियत्	७	१	५	शान्तीनाथ	शान्तिनाथ	११	१	८
महाह्रियः	महाह्रियः	४	२	२	प्रविशने	प्रवेशने	९	१	२	अशिश्रयत्	अशिश्रियत्	११	२	१-७

अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०
रुन्पन्नै	रुत्पन्नै	१२ १	२	यद्‌रूपं	यद्रूपं	१९ १	२	व्याघि	व्याधि	२४ २	२
भण्डलि	मण्डलि	१२ १	९	भूपण	भूपण	१९ २	५	दशम	दशा	२४ २	७
आंयुपः	आयुषः	१२ २	१	व्यधि	व्याधि	२० २	१२	प्राघुर्णकाय	प्राघूर्णकाय	२५ १	१२
अच्युत्	अच्युत	१२ २	२	केया	केशा	२१ १	४	तछुत्वा	तच्छुत्वा	२५ २	१३
स्वमिनो	स्वामिनो	१३ २	२	मुद्रितउ	मुद्रित	२१ १	६	वृद्धि	वृद्धिं	२६ १	१२
धातृ	धात्री	१३ २	५	मघीश्वरः	मधीश्वरः	२१ २	१	मोदके	मोदकै	२६ १	१५
प्रोबाच	प्रोवाच	१३ २	११	दशम	दशा	२२ १	९	मुनि	मुनिं	२६ २	११
पुरुपोत्तमान्	पुरुपोत्तमाः	१४ २	६	दशम	दशा	२२ २	८	तालेपु	तालेषु	२६ २	१४
दयद	दयाद	१४ २	७	सप्तति	सप्तभि	२२ २	१३	स्तरीन्	भूरीन्	२७ १	३
अग्रो	अथो	१४ २	९	राज्वे	राज्ये	२३ १	३	शिव	शिवं	२७ १	१०
द्दधानः	द्दधानः	१५ २	७	रवयम्	स्वयम्	२३ १	३	जन्मभू	जन्मभूः	२७ १	१२
मान्मजम्	मात्मजम्	१६ १	४	दशम	दशा	२३ १	६	प्रनष्टवान्	प्रणष्टवान्	२७ २	१४
इत्युपगर्थि	इत्युपसर्गार्थि	१६ २	६	दशम	दशा	२३ २	५	त्रमिदं	त्रोऽसकौ	२८ १	१२
चतुर्विंघं	चतुर्विधं	१८ १	११	जितो	जिंतो	२४ १	११	मेवं	मेव	२८ २	९

अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०
काणी	वापी	२८	२	१४	ब्रीवीत्स	ब्रवीत्स	३५	२	२	ब्रीवीत्	ब्रवीत्	४०	१	२

अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०
पुरस्त्री	पुरस्त्री	४५	१	३	विमुच्यते	किमुच्यते	४७	२	७	प्रेययिष्यामि	प्रेर्ययिष्यामि	५२	२	११
प्रतिमाश्र	प्रतिमाश्र	४५	१	७	घम्मो	धम्मो	४७	२	१४	सोऽरुणामे	सोऽरुणाभे	५३	२	३
षरिग्नह	परिग्रह	४५	१	९	मप्व	मप्य	४८	१	१	श्लाघ्यो	श्लाघ्यो	५३	२	५
स्नानादि	स्नानादि	४५	२	१२	श्राग्नही	श्राग्रही	४८	१	८	अवकेशी	अवकेशि	५४	१	२
ग्रेहे	ग्रे	४६	१	६	जक्षे	जज्ञे	५०	२	५	क्रुदग्निना	क्रुधग्निना	५४	१	८
नस्ति	नास्ति	४६	१	८	न्नुर्वी	न्नुर्व्यी	५१	२	४	परिधं	परीधं	५४	१	८
प्रतिकमण	प्रतिक्रमण	४६	२	१०	वोढ़्णि	वोढ़्णि	५१	२	८	मध्पस्थं	मध्यस्थं	५४	२	१
यत	यत्	४६	२	१०	तरुष्का	तुरुष्का	५१	२	१५	भ्रुण	भ्रूण	६४	२	९
पच्चुप्पन्ने	पच्चुप्पन्ने	४६	२	१३	सर्पं	सूर्पं	५२	१	१	वन्धादि	बन्धादि	५५	१	१२
भुयः	भूयः	४७	१	१	वारिखाम्भसः					भगबान	भगवान	५६	१	१
श्रीपत्तने	श्रीपत्तनें	४७	१	४		वारि स्वाम्भसः	५२	१	३	प्युचे	प्यूचे	५६	१	७
देव्यार्प्पयत्	देव्यार्प्पयत्	४७	१	११	भूपा	मूषा	५२	१	१०	माक्षदायित्वे	मोक्षदायित्ये	५६	२	११
तथा	तदा	४७	२	४	वर्ग	वर्गं	५२	२	१	बासी	वासी	५७	१	३
दुकुल	दुकूल,	४७	२	६	सँलेरवनां	संलेरवनां	५३	२	२	द्युमाणि	द्युमणिं	५७	२	१

अशुद्धम्	शुद्धम्	पृ०		पं०	अशुद्धम्	शुद्धम्	पृ०		पं०	अशुद्धम्	शुद्धम्	पृ०		पं०
वत्स	वत्स	५९	१	१	यध्य	यद्ध	६५	२	१०	मशिश्रयन्	मशिश्रियन्	७३	१	४
मध्यान्दिने	मध्यन्दिने	५९	२	७	मालर्षि	मालिकर्षि	६६	२	६	निस्तृंशो	निस्त्रिंशो	७४	१	१
रूपाययुः	रुपाययुः	६१	१	१०	पुरे	पुरे	६६	२	७	ःरर्हता	रर्हता	७४	१	६
गुफा	गुहा	६१	२	३	ऽछिद्	ऽच्छिद	६७	१	८	दृष्ट	दृष्ट	७४	२	२
स्थित्वा	स्थितत्वा	६१	२	५	क्रमाद	क्रमा	६९	१	११	जन्ननाम्	जन्मनाम्	७४	२	६
विरुहातुर	विरहातुर	६२	१	९	विन्दुभिः	बिन्दुभिः	६९	२	१३	सोनान्यं	सेनान्यं	७४	२	१३
याचसि	याचते	६२	२	५	निरिक्षितुम्	निरीक्षितुम्	७०	१	६	हेृपिताः	हेपिताः	७५	२	१०
बिहवलो	विह्वला	६२	२	६	पश्यत्	पश्यत	७०	१	७	प्रणीधि	प्रणिधि	७६	१	११
स्येन	स्थेन	६३	१	१०	इत्युदिर्येति	इत्युदीर्येति	७०	२	५	देवनन्दा	देवानन्दा	७९	१	६
स्वमान	समान	६४	१	७	प्रतिमा	प्रतिमां	७१	१	६	मब्रवोत्	मब्रवीत्	७९	२	१२
वपुः	पपुः	६४	१	७	स्तस्य	स्तस्या.	७१	१	६	स्मा	स्म	८०	२	९
कियता	कियती	६४	१	१०	ऽब्रवीत्	ऽब्रवीत्	७१	२	७	नापितो	नापिंतो	८०	२	१३
उल्लालो	कल्लोलो	६५	२	७	पराड्मुखः	पराङ्मुखः	७१	२	८	भर्मकम् ।	मर्भकम् ।	८०	२	१४
देवभूवं	देवभूयं	६५	२	९	विक्ष्य	वीक्ष्य	७१	२	१२	जरदद्रवम्	जरद्रवम्	८१	२	७

अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०
प्रतिबद्ध	प्रतिबद्धः	८१	२	११	कोगोत्रो	किंगोत्रो	९५	२	२	जीवना	जीवना	१०६	१	१
करकंडवाख्य	करकंड्वाख्य	८१	२	११	अनर्था	अनर्थो	९५	२	११	रवर्ङ्ग	रवर्ङ्ग	१०६	२	२
योग्यं तद्	योग्यः सः	८२	२	२	साघून्	साधून्	९६	१	४	गृघ्र	गृध्र	१०७	१	१४
निवृतः	नीवृतः	८२	२	६	सोमता	सौम्यता	९६	१	८	मेषासौ	एवासौ	१०७	१	१५
बद्वा	वलम्	८२	२	९	विवाह	विवाहं	९८	२	४	द्रुतम्	दुद्रुतम्	१०७	२	४
तरितव्यो	तरीतव्यो	९१	२	१३	स्वामिस्ते	स्वामिंस्ते	१०१	२	२	तस्यास्या	तस्यास्य	१०८	१	१४
पक्तो	पक्वो	९२	१	६	दण्डके	कण्डकै	१०२	१	११	प्रच्छन्नेन	प्रच्छनेन	१०८	२	१२
भीतमे	भीतने	९२	२	२	दण्डकेम्पो	कण्डकेभ्पो	१०२	१	१४	चत्य	चैत्य	११०	२	१४
कश्चित्	कथंचित्	९३	२	३	अभिदधे	ऽभिदधे	१०२	२	१३	ग्रामं ग्रामं	गामं गामं	११५	२	११
माशिश्रयत्	मशिश्रियत्	९३	२	८	अङ्गुलि	अङ्गुलिं	१०४	१	४	दुर्मति	दुर्मतिं	११५	२	१३
चतुः पल्यो	चतुष्पल्यो	९४	१	२	घिग	धिग	१०५	१	३	धराधरे	धाराधरे	११८	२	८
चक्रतू	चक्रतु	९४	२	४	शिष्वा	शिष्व	१०५	१	५	धृष्टा	घृष्टा	११९	२	३
स्म्यस्मि	स्यस्मि	९५	१	४	मुक्वा	मुक्त्वा	१०५	२	३	विषामि	विशामि	११९	२	९

श्रीसद्गुरुप्रशस्तिः ।

समाधिस्थितयोगीन्द्रं, विद्युन्मीलितचक्षुषम् । सदा भान्तं प्रतापेन, धिया न्यक्कृतगीष्पतिम् ॥ १ ॥

निजानन्दाब्धिपूर्णेन्दुं, प्रतिष्ठितपदस्थितम् । गम्भीरवाचं मुग्धास्यं, गूढमात्मन्यवस्थितम् ॥ २ ॥

निर्विकल्पसमाधिस्थं, सर्वजन्तुशमप्रदम् । दूरीकृतविकल्पोघत्सज्ज्ञानभास्करं गुरुम् ॥ ३ ॥

विशुद्धचरितख्यातं, जगतीशसमर्चितम् । सिद्धान्तवचने दक्षं, सर्वपापतमोरविम् ॥ ४ ॥

देवेन्द्रवन्द्यतीर्थेश–ध्यानमग्नमहर्निशम् । संजातमोहमथनं, ज्ञानतत्त्वविलासिनम् ॥ ५ ॥

अनेकान्तविचारेण, निष्ठं तं जैनवर्त्मनि । सच्छिष्यश्रेणिराजन्तं चिदानन्दवनोज्ज्वलम् ॥ ६ ॥

निरस्तसर्वपापौघं, शान्तमुद्राविराजितम् । वरेण्यं नौमि वक्तारं बुद्ध्यब्धि सूरिपुङ्गवम् ॥ ७ ॥

ऋद्धिसागरसूरीन्द्रः, सूरिश्च, कीर्तिसागरः । प्रणमतो गुरुं भक्त्याऽष्टकं स्ताद्भविनां मुदे ॥ ८ ॥

ॐ नमः श्री पार्श्वनाथाय

विविध जैन ग्रंथोद्धृत—

जैनकथार्णवः

प्रथमो विभागः

१ देवाधिदेवतीर्थंकर—श्री ऋषभदेवचरित्रम्

श्री ऋषभदेव पूर्व भवानि

पुराऽपरविदेहेषु, पुरे क्षितिप्रतिष्ठिते। धनी धनाभिधानोऽभूद् धनेन धनदोपमः ॥ १ ॥
सोऽन्येद्युर्व्यवसायाय, वसन्तपुरपत्तनम्। गन्तुकामश्चकारोच्चैः, पटहोद्घोषणामिमाम् ॥ २ ॥
द्रव्यं द्रविणहीनानां, दुर्बलानां च शम्बलम्। वाहनं तद्विहीनानां, यच्छामि सममीयुषाम् ॥ ३ ॥
श्रुत्वा तामिति भूयांसो, वणिक्—कार्पटिकादयः। सगच्छा धर्मघोषाख्याः, सूरयश्च तमन्वगुः ॥ ४ ॥
करभैः सैरिभैर्जात्यहयैः शकटसञ्चयैः। पन्थाः पृथुरपि प्रापाकीर्णसङ्कीर्णतां तदा ॥ ५ ॥
प्रकार्षाद् वर्षितुं लग्नः, प्रावृष्यथ घनाघनः। मार्गवैषम्यतः सार्थोऽरण्ये तस्थौ ततोऽखिलः ॥ ६ ॥

क्रमेण क्षीणपाथेयाः, कन्दमूलफलाशिनः । बभूवुरखिला लोकास्तपःस्थास्तापसा इव ॥ ७ ॥
निशीथेऽन्येद्युरस्मार्षीत्, सार्थनाथस्तपोधनान् । प्रातराकार्य कार्यज्ञो, घृतेन प्रत्यलाभयत् ॥ ८ ॥
तेन दानेन सम्प्राप्तसम्यक्त्वश्चायुषः क्षये । उत्तरकुरुषूत्पन्नस्त्रिपल्यायुर्महासुखी ॥ ९ ॥
भवे तृतीये सौधर्मे, त्रिपल्यायुः सुरस्ततः । विजये गन्धिलावत्यां, प्रतीचीदिग्विदेहगे ॥ १० ॥
गान्धारदेशे वैताढ्ये, पुरे गन्धसमृद्धके । सम्राडतिबलस्तस्य, पुत्रः शतबलो नृपः ॥ ११ ॥
महिषी चन्द्रकान्ताख्या, जातश्च्युत्वा तयोः सुतः। महाबलाभिधः प्राप, राज्यं क्रमात् क्रमागतम् ॥१२॥ [त्रिभिःसम्बन्धः]
प्रिया विनयवत्यस्य, मन्त्री सुबुद्धिरास्तिकः। सद्धर्मा भिन्नसंभिन्नश्रोताश्चान्योऽस्ति नास्तिकः॥ १३ ॥
अन्यदा संसदासीनस्यास्य भूपस्य चाग्रतः । चकार चारुचारीभिर्नाटकं नटपेटकः ॥ १४ ॥
पश्यन्तं सस्पृहं नाट्यं, सुबुद्धिर्भूभुजं जगौ । स्फीतं गीतं विलापाभं, सर्वं नाट्यं विडम्बना ॥ १५ ॥
भारा हाराद्यलङ्कारा:, सर्वे कामास्तु दुःखदाः । परं परत्र सर्वत्र, धर्मः शर्मकरोऽङ्गिनाम् ॥ १६ ॥
शूलभिन्न इवात्यन्तं, कपिकच्छूकदर्थितः । इवासहिष्णुश्चान्योऽदः प्रोवाच सचिवो वचः ॥ १७ ॥
प्रत्यक्षं सौख्यमुत्सृज्य, परोक्षार्थी विलक्षताम् । को मूढो नैति जम्बूक, इव त्यक्तमुखामिषः ? ॥ १८ ॥
को वा ग्रासं भाजनस्थं, हित्वाऽन्यस्मै प्रतीक्षते ? । पिपासुर्वाऽमृतं प्राप्य, सन्दिग्धाम्भः क इच्छति ? ॥ १९ ।
भुक्त्वा भोगानथो प्रान्ते, कुर्याद् वा सुकृतं कृती । स्तनं धयन्तं तनयं, को हि मातुर्वियोजयेत् ? ॥ २० ॥
सुबुद्धिरूचे यत् प्रान्ते, धर्मोद्धरणधीरतां । तदेतद् दमनं लग्ने, सङ्ग्रामे गज–वाजिनाम् ॥ २१ ॥

कूपस्य खननारम्भो, लग्नेऽग्नौ सदनेऽथवा। पुरे रोधे कियाम्नीरेन्धन–धान्यादिसङ्ग्रहः ॥ २२ ॥
श्रेयसः करणं प्रान्ते, दुर्घटं घटते यतः। इवाकालफलापातः, प्राणिनामायुषः क्षयः ॥ २३ ॥
अतो मतिमता विद्यमाने सभ्यग्वयो बले। अहार्यकार्य एवासौ, धर्मः शर्मनिबन्धनम ॥ २४ ॥
किञ्चातिलोभतः प्राणी, प्रायः प्राप्नोति चापदः। वनस्थजम्बुकस्येवामात्योऽवोचदसौ कथम् ? ॥ २५ ॥
सुबुद्धिरभ्यधादेकोऽन्यदा वने वनेचरः। जगाम भ्रमता तेन, दृष्टो दूरस्थितः करी ॥ २६ ॥
जघानैकेन बाणेन, धन्यंमन्यो धनुर्द्धरः। हित्वा धनुः शरं पर्शुपाणिर्भुक्ताकृतेऽगमत् ॥ २७ ॥
तत्पातशब्दभीतेन, दष्टो दुष्टोरगेण सः। परस्मिश्चिन्त्यते यच्च, प्रायः पतति तद्गृहे ॥ २८ ॥
दैवात् तत्रैक आयातः शृगालो ह्यचिन्तयत्। किञ्चितकालं नृसर्पाभ्यां करिणा जीविका चिरम् ॥ २९ ॥
तावदग्रि धनुर्जीवां, भक्षयंस्तां ममार सः। तत्कोट्या तालुके भिन्ने, धिग् धिग् लोभान्धचेष्टितम् ॥ ३० ॥
भुञ्जानो विषयानेवं, तद्विपाकमचिन्तयन्। अतृप्तस्तृप्तिपर्यन्तं, परत्रामुत्र दुःखभाक् ॥ ३१ ॥
तथा देवान्यलोकोऽपि, न सन्दिग्धो यदेकदा। आवाभ्यां नाकिनो दृष्टा, गताभ्यां नन्दने वने ॥ ३२ ॥
तेष्वेकः प्राह ते सोऽहमतिबलः पितामहः। शुद्धधीर्धर्ममाराध्य, ब्रह्मलोकेन्द्रतां श्रितः ॥ ३३ ॥
त्वमप्युद्यच्छ संसारकारागाराद्विनिर्गमे। मा स्म शोचीर्भवाम्भोधौ पतितैरिव पक्षिभिः ॥ ३४ ॥
केऽमी पक्षिण इत्युक्ते, भवतोचे पुरन्दरः। हस्त्येकस्तृषितो ग्रीष्मे, नद्यां नीरार्थमाविशत् ॥ ३५ ॥
पङ्के मग्नस्तथा सोऽभूद् यथा निर्गन्तुमक्षमः। शृगालभक्षितापानद्वारा काकादयोऽविशन् ॥ ३६ ॥

मांसलोभेन मध्यस्थाः, सुस्थास्ते तस्थुरस्थिराः । शुष्कं सङ्कोचमापन्नं, हस्त्यङ्गं पञ्जकोशवत् ॥ ३७ ॥
वर्षापूरेण तन्नीतं समुद्रं मत्स्य–कच्छपैः । भिन्नं भिन्नं च नीरेण, निरीयुस्तेऽखिला बहिः ॥ ३८ ॥
इतस्ततो भ्रमन्तश्चापश्यन्तः पारमम्बुधेः । विनाशमापुरात्मानं, निन्दन्तोऽदीर्घदर्शिनम् ॥ ३९ ॥
एवं संसारिणो जीवा, मर्त्यजन्मकलेवरे । तिष्ठन्तो दुःखितां यान्ति, लोभिनो विषयामिषे ॥ ४० ॥
तस्मादवसरं प्राप्योद्यमः कार्यः क्रियोपरि । पश्चान्मृत्युमुखं प्राप्तो, वत्स ! मा गच्छ दीनताम् ॥ ४१ ॥
एतत् स्मरसि तस्योक्तं, राज्ञोचे संस्मरामि भोः ! । मन्त्र्याह परलोकोऽपि, श्रद्धेयस्तर्हि निश्चितम् ॥ ४२ ॥
स्वामिंस्तवान्वये पूर्वं, कुरुचन्द्रोऽभवन्नृपः । भार्या कुरुमती तस्य, हरिश्चन्द्रः कुमारकः ॥ ४३ ॥
चार्वाकः स च चार्वाकमतं सत्यतया वदन् । न मन्यतेऽन्यलोकं नो, बन्ध–मोक्षौ वृषावृषौ ॥ ४४ ॥
स प्रान्तावसरे पुष्पस्रस्तरं प्रस्तरव्रजम् । गोशीर्षचन्दनं पूति, पयस्तप्तत्रपूपमम् ॥ ४५ ॥
दुकूलतूलीः शूलीव, शर्कराः कर्करानिव । विदन् ज्ञात्वा रहो राज्ञी, सपुत्रा तमपालयत् ॥ ४६ ॥
पराशुतामसावापोग्रपापो विरसं रसन् । तत्पदे मन्त्रिभिर्न्यस्तो, हरिश्चन्द्रो नृपाङ्गजः ॥ ४७ ॥
पप्रच्छ सोऽन्यदा धर्मं, सुबुद्धिसचिवं निजम् । इतः पुरो बहिर्देवाश्चक्रुः केवलिनो महम् ॥ ४८ ॥
सुबुद्धिमन्त्रिणा सार्द्धं, भूपस्तं वन्दितुं गतः । पप्रच्छावसरे तातो, भगवन् ! मे गतः क्व नु ? ॥ ४९ ॥
भगवानाह सप्तम्यां, संवेगात् तौ व्रतं श्रितौ । मोक्षं गतौ चासङ्ख्याता, व्यतीयुस्ते तवान्वये ॥ ५० ॥
यावद् भवान् सुबुद्धेश्चान्वयेऽहं क्रम एष नः । सद्धर्मावसरो ज्ञाप्यः, प्रभोर्लोकान्तिकैरिव ॥ ५१ ॥

यच्चानवसरे रङ्गभङ्गजङ्गमसङ्गमम् । वचो वच्मि तदत्रापि, प्रगुणं कारणं शृणु ॥ ५२ ॥
श्रीविजयामितघोषौ, श्रमणौ नन्दने वने । गतेन दृष्टौ पृष्टौ च, कियदायुः प्रभोर्मम ? ॥ ५३ ॥
ताभ्यां मास इति प्रोक्तेऽत्याकुलो भवदन्तिके । आगतोऽतः परं देव !, यद् युक्तं तद् विधेहि भोः ॥ ५४ ॥
सम्भ्रान्तो भूपतिः प्राह, मन्त्रिन् ! स्तोकदिनैः कियान् । धर्मो भवति ? मन्त्र्याह, सोऽल्पोऽप्यनल्पसौख्यदः॥ ५५ ॥
यदेकाहकृता शुद्धा, प्रव्रज्या पारमेश्वरी । मोक्षं वैमानिकत्वं वा, ददात्यत्र न संशयः ॥ ५६ ॥
चैत्येष्वष्टाह्निकां कृत्वा, लात्वा संस्तारकव्रतम् । द्वाविंशत्यहैरीशाने विमाने श्रीप्रभे दिवि ॥ ५७ ॥
उत्पन्नो ललिताङ्गाख्यो, देवो देवी स्वयंप्रभा । यानिन्द्रेण समं नन्दीश्वरद्वीपे च्युतोऽथ सः ॥ ५८ ॥ युग्मम् ॥
विजये पुष्कलावत्यां पत्तने प्राग्विदेहगे । लोहार्गले नृपः स्वर्णजङ्घो लक्ष्मीः प्रिया तयोः ॥ ५९ ॥
पुत्रोऽभूद् वज्रजङ्घाख्यः, स पूर्वभवगेहिनीम् । श्रीमतीमुपयेमे श्रीवज्रसेनार्हतः सुताम् ॥ ६० ॥
क्रमात् सम्प्राप्तसाम्राज्यस्तल्लोभेनातिपाप्मना । विषधूपप्रयोगेण, हतः पुत्रेण सप्रियः ॥ ६१ ॥
उत्तरकुरुषूत्पन्नः, पूर्णायुर्युग्मधर्म्मिषु । त्रिपल्यायुश्च सौधर्मे, सुरो जातस्ततश्च्युतः ॥ ६२ ॥
अथो महाविदेहेषु, पुरे क्षितिप्रतिष्ठिते । सुविधेर्भिषजः पुत्रो, जीवानन्दाह्वयोऽजनि ॥ ६३ ॥
केशवः श्रीमतीजीवश्चत्वारः सुहृदोऽपरे । जज्ञिरेऽस्य नृपामात्य–सार्थप–श्रेष्ठिसूनवः ॥ ६४ ॥
विशेषात् पूर्वसम्बन्धादस्याद्ये प्रीतिरुत्तमा । एकजीवा इवान्योन्यं, समं चक्रुः क्रियाः समाः ॥ ६५ ॥
तिष्ठन्तोऽन्येद्युरद्राक्षुर्वैद्यपुत्रस्य मन्दिरे । भिक्षार्थमागतं दुष्टकुष्ठपुष्टं तपोधनम् ॥ ६६ ॥

सकृपाः सस्मितं प्राहुः, साहसं भिषजामहो ! । कुपात्रमपि लोभेन, चिकित्सन्ति न तूत्तमम् ॥ ६७ ॥
विज्ञाततदभिप्रायो, वयस्यान् प्राह वैद्यसूः । सत्यमेतत् परं नास्ति, धनं मे साध्य-साधनम् ॥ ६८ ॥
कम्बलश्चन्दनं तैलं, लक्षपाकं पृथक् पृथक् । विलोक्यतेऽत्र तत्राऽऽस्ते, तैलं मे लक्षपाककम् ॥ ६९ ॥
अमात्य-नृपपुत्राद्यैः, प्रोक्तमन्यद्वयं पुनः । करिष्याम इति प्रोच्य, सर्वेऽगुर्वणिगापणे ॥ ७० ॥
लक्षद्वयेन गृह्णन्तश्चन्दनं कम्बलं च ते । वणिजाऽभाणि किं कार्यं ?, तेऽपि साध्वर्थमादिशन् ॥ ७१ ॥
शिशूनामप्यहो ! बुद्धिर्धर्मे नो तादृशी मम । श्रेष्ठिश्रेष्ठ इति ध्यात्वा, विना मूल्यमदाद् द्वयम् ॥ ७२ ॥
वैराग्याच्च व्रतं लात्वा, सिद्धसौधाध्वगोऽभवत् । लात्वा समग्रसामग्रीं, ते जग्मुः श्रमणान्तिकम् ॥ ७३ ॥
भगवन्ननुजानीहि, कुर्मस्ते रुक्प्रतिक्रियाम् । इत्युक्त्वाऽभ्यङ्गमङ्गस्य, सिद्धतैलेन ते व्यधुः ॥ ७४ ॥
कम्बलेनाऽऽवृतादङ्गान्निरीयुः कृमयो बहिः । क्षुभितास्ते दयावद्भिर्निक्षिप्ता गोकलेवरे ॥ ७५ ॥
चन्दनालेपनं चक्रुरेवं त्रिस्त्रिः प्रयोगतः । त्वग्मांसास्थिगताः कीटा, निर्गता गात्रतो मुनेः ॥ ७६ ॥
संरोहिण्या वरौषध्या, सुवर्णवपुषं मुनिम् । विधाय क्षमयित्वा च, धन्यंमन्या ययुर्गृहम् ॥ ७७ ॥
साध्वर्थकल्पितार्थेन, जिनचैत्यमचीकरन् । ते क्रमाद् व्रतमासाद्याच्युते कल्पेऽभवन् सुराः ॥ ७८ ॥
इतश्च जम्बूद्वीपस्य, विदेहे विजयेऽष्टमे । नगर्यां पुण्डरीकिण्यां, तीर्थकृत् वज्रसेनराट् ॥ ७९ ॥
तत्पत्नी धारिणी तस्या, वज्रनाभादयः सुताः । पञ्च पञ्चमुखप्राणा बभूवुरच्युतात् च्युताः ॥ ८० ॥ युग्मम् ॥
वज्रसेनो जिनो, लोकान्तिकैरागत्य बोधितः । दानं दत्त्वा व्रतं लात्वा, क्रमाज्ज्ञानमवाप च ॥ ८१ ॥

वज्रनाभः समुत्पन्नचक्ररत्नो भुवस्तलम् । प्रसाध्य बन्धुभिः सार्द्धं, भुक्तवांश्चक्रिणः श्रियम् ॥ ८२ ॥
स्वाधीनानि निधानानि, नवाप्यस्य चतुर्दश । रत्नान्यश्वरथेभानां, लक्षाश्चतुरशीतिकाः ॥ ८३ ॥
चतुःषष्टिसहस्राणि, स्त्रियोऽस्य भोग्यतामगुः । वेदाक्षिलक्षपूर्वाणि, राज्यं भुक्त्वाऽन्तिके पितुः ॥ ८४ ॥
सबन्धुर्व्रतमादत्ताभूच्चतुर्दशपूर्ववित् । चत्वारो बाहुमुख्याश्चैकादशाङ्गविदोऽपरे ॥ ८५ ॥
वज्रनाभोऽभवत् सूरिरर्हदाराधनादिभिः । विंशतिस्थानकैस्तीर्थकृत्कर्माऽऽर्जीदसौ पुनः ॥ ८६ ॥
बाहुर्बहूनामन्नादिदानतश्चक्रिणः श्रियम् । सद्विश्रामणयाऽऽनर्जे सुबाहुर्बाहुशक्तिताम् ॥ ८७ ॥
सुलब्धमेतयोर्जन्म, सद्वैयावृत्यकारिणोः । व्याख्यान्तीत्यादिनाऽऽचार्याः, सन्तः सत्पक्षपातिनः ॥ ८८ ॥
श्रुत्वा पीठ–महापीठौ, स्वाध्याय–ध्यानबन्धुरौ । सञ्जातमत्सरौ चित्ते, वदतः स्म परस्परम् ॥ ८९ ॥
शरीरसुखकारी स्यात्, प्रायः श्लाघ्यो जने नरः । न धर्मे दृश्यतेऽत्रान्यथाऽहो ! मोहविजृम्भितम् ॥ ९० ॥
इत्युक्तवद्भ्यामेताभ्यां, स्त्रीवेद्यं कर्म सञ्चितम् । चतुर्दशपूर्वलक्षाः, सर्वेऽप्याराध्य सद्व्रतम् ॥ ९१ ॥
सर्वार्थसिद्धमासेदुर्दुरासदमदर्शनैः । त्रयस्त्रिंशत्पयोराश्यायुषः ससुखमायुषः ॥ ९२ ॥
इतश्च पश्चिममहाविदेहे वणिजावुभौ । वाणिज्यं चक्रतुः सार्द्धं, भद्रक–क्षुद्रकाशयौ ॥ ९३ ॥
क्षुद्रः प्रच्छन्नलाभादि स्थगयन्नाददे स्वयम् । मृत्वाऽत्र भरते जातौ, नरेभौ युग्मधर्मिणौ ॥ ९४ ॥
नरं वीक्ष्य गजः स्नेहात्, स्कन्धमारोहयत् स्वयम् । युग्मिनस्तमिति प्राहुर्नाम्ना विमलवाहनम् ॥ ९५ ॥
हीयमानेषु गीर्वाणद्रुमेषु कालदोषतः । युग्मिनः कलहायन्तेऽलभमानाः कलं फलम् ॥ ९६ ॥

सार्कं चन्द्रयशःपत्न्येभस्थं तं वीक्ष्य युग्मिनः । विवदच्छेदमिच्छन्तः, स्वावज्ञां तत्पुरोऽवदन् ॥ ९७ ॥
सोऽपि नीतिमिमामेषां हक्काराख्यां समादिशत् । मर्यादास्थायिनां तेषां, न व्यतीयुर्महाह्रियः ॥ ९८ ॥
धनुर्नवशतान्युच्चः, प्रसूय युगलं स तु । पल्यस्य दशभागायुः, सुपर्णेषूदपद्यत ॥ ९९ ॥
चक्षुष्मान् कुलकृन्नान्यश्चन्द्रकान्तापतिर्नृपः । पल्यस्यासङ्ख्यभागायुरुच्चाङ्गोऽष्टधनुःशती ॥ १०० ॥
तामेव नीतिं नीतिज्ञो, दर्शयन्नपराधिनाम् । मृत्वा सुपर्णकुमारेऽगाद् राज्ये संस्थाप्य नन्दनम् ॥ १०१ ॥
यशस्वीति तृतीयोऽभूत्, सुरूपापतिरीश्वरः । आनुपूर्व्योनपूर्वायुः, धनुःसप्तशताङ्गवान् ॥ १०२ ॥
मर्यादाच्छेदिनां कालदोषान्नीतिद्वयं दिशन् । हक्काराख्यां मकाराख्यामल्पानल्पापराधिनाम् ॥ १०३ ॥
मृत्वोदधिकुमारेऽगाद् राज्ये न्यस्य निजाङ्गजम् । चतुर्थोऽथाभिचन्द्रोऽभूत्, प्रतिरूपापतिः पतिः ॥ १०४ ॥
पूर्वोक्तायुर्वपुर्मानः, स सार्द्धं षड्धनुःशतम् । स्वायुर्दशांशे विन्यस्तपुत्रराज्योऽगमद् दिवम् ॥ १०५ ॥
धनूंषि षट्शतान्युच्चः, पञ्चमोऽथ प्रसेनजित् । चक्षुःकान्तापतिः पूर्वोक्तायुः प्रियङ्गुवर्णरुक् ॥ १०६ ॥
धिक्काराख्यतृतीयाया, नीतेः कर्त्ता महागसाम् । मृत्वा द्वीपकुमारेऽगात्, सूनुसङ्क्रामितेन्दिरः ॥ १०७ ॥
सार्द्धेषुशतचापाङ्गः, कुलकृन्मरुदेवकः । श्रीकान्तेशश्च पूर्वायुर्न्यस्य राज्ये तनूद्भवम् ॥ १०४ ॥
देवो द्वीपकुमारेऽभून्नीतित्रयप्रवर्त्तकः । सप्तमः कुलकृन्नाभिस्तत्पत्नी मरुदेव्यथ ॥ १०९ ॥
जम्बूद्वीपेऽत्र भरते, सुषमा–दुःषमारके । एकोननवतिपक्षैरूने स त्रुटिताङ्गके ॥ ११० ॥
आषाढाद्यचतुर्थ्यामुत्तराषाढागते विधौ । स जीवो वज्रनाभस्य, च्युत्वा सर्वार्थसिद्धितः ॥ १११ ॥

तस्याः कुक्षाववातारीत् सापि स्वमांश्चतुर्दश । ददर्श सुखनिद्राणा, प्रोन्निद्राननपङ्कजा ॥ ११२ ॥
गौर्गजः केशरी लक्ष्मीस्नात्रं दाम रविः शशी । ध्वजः कुम्भः सरोऽब्धिर्विमानं रत्नोच्चयः शिखी ॥ ११३ ॥
लष्टान् पुष्टानिमान् दृष्ट्वा हृष्टतुष्टा सती सती । स्पष्टमाचष्ट मिष्टाभिर्वाग्भिरभ्येत्य भूभुजम् ॥ ११४ ॥
स्वमिन्नद्य सतां कल्पे, तल्पे सुप्ता सती निशि । मुखे प्रविशतः स्वमान्, प्रबुद्धा वीक्ष्य साम्प्रतम् ॥ ११५ ॥
तदेषां किं फलं ? मन्ये, सद्यो मेऽद्य निवेद्यताम् । श्रुत्वा सम्यग् विचार्याऽऽर्यो, बुद्धिविज्ञानपूर्वकम् ॥ ११६ ॥
उवाच वाचमाचारपूतः सद्भूतमुन्नृपः । सर्वाङ्गसुभगो भाग्यलभ्यस्ते भविता सुतः ॥ ११७ ॥
स यौवनमनुप्राप्तः, प्रतापाक्रान्तभूतलः । आक्रमिष्यति भूपालमण्डलं भानुवन्नभः ॥ ११८ ॥
आकर्ण्य कर्णामृतवृष्टिकल्पं, नाभेर्वचः श्रीमरुदेव्यपीदम् । बभूव धाराहतनीपपुष्पमिवोल्लसद्विग्रहरोमकूपा ॥ ११९ ॥
शीर्षे दशनखावर्त्तं, विधायाञ्जलिमब्रवीत् । स्वामिन्निष्टमसन्दिग्धं, सम्यगेतत् प्रतीप्सितम् ॥ १२० ॥
इत्युक्त्वा नाभ्यनुज्ञाता, गृहमेत्य सखेन सा । गर्भं बभार धौरेयं, सद्बीजं बीजसूरिव ॥ १२१ ॥
वासवाश्च चतुःषष्टि सद्रत्नकुक्षिधारिके ! । भवत्या भविता तीर्थकृत्पुत्रः प्रोचुरेत्य ताम् ॥ १२२ ॥
सार्द्धाष्टमदिने मासे, नवमे पूर्णदोहदा । सुतं प्रासूत चैत्राद्याष्टम्यामर्द्धनिशि प्रसूः ॥ १२३ ॥
काष्ठाः प्रसेदुरासेदुः, क्षणं नारकिणः सुखम् । हर्षाद्वैतमयं जज्ञे, जगच्चन्द्रोदयेऽब्धिवत् ॥ १२४ ॥
षट्पञ्चाशत्कुमारीणामासनानि चकम्पिरे । विज्ञायावधिनाऽभ्येत्य, जिनजन्मोत्सवं व्यधुः ॥ १२५ ॥
संवर्त्त–मेघाऽऽदर्शांश्च, भृङ्गार–तालवृन्तकान् । चामरोद्योतरक्षांश्च, कुर्युः कार्याणि ताः क्रमात् ॥ १२६ ॥

समातरं जिनं नत्वोद्गाय गीतानि तानि ताः । जग्मुर्यथागतं सर्वाः, प्रमोदाञ्चितचेतसः ॥ १२७ ॥
अथाऽऽसनप्रकम्पोत्थावधिज्ञानेन वासवः । विज्ञो विज्ञाय सर्वज्ञजन्म—सन्महिमास्पदम् ॥ १२८ ॥
सुघोषघण्टाटङ्कारसावधानीकृतामरः । पालकाख्यविमानस्थः प्रापार्हज्जन्ममन्दिरम् ॥ १२९ ॥ युग्मम् ॥
दत्त्वाऽवस्वापिनीं मातुर्मुक्त्वा पार्श्वे जिनाकृतिम् । पञ्चरूपधरो मेरुधराधरमगाद्धरिः ॥ १३० ॥
रूपेणैकेन हस्तेऽलाद्, वहन् द्वाभ्यां च चामरे । एकेनोल्लालयन् वज्रं, छत्रमेकेन मूर्द्धन्यधात् ॥ १३१ ॥ युग्मम् ॥
क्षीरार्णवाहृताम्भोभिः, क्षालितं वपुरार्हतम् । वासवैश्चात्मनः पङ्कमनेकभवसञ्चितम् ॥ १३२ ॥
नाटयपाटपटो नाटयं, चक्रे शक्रवधूजनः। को वाऽऽसाद्य सुधाकुण्डमुदासीनो भवेत् सुधीः ? ॥ १३३ ॥
प्राचीनविधिनाऽऽनीयापनीय तद्विचेतनाम् । अलङ्कारान् प्रभोर्योग्यान् दत्त्वा खेलनकानि च ॥ १३४ ॥
ससुराः सुरराजाश्च, जग्मुः स्वर्गं यथागतम् । शशंस नाभये देवी, प्रबुद्धा सुतजन्म तत् ॥ १३५ ॥
प्रभो ऋषभ इत्याख्यां, पितरौ चक्रतुर्यतः । तदूर्वोर्वृषभाङ्कोऽस्ति, स्वप्ने प्राक् चेक्षितोऽम्बया ॥ १३६ ॥
गते देशोनवर्षेऽस्य, सेक्षुयष्टिः पुरन्दरः । दर्शनायाऽऽगतस्तत्र, प्रभुणा दृष्टिरर्पिता ॥ १३७ ॥
अकतीक्षुं भवान् पाणिं, प्रससार जिनेश्वरः । इत्यत्रेक्ष्वाकुवंशस्य, स्थापनां वासवो व्यधात् ॥ १३८ ॥
अथ देवाहृतोत्तरकुरुस्वर्द्रुफलैः प्रभुः । पुपोष वपुषा वृद्धिं, सार्द्धं पित्रोर्मनोरथैः ॥ १३९ ॥
दिवश्च्युतोऽद्भुतश्रीको, देव—देवीभिराश्रितः । श्वेतदन्तद्युतिः श्यामशिरोजः सुसरोजदृक् ॥ १४० ॥
बिम्बोष्ठोऽष्टोत्तरं चारुलक्षणानां सहस्रकम् । दधानो धनुषां पञ्चशतमुच्चतया तनौ ॥ १४१ ॥

वृषभाङ्को धनूराशिर्ध्मातरुक्मसमाङ्गरुक् । छत्राकारशिरा जानुलम्बबाहुर्महाशयः ॥ १४२ ॥
नीलोत्पलाभनिःश्वासो, जातजातिस्मृतिः प्रभुः । कान्तिभिर्बुद्धिभिस्तेषु मनुष्येष्वधिकोऽभवत् ॥१४३॥ (चतुर्भिः सम्बन्धः)
अकालमृत्युराद्योऽभूद् बालस्तालफलाहतः । कन्या कुलकृता पत्नी, वृषभस्येति रक्षिता ॥ १४४ ॥
भोगयोग्यं विभुं ज्ञात्वा, हरिरेत्य वरक्रियाम् । देव्यो वधूक्रियां चक्रुः, सुमङ्गला–सुनन्दयोः ॥ १४५ ॥
प्रभोः षट्पूर्वलक्षेषु, युग्मयुग्मं गतेष्वभूत् । क्रमेण भरत-ब्राह्म्यौ, सौनन्देयश्च सुन्दरी ॥ १४६ ॥
पराण्येकोनपञ्चाशतमसूत सुमङ्गला । युग्मान्यतिक्रमे नीतेः कथनं वृषभस्य च ॥ १४७ ॥
दण्डं करोति राजेति, शिष्टं ते प्रोचुरस्तु सः । ब्रूध्वं कुलकृतं सोऽवगस्तु वो वृषभः प्रभुः ॥ १४८ ॥
समयज्ञः समेत्येन्द्रो, राज्यस्नात्रमसूत्रयत् । राजार्हमुकुटादींश्चालङ्कारान् न्यस्तवांस्तनौ ॥ १४९ ॥
राज्यस्नात्रकृते नीरमानीय नलीनीदलैः । युग्मिनोऽप्यागता नाथं, ददृशुर्भूषितं भृशम् ॥ १५० ॥
माऽपत् क्लेदमिदं वस्त्राद्यर्च्यत्वात् प्रभुपादयोः । चक्रुः पत्राम्बुभिः पूजां, शिक्षयेत् कः सतां नयम् ? ॥ १५१ ॥
विनीताः साध्वमी मर्त्या, इतीन्द्रोऽन्वर्थसूचकाम् । स्थापनां तु विनीतायाः पुर्यास्तस्यां भुवि व्यधात् ॥ १५२ ॥
कुञ्जराश्व–गवादीनां, राज्यार्थं सङ्ग्रहोऽभवत् । तथोग्र–भोग–राजन्य–क्षत्रियाणां क्रमोऽपि च ॥ १५३ ॥
आरक्षकार्यमित्राणि, जज्ञिरे क्षत्रियाः परे । इत्यादिसङ्ग्रहं कृत्वा, साम्राज्यं बुभुजे विभुः ॥ १५४ ॥
कन्द–मूल–दलाहारास्तथा पुष्प–फलाशिनः । बभूवुर्मनुजा नाभिसूनुः कुलकरो यदा ॥ १५५ ॥
आसन्भिक्षुभुजः पूर्वं, स्मृत्येनेक्ष्वाकवो क्षमी । शणसप्तदशं सस्यं, भुञ्जते चाममेव ते ॥ १५६ ॥

तस्मिन्नजीर्यमाणेऽन्ने, युग्मिनः प्रभुमैयरुः । प्रभुणाऽभाणि भुञ्जीर्ध्वं घृष्ट्वा हस्तेन निस्तुषम् ॥ १५७ ॥
न जीर्यति तथाप्येतत् ततस्तेऽस्य पभूक्तितः । घर्षणं तीमनं हस्तदोर्मूले तापनं न्यधुः ॥ १५८ ॥
कालस्य मध्यमत्वेनोत्पेदेऽग्निर्वृक्षघर्षतः । भुञ्जतां पक्वमन्नाम्भं, ज्ञानात् ज्ञात्वाऽऽह तान् प्रभुः ॥ १५९ ॥
प्रक्षेप्य दाहाम्भौषध्या गजारूढप्रभोः पुरः । युग्मिनः प्राहुरस्मभ्यं, ददाति स न किञ्चन ॥ १६० ॥
विज्ञायावसरं स्वामी, तानाहाऽऽनीयतां हि मृत् । तदादौ तं गजेन्द्रस्य, कुम्भं कुम्भस्थलेऽकरोत् ॥ १६१ ॥
कृत्वा प्रत्याह तानेष, स्थानान्येतादृशानि भोः ! । निर्माय पक्वमन्नान्नं, भुञ्जतां तनुपुष्टये ॥ १६२ ॥
एवं लोह–घट–क्षौर–चित्रचीवरकारिणाम् । शिल्पान्येकस्य चैकस्य, विंशतिर्विंशतिर्भिदः ॥ १६३ ॥
कर्माणि कृषिवाणिज्यादीनि लोकाय चादिशत् । कर्मानाचार्यकं शिल्पं, स्यादाचार्योपदेशजम् ॥ १६४ ॥
ब्राह्मया दक्षिणहस्तेनाशिक्षयताक्षरावलीम् । सुन्दर्या वामहस्तेन, गणिताङ्कांश्च नाभिभूः ॥ १६५ ॥
चतुःषष्टिर्गुणान् स्त्रीणां, रूपं कर्म तथार्षभेः । बाहुबलेर्लक्षणानि, नरादीनामदर्शयत् ॥ १६६ ॥
तांस्तन्नामानुगे देशे, पुत्रान् राज्ये न्यवीविशत । सर्वलोकोपकाराय, यज्जन्माद्यार्हतां भवेत् ॥ १६७ ॥
त्रिषष्ठिं पूर्वलक्षाणि, राज्यं पालयतोऽत्यगुः । ईयुर्लोकान्तिका देवाः, कल्पतः कल्पतस्त्वथ ॥ १६८ ॥
जय त्वं नन्द भ॑ ते, क्षत्रियवृषभास्तु ते । धर्मेऽविघ्नं धर्मतीर्थं, तीर्थनाथ ! प्रवर्त्तय ॥ १६९ ॥
बोधयन्तीत्यादिवाग्भिः, स्वयम्बुद्धमपि प्रभुम् । वन्दिनः प्रातराशीर्भिर्जागरूकमिवाधिपम् ॥ १७० ॥
प्रारेभे वार्षिकं दातुं, धनदानीतशेवधेः । ईप्सितं दानमर्थिभ्यः, स्वयमाबालभोजनम् ॥ १७१ ॥

त्रीणि कोटिशतान्यष्टाशीतिकोटीः करार्पितम् । साशीतिलक्षका वर्षे, दानमेतज्जगद्गुरोः ॥ १७२ ॥
अथो चैत्रासिताष्टम्यां, षष्ठेनाऽह्नोऽन्तिमेंऽशके । शिबिकां सुदर्शनाख्यां, त्यक्त्वा सिद्धार्थकानने ॥ १७३ ॥
चतुःसहस्रैर्भूपानां, सहाशोकतरोस्तले । देवदूष्यधरो धीरः, प्राव्राजीद् वृजिनोज्झितः ॥ १७४ ॥ युग्मम् ॥
चतुःसहस्राः कच्छाद्या, लोचं कृत्वा स्वयं नृपाः । करिष्यति यथा नाथः, करिष्यामो वयं तथा ॥ १७५ ॥
इति ध्यात्वाऽन्वगुनर्शिं, व्युत्सृष्ट–त्यक्तविग्रहः । पुरं ग्राममनुग्रामं विजहारेशिताऽपि हि ॥ १७६ ॥
न जानाति जनो भिक्षा, का ? के भिक्षाचरा ? इति । कच्छाद्या अलभमानास्तां, बभूवुस्तापसा वने ॥ १७७ ॥
नमिविनमिरागत्याऽऽहतुरत्रान्तरे प्रभो ! । चारित्रावसरे प्राप्तमावाभ्यां किञ्चिदेव न ॥ १७८ ॥
इदानीमपि तद् देहीत्युक्त्वा सेवां प्रचक्रतुः । कायोत्सर्गस्थभूशुद्धि–पयःसेकादिभिर्भृशम् ॥ १७९ ॥
धरणेन्द्रोऽन्यदाऽऽयातो, वन्दितुं तौ तथास्थितौ । वीक्ष्याह कथमर्हन्तं, सेवाथे ? स्वार्थमाहतुः ॥ १८० ॥
नीरागोऽयं महाभागो, निग्रहानुग्रहौ न च । कुरुते युवयोरेतद् राज्यं ददे मनोहरम् ॥ १८१ ॥
पुरान् पञ्चाशतं षष्टिं, वैताढ्ये दक्षिणोत्तरे । संस्थाप्य स्थीयतां श्रेणौ, सुखेनेत्याह नागराट् ॥ १८२ ॥
अष्टाचत्वारिंशद् विद्यासहस्रान् स तयोर्ददौ । महतां पादसेवा हि, सत्या सत्यं फलेग्रहिः ॥ १८३ ॥
स्वामिभक्तिफलं स्वस्य, दर्शयन्तौ पितॄन् प्रति । तौ परिच्छदमादाय, सद्यो वैताढ्यमीयतुः ॥ १८४ ॥
वर्षं यावन्निराहारो, दैन्यहीनः प्रभुर्भ्रमन् । वस्त्राभरण–कन्याभिश्छत्राद्यैश्च निमन्त्र्यते ॥ १८५ ॥
क्रमाद् गजपुरं प्रासो, वर्षान्ते विहरन् प्रभुः । यत्र बाहुबलेः पौत्रः, सोमप्रभनृपाङ्गजः ॥ १८६ ॥

श्रीश्रेयांसकुमारः सोऽद्राक्षीत् स्वप्ने सुराचलम् । श्यामलं तं पुनर्दीप्तं, धौतं पीयूषभृद्घटैः ॥ १८७ ॥
सुबुद्धिश्रेष्ठयप्यैक्षिष्ट, सूर्यं स्थानाच्च्युतं ततः । आरोपितं कुमारेण, सोमप्रभनृपोऽप्यमुम् ॥ १८८ ॥
पुमानेको महाकायः, परानीकपराजितः । कुमारकृतसाहाय्यः, स्वस्थोऽभूत् सुतरामसौ ॥ १८९ ॥
आस्थाने तेऽमिलन् स्वप्नं, शशंसुः स्वं स्वमीक्षितम् । न जाने परमस्याद्य, लाभो भावीति राड् जगौ ॥ १९० ॥
श्रुत्वेत्युत्थाय श्रेयांसः, स्वगवाक्षमशिश्रयत् । प्रभुं गोचरचर्यायां, भ्रमन्तं वीक्ष्य दध्यिवान् ॥ १९१ ॥
मूर्च्छितो लब्धचैतन्यो, जातिस्मृतिमवाप्तवान् । स्मृतदानविधिः पूर्वाभ्यासाद् गेहादवातरत् ॥ १९२ ॥
तावद् गेहाङ्गणं प्रासः, कल्पद्रुर्जङ्गमः प्रभुः । कुमारप्राग्भवाचीर्णपुण्यनुन्नः प्रसन्नदृक् ॥ १९३ ॥
तदोपदागतेनेक्षुरसेन प्रत्यलाभयत् । भगवान् पाणिपात्रेण, निर्दोषं तमपारयत् ॥ १९४ ॥ (त्रिभिः सम्बन्धः)
रत्नवृष्टिरहोदानोद्घोषो दुन्दुभिवादनम् । चेलोत्क्षेपः सुरापातः, पञ्च दिव्यानि जज्ञिरे ॥ १९५ ॥
प्रभुणाऽपारि यैः पादैस्तत्र पीठमचीकरत् । जनो मा क्रामति पदैरित्यवज्ञाऽऽस्पदच्छिदे ॥ १९६ ॥
अपूपुजत् स तच्छश्वदेवं प्रभुरपारयत् । यत्र तत्र जनः पीठं, चक्रे प्रावाहिको हि सः ॥ १९७ ॥
तदर्कमण्डलमिति, ख्यातं कालेऽर्चितं जनैः । प्रभुस्तक्षशिलापुर्यां, विहरन्नन्यदा ययौ ॥ १९८ ॥
निवेदनं बाहुबलेर्यास्यामीत्यतिविस्तरात् । विजहार प्रभुः प्रातर्ह्यनियतस्थितिरीदृशाम् ॥ १९९ ॥
प्राप्तः प्रातः शुचा क्रान्तो, मा शोचीर्मन्त्र्यवक् प्रभो ! । अर्च्यत्वात् पादयोस्तीर्थं, धर्मचक्रं कुरु त्विह ॥ २०० ॥
बहली–सुवर्ण–भूम्यादिदेशेषु भ्रमताऽर्हता । प्रापुर्भद्रकतां केचित्, म्लेच्छा अप्यनुशिक्षिताः ॥ २०१ ॥

आद्यस्तीर्थकृतां वर्षसहस्रं मौनमुद्रया । विहृत्यानुपसर्गेण, पुरे पुरिमतालके ॥ २०२ ॥
शकटास्यवने कृष्णैकादश्यां फाल्गुनस्य च । पूर्वाह्णे वटवृक्षाधोऽष्टमेन प्राप केवलम् ॥ २०३ ॥ युग्मम्
चक्रुश्चतुर्विधाश्चैत्य धर्मसद्म दिवौकसः । पुर्यन्तः शस्त्रशालायां, चक्रस्योत्पत्तिरप्यभूत् ॥ २०४ ॥
आर्पभेरागता वर्द्धापनिका युगपद् द्वयोः । प्राक् पूजयामि किं चक्रं ? तातं वा ? ह्यचिन्तयत् ॥ २०५ ॥
धिग् धिग् मां कदभिप्रायं, यच्चक्रमिहलौकिकम् । ताते हि पूजिते चक्रं स्वयमेवार्चितं भवेत् ॥ २०६ ॥
इतश्च प्राग् विभोर्दीक्षादानदूनमना मनाक् । त्वमूर्जस्वलसाम्राज्यश्रियं श्रयसि मत्सुतः ॥ २०७ ॥
वने वनेचर इवैकाकी भ्रमति नित्यशः । मरुदेवाऽङ्गजस्नेहाद्, भरतस्योक्तवत्यभूत् ॥ २०८ ॥ युग्मम् ॥
निजाङ्गजस्य जननि ! श्रियं पश्यैत्य साम्प्रतम् । इत्युक्त्वा सिन्धुरस्कन्धे, तामारोप्याग्रतोऽचलत् ॥ २०९ ॥
शोकध्यामलनेत्राया, दृष्टिरुद्घटिता द्विधा । छत्रातिछत्रं पश्यन्त्या मरुदेव्या विभोस्तदा ॥ २१० ॥
उत्पन्नकेवला पूर्णायुष्का मोक्षमगाच्च सा । सिद्धः प्रथम इत्यस्याश्चक्रेऽर्चा निर्जरैस्तनोः ॥ २११ ॥
जगाम भरतो धर्मसद्मार्हद्धर्मदेशनाम् । निशम्य सम्यगादत्त, श्रावकद्वादशव्रतीम् ॥ २१२ ॥
ऋषभसेन-मरीचिमुख्याः पञ्चशती सुताः । सप्ताऽऽर्षभेः पौत्रशती जगृहुर्ब्राह्म्यपि व्रतम् ॥ २१३ ॥
सुन्दर्या वारणं चक्रे, चक्री स्त्रीरत्नमित्यतः । पूर्वाप्तगणभृद्गोत्रो, गणभृद्वृषभोऽभवत् ॥ २१४ ॥
पुण्डरीकाख्यया ख्यातस्तथाऽन्ये गणधारिणः । स्थापिताश्चतुरशीतिः, स्वहस्तेनाऽऽदिमाऽर्हता ॥ २१५ ॥
सहस्राश्चतुरशीतिः, साधूनां सर्वसंख्यया । लक्षत्रयं तु साध्वीनामजिह्मब्रह्मवर्चसाम् ॥ २१६ ॥

लक्षपञ्चकम् ॥ २१७ ॥
श्रावकाणां तिस्रो लक्षाः, सहस्राः पञ्च चाभवन् । श्राद्धीनां चतुःपञ्चाशत्सहस्रा लक्षपञ्चकम् ॥ २१८ ॥
सहस्राः पञ्च पादोनाः स्युश्चतुर्दशपूर्विणाम् । ते विंशतिः केवलिनामवधिज्ञानिनां नव ॥ २१९ ॥
षट्शती वैक्रियवतां, विस्तीर्णमति-वादिनाम् । सार्द्धानि षट् शतानि स्युः, सहस्रा द्वादश क्रमात् ॥ २२० ॥
द्वाविंशतिसहस्राः स्युरनुत्तरोपपातिनाम् । शतानि नव चेत्येष, विशेषोऽर्हत्परिग्रहे ॥ २२१ ॥
आर्षभिर्भरतक्षेत्रं, साधयित्वाऽखिलं बलात् । षष्टिवर्षसहस्रेण, निजं पत्तनमीयिवान् ॥ २२२ ॥
चक्रे चक्रित्वाभिषेकोऽस्य भूपैर्द्वादशाब्दिकः । बन्धून् सर्वांश्च सस्मार, भ्रातॄंस्तत्राप्यनागतान् ॥ २२३ ॥
ततो दूतमुखेनाऽऽहाष्टानवत्यनुजन्मनः । समेत्य भ्रातरः सेवां, कुर्वन्तु मम साम्प्रतम् ॥ २२४ ॥
तेऽपि तद्वचसा क्रुद्धा, दण्डस्पृष्टा इवोरगाः । दध्युः कथमनात्मज्ञः, सोऽस्मान् हा ! सेवकीयति ? ॥ २२५ ॥
पितरं राज्यदातारं, पृच्छामस्तदुपास्तये । ध्यात्वेति सर्वे सम्भूय, सम्प्रापुः पितुरन्तिकम् ॥ २२६ ॥
प्रभुणाऽभाणि भो भद्राः !, अनुत्तरसुरेष्वलम् । पूर्वं स्मरत यद् भुक्तं, सुखं विषयनिस्तुषम् ॥ २२७ ॥
तुच्छासारैः सुखैरेभिः, कियतीं तृप्तिमाप्स्यथ । अङ्गारकारकस्येव ?, कोऽसावीशेति कथ्यताम् ॥ २२८ ॥
प्रभुराह पुरा कश्चिद् दृतिमात्रपयाः पुमान् । जगामाङ्गारकान् कर्त्तुं, दृष्टकाष्ठाकुले वने ॥ २२९ ॥
ग्रीष्मातिरेकतः सूर्य-वह्नितापात् तृषार्दितः । पीत्वा पयोऽखिलं सोऽगाद् वेगाद्, गेहं मुमूर्च्छ च ॥ २३० ॥
स्वप्ने पयः पयोराशि-नदी-कूप-नदोद्भवम् । पीत्वाऽप्यतृप्तो जीर्णैकमनूपं कूपमैक्षत ॥ २३१ ॥
तृणपूलकलग्नाम्बुबिन्दून लिहन् स जिह्वया । कथं तृप्यति भो भद्राः ! ?, भवन्तोऽप्येवमेव हि ॥

तथा सूत्रकृतो वैतालिकाध्ययनदेशनात् । प्रबुद्धा जगृहुर्दीक्षां, शान्तो हि सफलोद्गमाः ॥ २३२ ॥
चक्री चक्रमथादाय, विनीतायामुपागतः । चक्राप्रविशने हेतुं, पुनः पप्रच्छ मन्त्रिणः ॥ २३३ ॥
तेऽप्याहुरजिते शत्रावेकस्मिन् प्रविशेन्न तत् । कथमस्त्यजितः कोऽप्याप्याहुर्बाहुबलीति ते ॥ २३४ ॥
ततो दूतं सुवेगाख्यं, प्राहिणोदनुजन्मने । सोऽपि गत्वा जगादैवं, त्वामाह्वयति चक्रभृत् ॥ २३५ ॥
किमर्थमात्मसेवायै, बली बाहुबली जगौ । आः पापं ! स च पापीयानियतापि न तृप्यति ॥ २३६ ॥
मत्तो मत्तोऽपि शुश्रूषां, सिंहान्मृग इवेहते । जानाति स यथा पूर्वे, ग्राहिता भ्रातरो व्रतम् ॥ २३७ ॥
तथैनं ग्राहयिष्यामि तव भीपिक्रयेति तत् । ते कपित्था न चाल्यन्ते, मरुता ये परे वयम् ॥ २३८ ॥
सावष्टम्भमभाषिष्टित्येवं दूतपुरो वचः । उपेक्षितोऽसि दूतत्वाद् याहि, याहि म्रियस्व मा ॥ २३९ ॥
वक्तव्यं स्वप्रभोरग्रे, मा कार्षीर्बहलीपतेः । आशां स्वप्नेऽपि सेवाया, युद्धश्रद्धा यदैहि तत् ॥ २४० ॥
सर्वं तदुक्तमेत्याख्यद् दूतश्चक्रिण आनतः । सोऽपि कोपप्रकोपेण, यात्राभम्भामवादयत् ॥ २४१ ॥
चतुरङ्गचमूचक्राक्रान्तभूर्भरतेश्वरः । बहल्या एत्य सीमानं, तस्थौ स्वस्थमना मनाक् ॥ २४२ ॥
तमागतं निशम्य प्राग्, बलिष्ठो बहलीपतिः । स्वपुर्या निर्ययौ वर्यतूर्यैस्सूचितदोर्जयः ॥ २४३ ॥
रणकण्डूलदोर्दण्डा, अवतेरू रणाङ्गणे । स्वस्वेशवर्द्धि[विहि]तोत्साहा, योद्धारः सैन्ययोर्द्वयोः ॥ २४४ ॥
आर्षभिर्जनसंहारं, वीक्ष्योचे चक्रवर्त्तिनम् । कथं निरपराधानां वधो बन्धो ! विधीयते ? ॥ २४५ ॥
मिथोऽस्ति ह्यावयोर्वैरं, तेनान्योन्यं रणोऽस्तु नौ । चक्रिणाऽप्यनुमेने तदेकैव सुधियां हि धीः ॥ २४६ ॥

ततो योद्धुं प्रवृत्तौ तौ, गजाविव मदोत्कटौ । जितः सर्वत्र तेनासौ, दृग्–वाग्–दोर्दण्ड–मुष्टिषु ॥ २४७ ॥
त्रपयाऽधोमुखश्चक्री, सौनन्देयेन जल्पितम् । किञ्चिद् विनष्टं नाद्यापि, याहि भुङ्क्ष्व निजां श्रियम् ॥ २४८ ॥
ज्वलंस्तयाऽधिकं वाचा, घृतसिक्त इवानलः । चक्री योद्धुमढौकिष्ट, धिगन्धकरणं क्रुधम् ॥ २४९ ॥
तस्य मुक्तानि शस्त्राणि, बहलीशे वृथाऽभवन् । वज्रासारगिरौ दन्तप्रहारा इव दन्तिनः ॥ २५०॥
कथं चक्रीत्यसौ चित्ते, सन्दिहानस्य चक्रिणः । विद्युदुद्योतवद् दीप्रं, चक्रं करमशिश्रयत् ॥ २५१ ॥
तदाप्य हृष्टतुष्टात्मा निधानमिव निर्द्धनः । प्राह बाहुबलिन् ! याहि, भ्रातृघातकपातकम् ॥ २५२ ॥
मा देहि भुङ्क्ष्व साम्राज्यं, स्वीकृत्याज्ञां परं मम । पश्चात् पश्चात्तापमाप्स्यसीति चेतसि चिन्तय ॥ २५३ ॥ युग्मम्
स्मित्वेषदार्षभिः प्रोचे, क्रोधान्धो धरणीधवम् । मुग्ध ! दुग्धमुखास्माकं, मा दर्शय विभीषिकाम् ॥ २५४ ॥
मुञ्चामुं लोहखण्डं स्वं, खण्डीकुर्वे स्वमुष्टिना । सोऽमुचच्चक्रमित्युक्ते, हाहारवपरे जने ॥ २५५ ॥
गोत्रे प्रभवतीदं नो, स्पृष्ट्वोरःस्थलमार्षभेः । पश्चादागत्य हस्तस्थं तदभूच्चक्रवर्त्तिनः ॥ २५६ ॥
सचक्रं चूर्णयाम्येनं, मुष्टिमुत्पाट्य धावितः । अत्रान्तरेऽन्तरायाय, बभूव भवितव्यता ॥ २५७ ॥
आः ! पापारम्भसंरम्भः, कोऽयं मे साधुगर्हितः ? । स्मृत्वेति सद्भिरारब्धं, नान्यथेति स्वमुष्टिना ॥ २५८ ॥
उत्पाट्य स्वशिरःकेशान्, क्लेशानिव महाव्रती । व्रतमादाय तत्रास्थान्मानी प्रतिमयाऽऽर्षभिः॥२५९॥ (त्रिभिः सम्बन्धः)
मुक्त्वा मानं नतश्चक्री, मा मुञ्चैकाकिनं च माम् । इत्युक्तोऽप्यब्रवीन्नासौ, मेरुवद् ध्याननिश्चलः ॥२६०॥
ततस्तदङ्गजन्यस्तराज्यश्चक्री गृहं गतः । बुभुजे चक्रिणो भोगानेकच्छत्रां विधाय गाम् ॥ २६१ ॥

वर्षान्ते भाषिते ब्राह्मी–सुन्दर्यौ नाभिजन्मना । भवतीभ्यां वचो वाच्यं, गत्वाऽदो बहलीपतेः ॥ २६२ ॥
गजादवतरेतीशादेशमासाद्य ते गते । व्याप्तं वल्लीवितानेन, पश्यतः स्म न तं वने ॥ २६३ ॥
पश्चादेत्य प्रभोरग्रेऽथाहतुस्तत्र नो मुनिः । आस्ते तत्रैव सेत्युक्ते, ते गत्वोचतुरुच्चकैः ॥ २६४ ॥
गजादवतर भ्रातः !, तत्रस्थस्य न केवलम् । दध्यौ बाहुबली साध्व्यौ, कथं कथयतो मृषा ? ॥ २६५ ॥
सर्वसङ्गपरित्यागवतो मे क्वाऽस्ति कुञ्जरः ? कुत्रत्यस्तु तदारोहः ? सीमा ग्रामं विना कुतः ? ॥ २६६ ॥
ज्ञातं मानगजारूढं धिग् मां दुश्चिन्तिताग्रिमम् । वन्देऽथापि लघून् भ्रातॄनित्युक्त्वोत्पाटितः क्रमः ॥ २६७ ॥
तदा केवलमुत्पेदे, गत्वाऽर्हद्धर्मसद्मनि । स नमस्तीर्थायेत्युक्त्वाऽऽसीनः केवलिपर्षदि ॥ २६८ ॥
अथान्यदाऽऽर्षभिर्मृत्वाऽनांसि भूयांसि संस्कृतैः । भोज्यैर्न्यमन्त्रयद् भ्रातॄन्, क्षमाश्रमणपूर्वकम् ॥ २६९ ॥
प्रभुरप्यभ्यधादभ्याहृताधाकर्मदूषितः । राजराज ! राजपिण्डोऽप्यकल्प्योऽयं महात्मनाम् ॥ २७० ॥
तातेन सर्वथा त्यक्त इति दुःखार्त्त आर्षभौ । अत्रान्तरेऽवग्रहाणां, स्वरूपं पृष्टवान् हरिः ॥ २७१ ॥
कियन्तोऽवग्रहाः स्वामिंस्ते च पञ्चेत्यवक् प्रभुः । इन्द्र–राड्–गृहपत्याद्या, वज्र्याह सोऽर्पितो मया ॥ २७२ ॥
विश्राणितो मयाऽप्येप इत्याख्यद् भरतप्रभुः । स्वेच्छया साधवः सर्वे, मद्भूमौ विहरन्त्यथ ॥ २७३ ॥
दर्शिता मौलरूपस्य, शक्रेण चक्रिणोऽङ्गुली । अष्टाह्निकामहस्तेने, तेन सेन्द्रोत्सवोऽभवत् ॥ २७४ ॥
अनादानेन चान्नस्य, रिवद्यमानं नरेश्वरम् । वीक्ष्योचे वासवश्चक्रिन् !, पूजयस्व गुणाधिकान् ॥ २७५ ॥
स दध्यौ ते तु मुनयः आ ! ज्ञातं श्रावका अपि । वसनैरशनैश्चापि, तेनैतानर्चयाम्यहम् ॥ २७६ ॥

ततो भोजयितुं लग्नश्चतुर्वेदार्थवेदिनः । अतिभूयस्त्वतः सूदाः, सादादूचुरथैत्य तम् ॥ २७७ ॥
निर्वहत्यधिकारोऽयमस्माभिर्नेश ! साम्प्रतम् । तन्निशम्य तदाकार्य, चक्री पप्रच्छ तानिति ॥ २७८ ॥
को देवः ? को गुरुर्धर्मः ?, को वस्तद्वेदिनां पुनः(रः) । रत्नत्रयाङ्कं काकिन्या, चक्री रेखात्रयं व्यधात् ॥ २७९ ॥
षष्ठे षष्ठे पुनर्मासे तत्त्रिकप्रश्नपूर्वकम् । स्थाप्यन्ते तेऽपि तत्पङ्क्तौ, न दम्भो महतां हृदि ॥ २८० ॥
जितो भवान् वर्द्धते भीस्तस्मान्मा हन मा हन । प्रमत्तं नृपमित्युक्त्वा, बोधयन्तीति तत्स्थितिः ॥ २८१॥
एवं तदन्वये भूपैः, पाश्चात्यैः पूजिताश्च ते । अभिज्ञानाय रुक्मादियज्ञोपवीतदायिभिः ॥ २८२ ॥
कालान्तरे बभूवुस्ते, सद्गुरूणामभावतः । विपर्यस्तधियो विप्राः, स्युः कियन्त्यो गुरून् विना ? ॥ २८३ ॥
भगवानादिदेवोऽथ, विहृत्य चिरमुर्वराम् । भारतान्यतरैकोनशतपुत्रैस्तथाऽष्टभिः ॥ २८४ ॥
पौत्रैश्च सममेकेन, समयेनाऽऽयुषः क्षयात् । सिद्धिसौधाग्रमध्यास्त, प्रसिद्धाष्टापदाचले ॥ २८५ ॥ युग्मम्
तत्र वर्धकिरत्नेन, चक्री चैत्यमचीकरत् । मानाद्युपेताः प्रतिमाश्चतुर्विंशतिरर्हताम् ॥ २८६ ॥
साधर्मिकाणां वात्सल्यं, कुर्वतोऽर्चयतोऽस्य ताः । व्यणीयुरेकसम्राजः, पूर्वाणीत्थं कियन्त्यपि ॥ २८७ ॥
अन्यदाऽऽदर्शगेहान्तः, स्वं रूपमवलोकयन् । आससादाविषादेन, परमानन्दसम्पदम् ॥ २८८ ॥
पपाताथ ठ(ट)णत्कारादङ्गुलीतोऽङ्गुलीयकम् । तां विलोक्य गतश्रीकां, लूनपुष्पां लतामिव (इव स्रजम्) ॥ २८९ ॥
क्रमान्मुमोच सर्वस्मादङ्गादाभरणान्यसौ । काष्ठशेषं वृक्षमिवात्मानं वीक्ष्य व्यचिन्तयत् ॥ २९० ॥
अहो ! आगन्तुकैरेभिर्भूषणैर्भूष्यतेऽङ्गकम् । नामुष्य मुख्यवृत्त्याऽस्ति, किञ्चित् प्रेमानुबन्धनम् ॥ २९१ ॥

इत्युग्रभावनायोगाद् भगवान् भरतेश्वरः । आरुह्य क्षपकश्रेणीमाप निष्पापकेवलम् ॥ २९२ ॥
विधिनाऽवधिना ज्ञात्वा, हरिरेत्य तमब्रवीत् । गृहाण यतिनो लिङ्गं, कुर्मस्ते केवलोत्सवम् ॥ २९३ ॥
आत्तलिङ्गश्चिरं पृथ्वीं, विहृत्याऽऽर्षभिकेवली । आससाद महानन्दपदमष्टापदाचले ॥ २९४ ॥
इति चरितमुदारं श्रीयुगादीश्वरस्य, निजहृदि परिभाव्य प्रीतिभाजो भवेयुः ।
जगति मदनजेतुर्धर्मकर्मैकहेतु, प्रकटितजननीतेस्त्यक्तसंसारभीतेः ॥ १५९ ॥

इति श्री मुद्रितऋषिमण्डलप्रकरणवृत्ति पृष्ठाङ्क १-१० तः उद्धृतं

इति श्री ऋषभदेवचरित्रम् संपूर्णम्

२ देवाधिदेवतीर्थंकर—श्री शान्तीनाथजिनचरित्रम्

अथ मेघरथश्च्युत्वा, जम्बुद्वीपेऽत्र भारते । श्रीहस्तिनापुरे विश्वसेनराज्ञः प्रियाऽचिरा ॥ १ ॥
नभस्यकृष्णसप्तम्यां, तस्याः कुक्षौ सुतत्वतः । चतुर्दशमहास्वप्नसूचितश्चोदपद्यत ॥ २ ॥ युग्मम् ॥
साधिकान् नवमा (नव मासांश्च) सान् सा, कुक्षौ धृत्वेन्द्रसंस्तुतम् । ज्येष्ठकृष्णत्रयोदश्यां, सुषुवेऽर्द्धनिशि प्रभुम् (सुतम्) ३
ततश्च दिक्कुमारीभिः, सूतिकर्मास्य निर्ममे । जन्माभिषेकः स्वर्णाद्रौ सर्वैरिन्द्रैरपि क्रमात् ॥ ४ ॥
गर्भस्थेऽस्मिन् रुजः शान्तिर्जातेति जनकः प्रभोः। सवर्द्धापनकं नाम, यथार्थं शान्तिरित्यदात् (हि शान्तीत्यदात्) ५

क्रमेण प्राप्ततारुण्यं, जातपाणिग्रहोत्सवम् । शान्ति न्यस्याङ्गजं राज्ये, पार्थिवोऽशिश्रयद् व्रतम् ॥ ६ ॥
चतुर्दशभिरुत्पन्नै रत्नैर्भरतभूतलम् । प्रसाध्य बुभुजे भोगान्, श्रीशान्तिश्चक्रिणश्चिरम् ॥ ७ ॥
स्वयम्बुद्धोऽपि लोकान्तिकैः (क-) सुरैरेत्य बोधितः । भव्योर्वी दानधाराभिरावर्षमभिवृष्य च ॥ ८ ॥
ज्येष्ठकृष्णचतुर्दश्यां, विहाय तृणमुष्टिवत् । चक्रिभोगानुपादत्त, प्रव्रज्यां परमेश्वरः ॥ ९ ॥ युग्मम् ॥
चतुर्ज्ञानी विहारेणोद्यतेन विहरन् विभुः । पौषशुद्धनवम्यह्नि, केवलज्ञानमाप सः ॥ १० ॥
देवैर्धर्मगृहं चक्रे, प्रभुणा धर्मदेशना । प्रबुद्धाः प्राणिनोऽनेकेऽभूवन् गणभृतोऽपि च ॥ ११ ॥
क्रमेण क्षीणकर्मांशो, विहृत्य चिरमुर्वराम् । ज्येष्ठकृष्णत्रयोदश्यां, सम्मेतेऽशिश्रयच्छिवम् ॥ १२ ॥
बाल्य–मण्डलि–चक्रित्व–श्रामण्येष्वभवन् क्रमात् । पृथक् पृथक् सहस्राणि, वर्षाणां पञ्चविंशतिः ॥ १३ ॥
वर्षलक्षमतिवाह्य यः प्रभुः, सर्वमायुरनु मोक्षमासदत् । सोऽस्तु शस्तकृदपास्तपाप्मनां, वासवस्तवनगोचरीकृतः ॥१४॥

इति श्री मुद्रितऋषिमण्डलवृत्ति पृष्ठाङ्क २९ तः उद्धृतं

इति श्री शांतिजिनचरित्रम् संपूर्णम्

३ देवाधिदेवतीर्थंकर–श्री कुन्थुनाथ चरित्रम्

श्रीहस्तिनापुरे सूर–श्रीदेव्योस्तनयोऽजनि । चतुर्दशाद्भुतस्वप्नसूचितात्यन्तिकोदयः ॥ १ ॥

कुस्थो(न्थो)रत्नमयः स्तूपः, कुन्थुवद् वीक्षिताः परे । गर्भस्थेऽस्मिन् जनन्येति कुन्थु राख्यां पिताऽतनोत् ॥ २ ॥
क्रमेण प्राप्ततारुण्यं, जापामाणिग्रहोत्सवम् ।। कुन्थुं न्यस्याङ्गजं राज्ये, सूरराड् व्रतमात्तवान् ॥ ३ ॥
चतुर्दशभिरुत्पन्नै रत्नैर्भरतभूतलम् । प्रसाध्य बुभुजे भोगान्, श्रीकुन्थुश्चक्रिणश्चिरम् ॥ ४ ॥
स्वयम्बुद्धोऽपि लोकान्तिकैः सुरैरेत्य बोधितः । भव्योर्वी दानधाराभिरावर्पमभिवृष्य च ॥ ५ ॥
वैशाखकृष्णपञ्चम्यां. विहाय तुपमुष्टिवत् । चक्रिभोगानुपादत्त, प्रव्रज्यां परमेश्वरः ॥ ६ ॥
चतुर्ज्ञानी विहारेणोद्यतेन विहरन् विभुः । प्रान्ते पोडशवर्षाणां, केवलज्ञानमासदत् ॥ ७ ॥
देवैर्धर्मगृहं चक्रेऽर्हता धर्मदेशना । प्रबुद्धाः प्राणिनोऽनेकेऽभूवन् गणभृतोऽपि च ॥ ८ ॥
क्रमेण क्षीणकर्मांशो, विहृत्य चिरमुर्वराम् । राधाकृष्णप्रतिपदि, सम्मेतेऽशिश्रयच्छिवम् ॥ ९ ॥
बाल्य–भण्डलि–चक्रित्व–श्रामण्येष्वभवन् समाः । त्रयोविंशसहस्राणि, सार्द्धसप्तशतानि च ॥ १० ॥

इति:श्री मुद्रितऋपिमण्डल वृति पृष्ठाङ्क. ३० तः उद्धृतं

इति श्री कुन्थुनाथचरित्रम् संपूर्णम्

४ देवाधिदेवतीर्थंकर–श्री पार्श्वनाथजिनचरित्रम्

जम्बूद्वीपे मेरुपार्श्वे, समभूतलपर्वतः। योजनानां नवसंख्यशतमध्ये ग्रहव्रजाः ॥ १ ॥
ततः परमसंख्याता, यौजन्यकोटिकोटयः । उल्लङ्घितेषु तेषूर्द्ध्वं सौधर्मेशानसद्दिवौ ॥ २ ॥

क्रमेण दशमः स्वर्गःप्राणताख्यः प्रसिद्धिभाक् । आयुषः संस्थितिस्तत्र सागराणां तु विंशतिः ॥ ३ ॥
तदायुषः स्थितिं भुक्त्वा कृत्वा देवभवक्षयम् । अच्युत् स्वर्गतस्तस्मात् पार्श्वजीवो महासुरः ॥ ४ ॥
जम्बूद्वीपो महाद्वीपो, लक्षयोजनविस्तृतः । परिधिस्तस्य विख्याता, सिद्धान्ते तां भणाम्यथ ॥ ५ ॥
परिही तिलक्खसोलससहस्सदोयसयसत्तवीसहिया । कोसतिगठ्ठावीसं धणुसयतेरंगुलद्धहियं ॥ ६ ॥
तत्र श्रीभरतक्षेत्रे भरिते भूरिभूतिभिः । पुरं वाराणसीसंज्ञं पुरन्दरपुरोपमम् ॥ ७ ॥
निशम्यते यत्र पुरे तु दण्डः, प्रासादशीर्षे न पुनः प्रजासु । विद्वज्जनानां मनसस्तु चौराः, श्रियाश्च चौरा नहि सन्ति केचित् ॥८॥
प्रासादमूर्द्धः कलशस्थले हि यत्रार्कबिम्बं प्रतिभाति नित्यम् । केतुस्थले स्वर्गनदी मनोज्ञा, किं वर्ण्यते वर्णनमेव तस्याः ॥९॥
अन्याय इति शब्दस्तु शास्त्रेषु, जनतासु नो दातारः प्रचुरा यत्र । याचकाः स्तोकमात्रकाः ॥ १० ॥
तत्राश्वसेनभूपालो, भूपालालिपुरःसरः । प्रजापालनसंसक्तो, राजते सार्वभौमवत् ॥ ११ ॥
रतिवच्चारुरूपाढ्या, सुपौलोमीव सुन्दरा । स्फारलावण्यसंपूर्णा, तिरस्कृततिलोत्तमा ॥ १२ ॥
वामा वामभ्रुवां मध्येऽभिरामा गुणराजिभिः । वामा राज्ञी बभौ तस्य, पट्टराज्ञी शुभाशया ॥ १३ ॥ [युग्मम्]
तस्याः कुक्षौ समुत्पेदे, श्रीपार्श्वपरमेश्वरः । राज्ञी ददर्श तद्रात्रौ स्वप्नानि च चतुर्दश ॥ १४ ॥
आद्यस्वप्ने गजो दृष्टो द्वितीये वृषभः शुभः । तृतीये केसरी सिंहो महालक्ष्मीश्चतुर्थके ॥ १५ ॥
पञ्चमे पुष्पमाला च, षष्ठे स्वप्ने हिमद्युतिः । सप्तमे सविता दृष्टो, ध्वजा दृष्टाऽष्टमे तया ॥ १६ ॥
नवमे कलशः पद्मसर–स्तु दशमे तथा । एकादशे पयःसिन्धुर्द्वादशे सुरमन्दिरम् ॥ १७ ॥

त्रयोदशे रत्नराशि–र्निर्धूमाग्निश्चतुर्दशे । स्वप्नान्येतानि दृष्ट्वा, चाजागरत् सा स्वयं तदा ॥ १८ ॥
प्रभोर् मनसि स्वप्नान् , तान् सस्मार पुनः पुनः । जिनानां गोत्रदेवीनां नामानि, समुपाददे ॥१९ ॥
समुत्थाय ततः स्थानात् विचरन्ती शनैः शनैः । श्रीअश्वसेनभूभर्तुः, समीपे सा समागमत् ॥ २० ॥
प्राबोधयद्धवं राज्ञी, सुधामधुरया गिरा । राजाऽपि जागरामास, कृत्वाऽऽलस्याङ्गमोटनम् ॥ २१ ॥
पप्रच्छ राजा हे देवि ! साम्प्रतं कथमागता । तदा स्माह मया स्वामिन् , ! सुप्ते वासगृहे वरे ॥ २२ ॥
जाग्रतीषद्वारणादिसुस्वप्नानि चतुर्दश । प्रबुद्धा प्रविलोक्यैवं तत्फलं ब्रूहि मत्पुरः ॥ २३ ॥
दृष्टानि चारुस्वप्नानि, राजा प्राह त्वयाऽनघे ! । आत्मनो भविता पुत्रः, चक्रवर्त्ती जिनोऽथवा ॥ २४ ॥
सत्यमेतदिति प्राह, राज्ञी भूधवसद्धवम् । उररीकृत्य तद्वाक्यं, जगाम निजमन्दिरम् ॥ २५ ॥
प्रातःकाले समाहूताः, पण्डिताः, स्वप्नपाठकाः । तेऽपि प्रोचुस्तथा स्वप्नफल–मेका मतिः सताम् ॥ २६ ॥
नातिरूक्षं नातितिक्तं, नात्युष्णं नातिशीतलम् । भोजनं भोजयामास, स्वगर्भकुशलाय सा ॥२७॥
क्रमेण नवमासानामथ संपूर्णतां गते । उच्चैःस्थितैर्ग्रहैः सर्वैर्निष्पन्ने क्षितिमण्डले ॥ २८ ॥
हेमन्तर्तोर्द्वितीयश्च, मासः श्रीपौषसंज्ञकः । आद्यः पक्षस्ततश्चैव, तस्यैव दशमीतिथौ ॥ २९ ॥
पुत्ररत्नं तदा राज्ञी, सुषुवे सुखकारकम् । बिम्बोष्ठं चन्द्रवद्वक्त्रं नीलपद्मतनुच्छविम् ॥ ३० ॥
लक्षणैर्लक्षितं सम्यक्, कदलीगर्भकोमलम् । सुरासुरनरैर्वन्द्यं, श्रीपार्श्वपरमेश्वरम् (युग्मम्) ॥३१॥
तस्मिन्नेव क्षणे भक्त्या चतुःषष्टिः सुरेश्वराः । अमीमिलन् प्रभोर्जन्माभिषेकविधिहेतवे ॥ ३२ ॥

प्रभुं नत्वा स्तवैः स्तुत्वा, गृहीत्वा करसंपुटे । चतुःषष्टिः सुराधीशा, आजग्मुर्मेरुपर्वते ॥ ३३ ॥
मेरुपर्वतचूलायामुपाविश्य जिनेश्वरम् । सौधर्मेन्द्रादयश्चक्रुः स्वमिनो जननोत्सवम् ॥ ३४ ॥
प्रत्यागताः सुराधीशाः, कृत्वा पार्श्वजिनोत्सवम् । आत्मानं कृतकृत्यार्थं, मन्यमाना मुहुर्मुहुः ॥ ३५ ॥
रूप्यहाटकरत्नानां द्वात्रिंशत्कोटिवृष्टयः । ततो भूपगृहे देवाः पातयामासुराशु ते ॥ ३६ ॥
अथ द्वितीयबालेन्दुरिव बालः प्रभुः स्वयम् । वर्द्धते लालितः शश्वत्, पञ्चाभिर्धातृमातृभिः ॥ ३७ ॥
क्रमेण यौवनं प्राप्तः, श्रीपार्श्वपरमेश्वरः । पित्रा प्रभावतीराज्ञ्या विवाहो विहितः प्रभोः ॥ ३८ ॥
अन्येद्युस्तत्पुरीबाह्ये, तापसः कमठः शठः । पञ्चाग्निसाधकः कुण्ठ, आगतोऽज्ञानकष्टकृत् ॥ ३९ ॥
गवाक्षस्थेन पार्श्वेन, सेनकानां तदा मुदा । पृष्टं भोः सेवकाश्चाद्य, कुत्र गच्छन्ति नागराः ॥४०॥
तैः प्रोक्तं युवराजेन्द्र ! तापसः कमठाभिधः । समागतोऽस्ति तं नन्तुं, तत्र लोका व्रजन्त्यमी ॥ ४१ ॥
ऐरावतगजस्पर्द्धिगजमारुह्य सत्वरम् । क्रीडामीषेण पार्श्वोऽपि, तत्पार्श्वे समुपागमत् ॥ ४२ ॥
कुर्वन्नज्ञानकष्टानि प्रभुः प्रोवाच तापसम् । करोषि त्वं मुधाऽज्ञानतपः किल दयांविना ॥ ४३ ॥
प्रत्युवाच प्रभुं सोऽथ, यूयं राजेन्द्रसूनवः । वाजिक्रीडाविधौ दक्षा, नास्मत्तापसवृत्तिषु ॥ ४४ ॥
तदा पार्श्वाज्ञया काष्ठमध्यात् भृत्येन सत्वरम् । कुठाराभ्यां द्विधा कृत्वा, न्यकास्यदग्धपन्नगः ॥ ४५ ॥
धिग् धिगस्तु कृतो लोकैस्तापसः कमठः शठः । प्रसंसां पार्श्वनाथस्य लोका विदधिरे मुहुः ॥ ४६ ॥
कियद्वर्षे गतेऽन्येद्युर्विज्ञाय समयं प्रभुः । दत्त्वा संवत्सरीदानं ललौ दीक्षां जिनाधिपः ॥ ४७ ॥

एकदा श्रीजिनाधिशा मूले वटतरोः स्वयम् । कायोत्सर्गस्थिताः सन्ति ध्यानस्तिमितलोचनाः ॥ ४८ ॥
दुर्ध्यानात् कमठो मृत्वा, मेघमाली सुरोऽजनि । उपसर्गे कृते तस्मिन् न चचाल प्रभुर्मनाक् ॥४९ ॥
अवाप्य केवलज्ञानं श्रीपार्श्वपरमेश्वरः । भुक्त्वा वर्षशतायुष्कं जगाम शिवमन्दिरम् ॥ ५० ॥

श्री मुद्रितपौषदशमीकथातः उद्धृतं

इति श्री पार्श्वनाथजिनचरित्रम् संपूर्णम्

५ देवाधिदेवतीर्थंकर–श्री महावीरस्वामिचरित्रम्

इतश्च जम्बूद्वीपस्य, भरते धनुराकृतौ । भूरिभूदेवभूदेवकुण्डग्रामाभिधं पुरम् ॥ १ ॥
कोडालगोत्रस्तत्रर्षभदत्ताख्यो द्विजोत्तमः । जालन्धरकुलजाऽस्य, देवानन्देति पत्न्यभूत् ॥ २ ॥ (युग्मम्)
तस्याः कुक्षौ समुत्पेदे, च्युत्वाऽर्द्धनिशि कल्पतः । आषाढसितषष्ठयां स, ज्ञानत्रयपवित्रितः ॥ ३ ॥
च्योष्येऽत इति जानाति, च्युतोऽस्मि चेत इत्यपि । च्यवमानो न छद्मस्थस्यैकसामयिकज्ञता ॥ ४ ॥
सा ततस्तादृशे तल्पे, सुखसुप्ता सती सती । चतुर्दश ददर्शेमान्, स्वप्नानद्भुतदर्शनान् ॥ ५ ॥
सिंहेभ-गो रमा-दाम-चन्द्रार्क-ध्वज-कुम्भकाः । पद्मसरोऽब्धिर्विमानरत्नं रत्नोच्चयः शिखी ॥ ६ ॥
दृष्ट्वैतान् हृष्टतुष्टा सा, प्रबुद्धा प्रीतमानसा । हर्षोत्कर्षोल्लसल्लोमराजी राजीवलोचना ॥ ७ ॥

उत्थायोत्कृष्टया गत्या, राजहंसीसदृक्षया । यत्राऽऽस्ते ऋषभदत्तस्तत्रैत्य तमबोधयत् ॥ ८ ॥
सुप्ताऽद्य शयनीयेऽहं, स्वामिन् ! वीक्षितवत्यमून् । तदेषां फलमाख्याहि, बुद्धि-विज्ञानपूर्वकम् ॥ ९ ॥
स विमर्श्याऽऽह देवानुप्रिये ! लाभोऽङ्गजस्य ते । भोगलाभोऽर्थलाभश्च, भावी लाभः सुखस्य च ॥ १० ॥
श्रुत्वेति मुदिता गेहं, गत्वा गर्भं दधत्यसौ । मुहूर्त्तमिव द्वाशीतिर्वासरानत्यवाहयत् ॥ ११ ॥
निष्प्रकम्पमभूत् कम्प्रमथ शक्रस्य विष्टरम् । स ज्ञात्वाऽवधिना जन्मार्हतश्चेतस्यचिन्तयत् ॥ १२ ॥
नेदं भूतं भवेन्नैव, न भविष्यति कर्हिचित् । अर्हच्चक्रि-त्रिखण्डेशादयो यत् पुरुषोत्तमान् ॥ १३ ॥
दरिद्रादिकुलेष्वेवं, नोत्पद्येरन् कदाचन । कर्मोदयदथोत्पन्ना, जायन्ते नेति निर्णयः ॥ १४ ॥ (युग्मम्)
तथाऽयं भगवान् वीर उत्पन्नस्तादृशे कुले । ततो जीतमतीतानागतानां वज्रिणामदः ॥ १५ ॥
कुलेभ्यस्तादृशेभ्यो यदुद्धृत्योत्पादयन्त्यमी । अग्रोग्रादिकुलेष्वेवार्हदादीन् पुरुषोत्तमान् ॥ १६ ॥
ममापीदमतः श्रेय इति सञ्चिन्त्य वासवः । नैगमेषिणमादिक्षदाकार्याग्रसरेश्वरम् ॥ १७ ॥
भो देवानुप्रियादोऽर्हद्वैयावृत्यं कुरूत्तमम् । सद्यस्तदा तदादेशमासाद्य मुमुदेऽसकौ ॥ १८ ॥
ततश्च वैक्रियोद्घातं, कृत्वैत्येशानकूणके । चण्डादिगतिभिर्विप्रकुण्डग्रामाय सोऽचलत् ॥ १९ ॥
एत्यापस्वापिनीं मातुर्दत्त्वा लात्वा करद्वये । निराबाधं न्यधाद् वीरं, स कुक्षौ चेटकस्वसुः ॥ २० ॥
आश्विनाद्यत्रयोदश्यां, चन्द्रे हस्तोत्तरास्थिते । त्रिशलायां स उत्पन्नः, पत्न्यां सिद्धार्थभूपतेः ॥ २१ ॥
देवानन्दा त्रिशला च, तस्यां निशि निजानने । निर्गच्छतः प्रविशतः, स्वप्नांस्ते पश्यतः समम् ॥ २२ ॥

गर्भतः सप्तमे मासे, स्वाम्यभिग्रहमग्रहीत् । उपादेयं मया मातापित्रोर्नो जीवतोर्व्रतम् ॥ २३ ॥
नवमासेऽथ सम्पूर्णे, सार्द्धसप्तदिनोत्तरे । चैत्रशुक्लत्रयोदश्यामिन्दौ हस्तोत्तरानुगे ॥ २४ ॥
मनोऽनुकूलवातेपूच्चस्थानस्थग्रहेषु सः । प्रक्रीडितप्रमुदितावन्यां जनपदोदये ॥ २५ ॥
कन्याराशिः सिंहलक्ष्मा, निशीथे-काञ्चनद्युतिः । जात उत्पादयन् सौख्यं, क्षणं नारकिणामपि ॥ २६ ॥ त्रिभिः सम्बन्धः
इतश्च दिक्कुमारीणामासनानि चकम्पिरे । वितेनुः सूतिकर्माणि, स्वानि स्वान्येत्य भक्तितः ॥ २७ ॥
ज्ञात्वाऽऽसनाकम्पवशादथोच्चकैर्घण्टां सुघोषां हरिरप्यताडयत् । अभूत तदानीं युगपन्निनादाद्वैतं समग्रेषु सुरालयेषु ॥२८॥
विमानमारुह्य महत्प्रमाणमेत्यार्हतो जन्मगृहं जनन्याः । दत्त्वा त्ववस्वापनिकां समीपे, मुक्त्वा तदाकारमुदाररूपम् ॥ २९ ॥
सौधर्मनाथः प्रविधाय पञ्चधाऽऽत्मानं जिनं पाणिपुटे प्रहर्षुलः ।
जन्माभिषेकं विदधे सुराचले, यथाक्रमं सर्वसुरेश्वरैः समम् ॥ ३० ॥ (युग्मम्)
आनीय पश्चादपनीय निद्रामुद्घोषणां बाढरवेण चक्रे । शृण्वन्तु भोः सर्वसुपर्वसङ्घा! विरूपकं नेतुरथास्य मातुः ॥३१॥
ये चिन्तयिष्यन्ति हृदा कदाचित्, तेषां शिरांस्यर्ज्जकमञ्जरीवत् । (युग्मम्)
स्फुटं स्फुटिष्यन्ति किलैवमुक्त्वा, हरिः सुरेन्द्राश्च गता यथागतम् ॥ ३२ ॥
प्रातः प्रवर्द्धापनिकां प्रसिद्धसिद्धार्थराजाय प्रियंवदाऽदात् । सुतावतारं स तदा तदास्याज्छुत्वा ममौ नो मनसि प्रकामम् ॥३३॥
किरीटवर्जामखिलामलङ्कृतिं, दास्यै ददावात्मतनोस्ततो नृपः ।
प्रभातकृत्यानि विधाय कृत्यविदाकार्य कौटुम्बिकपुंस इत्यवक् ॥ ३४ ॥

प्रमृज्य सिक्त्वा मञ्चातिमञ्चोल्लोचाञ्चितं पुरम् । ऊर्ध्वीकृतोरुमुशलं, बद्धचन्दनमालिकम् ॥ ३५ ॥
नैकतालाचराकीर्णं, कुरुत त्वरितं स्वयम् । सर्वं विधाय ते राज्ञः, आज्ञां प्रत्यर्पयन्त्यथ ॥ ३६ ॥
दशाहमहिमारम्भे वर्त्तमाने नृपोऽकरोत् । उच्छुल्कमुत्करं मानवर्द्धनं गुप्ति(वन्दि)मोक्षणम् ॥ ३७ ॥
धात्रीत्वं पञ्चभिर्देवीभिः कुर्वाणाभिरन्वहम् । प्रापोपचयमङ्गेन, स्वामी चामीकरच्छविः ॥ ३८ ॥
किञ्चिदूनाष्टवर्षस्य, सुराणामग्रतः प्रभोः । सद्गुणोत्कीर्त्तनं शक्रः, सुधर्मा(र्म)स्थो व्यधादिदम् ॥ ३९ ॥
बालोऽबालस्वभावोऽसौ, वीरोऽबालपराक्रमः । नैव भापयितुं देवैः, सशक्रैरपि शक्यते ॥ ४० ॥
तत्रैकस्तद्वचः श्रुत्वाऽश्रद्दधानः सुरो हृदि । एति वीरान्तिकं तूर्णं, भापनार्थं निरर्थकम् ॥ ४१ ॥
तले तिन्दुकवृक्षस्य, सर्परूपं विधाय सः । स्थितः परे भयभ्रान्ता, बाला नेशुर्दिशोदिशम् ॥ ४२ ॥
निर्भीको भगवान् नागं, पाणिनाऽऽदाय रज्जुवत् । दयावान् दूरमुत्सृष्टवानवाम(न)मना मनाक् ॥ ४३ ॥
पुनर्विधाय बालस्य, रूपं क्रीडन् सुरो जितः । प्रभुणा तुरगीभूतः प्रभुरप्यारुरोह तम् ॥ ४३ ॥
नभस्युत्पतितो वर्द्धमानो मानोज्झिताङ्गभृत् । सविकारं तदाकारं, विलोक्य प्रभुरप्यथ ॥ ४४ ॥
मुष्टिप्रहारं पृष्ठेऽदात्, ततः संहृत्य कैतवम् । नत्वा वीरं गुणान् गृह्णन्, स्वर्गी स्वर्गं जगाम सः ॥ ४५ ॥
अथाधिकाष्टवर्षं तं, विज्ञाय पितरावपि । कृतकौतुकमाङ्गल्यं, वस्त्राभरणभूषितम् ॥ ४६ ॥
गजारूढं पुरः प्रोद्यन्निनादाद्वैतबन्धुरम् । निन्यतुर्लेखशालायां, गायद्धवलमङ्गलम् ॥ ४७ ॥ युग्मम् ॥
विज्ञायावधिना शक्र, एत्य रूपं द्विजन्मनः । कृत्वाऽऽसनं प्रभोर्योग्यं, स्वयोग्यं चाप्यचीकरत् ॥ ४८ ॥

तत्समक्षं प्रभुं शक्रोऽपृच्छत् सिंहासनस्थितम् । शब्दस्य लक्षणं तथ्यं सर्वं स्वाम्यपि तं जगौ ॥ ४९ ॥
अचिन्तयदुपाध्यायो, मानादपि कणो महान् । यदहो ! वेत्त्ययं बालस्तन्नामापि न वेद्म्यहम् ॥ ५० ॥
तेनावधारितं सम्यक्, सर्वं सद्धारणावता । ततः (प्रभृति जैनेन्द्रं कृतं) प्रवृत्तमत्रादावैन्द्रं व्याकरणोत्तमम् ॥ ५१ ॥
त्यक्तबालोचितावस्थं, क्रमेण प्राप्तयौवनम् । विज्ञाय पितरौ भोगसमर्थं वीरमात्मजम् ॥ ५२ ॥
महदुज्ज्वलकुल्या(ला)याः, शुभे चन्द्रबले तिथौ । राजकन्यायशोदाया, ग्राहयामासतुः करम् ॥ ५३ ॥ युग्मम् ॥
भुञ्जानः पञ्चधा भोगान्, निःस्पृहोऽपि नरोचितान् । प्रियदर्शनाभिधां(ऽऽख्यां)पुत्रीं, स्वानुरूपामजीजनत् ॥ ५४ ॥
श्रीपार्श्वोपासकीभूय, श्रीवीरपितरावथ । मृत्वाऽनशनयोगेन, माहेन्द्रं वाऽच्युतं श्रितौ ॥ ५५ ॥
प्रपूर्णाभिग्रहो दक्षप्रतिज्ञो ज्ञातनन्दनः । विनीतो भद्रकोऽष्टाविंशत्यब्दान्यस्थाद् गृहे विभुः ॥ ५६ ॥
पृष्टोऽथ वर्द्धमानेन, व्रतार्थं नन्दिवर्द्धनः । स्पष्टमाचष्ट मा भ्रातः !, क्षेप्सीः क्षारं क्षते क्षतम् ॥ ५७ ॥
ततो वर्षद्वयं तस्थौ, गार्हस्थ्येऽस्योपरोधतः । दाक्षिण्यसेवधिर्वीरः, शुद्धसाधुरिवाधिकम् ॥ ५८ ॥
अथो लोकान्तिका देवा, अभ्येत्येत्याशिषं ददुः । जय नन्द जय भद्र ! भद्रं ते क्षत्रियोत्तम ! ॥ ५९ ॥
बुद्ध्यस्व भगवन् ! लोकनाथ ! धर्मेऽस्त्वविघ्नता । इति कृत्वा जयशब्दं, प्रयुञ्जन्ति प्रभोः पुरः ॥ ६० ॥ युग्मम् ॥
चारित्रावसरं स्वामी, जानन् ज्ञानेन तु स्वयम् । ताम्रचूडैर्निशाशेषमिव तैर्बोधितः क्षणम् ॥ ६१ ॥
प्रदाय वार्षिकं दानं, मिलितैश्च चतुर्विधैः । सुपर्वराजैस्तैः सर्वैस्तीर्थाम्भोभिः कृताप्लवः ॥ ६२ ॥
सर्वाङ्गाभरणैश्चारु चन्दनैश्चर्चिताङ्गभृत् । कृतषष्ठतपाश्चन्द्रप्रभाख्यां शिबिकां श्रितः ॥ ६३ ॥

मार्गशीर्षाधदशम्यां, प्रथमे वयसि स्थितः । ज्ञातखण्डवने वीर एकाक्येवाददे व्रतम् ॥ ६४ ॥ (त्रिभिः सम्बन्धः)

ज्ञानत्रयधरो धीरो, गृहस्थत्वेऽभवत् पुनः । तुर्यं ज्ञानं तदोत्पेदे, मनःपर्यवसंज्ञकम् ॥ ६५ ॥

तत्रोद्यानेऽखिलान् ज्ञातीन्, पृष्ट्वाऽनस्तमिते रवौ । कुमार(र्मा) ग्राममायातः, सायं तु प्रतिमां स्थितः ॥ ६६ ॥

एकस्तत्रैत्य गोपालोऽवग् वीरं–मद्वृषाविमौ । चिन्त्यौ यावद् विधायैमि, कार्यं गोदोहनादिकम् ॥ ६७ ॥

मौनेन नावगीशोऽपि, स गत्वाऽऽगान्न पश्यति । लग्नो भ्रमितुमप्येतावायातावन्तिकं विभोः ॥ ६८ ॥

दृष्ट्वा रात्रिभ्रमात् क्रुद्धोऽधावतोत्पाट्य सेलकम् । स्तेन इत्युपसर्गार्थमथास्मार्षीद् जिनं हरिः ॥ ६९ ॥

कथमुपात्तचारित्रः, स्वामी विहरति क्षितौ ? । तथाऽऽयान्तं तमालोक्य, द्रागेत्य स्म निषेधति ॥ ७० ॥

ततः कृताञ्जलिः प्राहोपसर्गबहुलो विभो ! । चिरं भावी विहारस्ते, पूर्वकर्मानुभावतः ॥ ७१ ॥

यद्यादिशति मां स्वामी, वारयाम्यन्तिके स्थितः । वीरोऽवादीद् हरे ! नैवं, भूतं भावि भवत्यहो ! ॥ ७२ ॥

यदन्यनिश्रयाऽर्हन्तोऽर्जयन्ति किल केवलम् । किन्तु स्ववीर्यपुरुषाकारादेव हि केवलम् ॥ ७३ ॥

सिद्धार्थव्यन्तरं स्वामिसम्बन्धिनमथो हरिः । आदिश्याहश्यतां प्राप्तो, विद्युदुद्योतवत् क्षणात् ॥ ७४ ॥

पारणाय प्रगे प्राप्तो, बलस्य गृहिणो गृहे । परमान्नेन तेनापि, स भक्त्या प्रतिलाभितः ॥ ७५ ॥

देवोद्घुष्टमहोदानं, नेदुर्दुन्दुभयो दिवि । चेलोत्क्षेपो रत्नवृष्टिः, पञ्च दिव्यानि जज्ञिरे ॥ ७६ ॥

कृत्वाऽऽद्यं पारणं पात्रे, तत्रेशो देवदूष्यभृत् । तापसाश्रममायातो, मायातोऽत्र पराङ्मुखः ॥ ७७ ॥

तत्र मित्रं कुलपतिः, पितुरास्तेऽर्हतः स तु । उद्बाहुर्मिलनायाऽऽगात्, पूर्वाभ्यासाद् विभुस्तथा ॥ ७८ ॥

ऊचे कुलपतिः स्वामिन् ! प्रासुकोपाश्रयाश्रयात् । अनुग्राह्योऽस्त्वयं वर्षावस्थित्याऽवस्थितात्मना ॥ ७९ ॥
दाक्षिण्येन पुनस्तत्रायातोऽस्थात् प्रतिमास्थिरः । त्रोटयन्त्युटजांस्तार्णान्, तिर्यञ्चः प्रावृडागमे ॥ ८० ॥
निर्दयास्ताडयन्त्यन्ये, नेशस्तान् निर्ममत्वतः । अवोचन्नपरे प्रीत्या, गुरवे सोऽप्यवक् (सोऽवक् च)प्रभुम् ॥ ८१ ॥
देवार्य ! शकुनी नीडं, पीड्यमानं हि रक्षति । त्वत्पिता जगतीपीठं, किं भवान् नैक(व)मास्पदम् ? ॥ ८२ ॥
अप्रीतिकारि दूरेण, स्थानं त्याज्यं तपोधनैः । विजहारेति वर्षासु, न सन्तोऽन्यासुखावहाः ॥ ८३ ॥
व्युत्सृष्टाङ्गेन मौनेन, प्रीतिमद्गृहवासिना । पाणिपात्रेण गृहिणोऽभ्युत्थानाद्यविधायिना ॥ ८४ ॥
भाव्यं मयेत्यसौ पञ्चाग्रहीदुग्रानभिग्रहान् । अथोपसर्गा ग्रन्थेभ्यो, विज्ञेया विबुधैरिह ॥ ८५ ॥
[नोच्यन्ते ग्रन्थबाहुल्यादिति] वीरेण भ्रमताऽऽप्ते(ते)न, यत्तपस्तत्समुत्कटम् । पक्षास्त्रयोदशाब्दानि, द्वादशेत्युच्यतेऽधुना ॥८६॥
षण्मास्येका चतुर्मास्यो, नव द्वे च त्रिमासिके । षट् द्विमास्यश्चैकमासी, द्वादशेति तपोऽभवत् ॥ ८७ ॥
अर्द्ध-द्व्यर्द्ध-सार्द्धद्विमास्यश्च द्वासप्ततिर्द्वे द्वे । भद्राद्याः प्रतिमास्तिस्रो, द्वि–चतुर्दशवासरैः ॥ ८८ ॥
प्रतिमा द्वादशाच्छिन्ना अष्टमेनैकरात्रिकी । साभिग्रहा शराहोनां, षण्मासीं वत्सपत्तने ॥ ८९ ॥
षष्ठानां द्विशतीमेकोनत्रिंशदधिकां व्यधात् । त्रिशत्येकोनपञ्चाशत्, पारणाः सर्वसङ्ख्यया ॥ ९० ॥ युग्मम् ॥
चतुर्थभक्तं नो नित्य-भक्तं कर्हिचिदप्यभूत् । अपानकं तथा सर्वं, तपोऽस्य चरमार्हतः ॥ ९१ ॥
दीक्षाया दिनमेकं च, सर्वं निक्षिप्य मीलितम् । पूर्वोक्तमानश्छद्मस्थ–काल एषोऽस्य शासितुः ॥ ९२ ॥
तुर्येऽह्नः प्रहरे राधविशुद्धदशमीदिने । शुक्लध्यानान्तरे वर्त्तमानस्यानुत्तरं प्रभोः ॥ ९३ ॥

नद्यृजुपलिकातीरे, जृम्भिकयाः पुरो बहिः । अव्यक्ताख्यस्य चैत्यस्यासन्ने श्यामाकगेहिनः ॥ ९४ ॥
क्षेत्रान्तः शालवृक्षाधः, षष्ठेनोत्कटिकासने । स्थितस्य तस्य सम्पन्नं, केवलं जन्मभे शुभे ॥ ९५ ॥ [त्रिभिः सम्बन्धः]
ततश्चतुर्विधैर्देवैर्निर्मिते धर्मसद्मनि । जीतमित्यकरोद् धर्मदेशनां धर्मदेशकः ॥ ९६ ॥
आश्चर्यं तत्र नो कश्चित्, साधुर्वा श्रावकोऽभवत् । ततो विहृत्य शर्वर्यां द्वादश योजनान्यगात् ॥ ९७ ॥
महसेनवने पापापुर्यां धर्मगृहे स्थितः । तत्राऽऽस्ते(स्ति)सोमिलज्योतिर्यागकर्त्ता द्विजस्तदा ॥ ९८ ॥
एकादशाप्युपाध्यायास्तेनाहूताः क्रतूपरि । मिलिताः सन्त्यथायान्ति, नमस्कर्त्तुं जिनं जनाः ॥ ९९ ॥
प्रसस्रुस्तन्मुखे वाचः, सर्वज्ञोऽत्रागतोऽस्ति हि । तच्छ्रुत्वाऽचिन्तयत् चित्ते, गौतमोऽहङ्कृतेरदः ॥ १०० ॥
विद्यमाने न कोऽप्यन्यः, सर्वज्ञो मयि सम्प्रति । एकस्मिन्नुदिते भानौ, किमन्यः कर्हिचिद् भवेत् ॥ १०१ ॥
परं कोऽपि महाधूर्त्त, इन्द्रजालिकविद्यया । विस्मापयति नूनं मुग्धान्, न लोकः पारमार्थिकः ॥ १०२ ॥
अथाकाशे प्रकाशास्यांश्चलत्कु[कु]ण्डलधारिणः । आयातो वीक्ष्य गीर्वाणान्, विमानस्थान् महस्विनः ॥ १०३ ॥
उपाध्यायादयः प्राहुरहो ! माहात्म्यमात्मनः । क्रतोरायान्ति यदमी, महिमां कर्त्तुमुन्मुदः ॥ १०४ ॥ (युग्मम्)
श्वपाकपाटकमिव, त्यक्त्वा तं यज्ञपाटकम् । ते समवसृतौ जग्मुर्न सुधीर्मुग्धमार्गगः ॥ १०५ ॥
तद् दृष्ट्वा गौतमोऽवादीत्, मुग्धा जग्धा ह्यनेन चेत् । कथं सुरा ? वा संयोगः सदृशो ग्राम्य–मूर्खयोः ॥ १०६ ॥
यामि पश्यामि सर्वज्ञवादमुत्तारयामि वा । इति ध्यात्वा वृतश्छात्रैस्तत्रागाद् गौतमो रयात् ॥ १०७ ॥
आगच्छ भो गौतमेति, भाषितः स्वामिनाऽऽह सः । कथं मे नाम जानाति ?, को वा वेत्ति न मामिह ? ॥१०८॥

परं ज्ञास्यति सन्देहं, हार्दं मे चेदयं तदा । सत्य इत्यवदत् तावद् वेदसत्यार्थमीशिता ॥ १०९ ॥
तत उत्खातमिथ्यात्वपटलं शुचिदर्शनः(म्) । स्फुरद्रूपतयाऽद्राक्षीद्, गौतमोःवीर भास्करम् ॥ ११० ॥
मुक्तमानं नमन्मौलिमर्हन्मौलिरमुं तदा । चारित्रं ग्राहयामास, च्छात्रपञ्चशतीवृतम् ॥ १११ ॥
एवमेवाग्निभूत्याद्या, दीक्षिताः स्वामिना तदा (दश) । सर्वे चैकादशाभूवन्, क्रमेण गणधारिणः ॥ ११२ ॥
चतुर्दश सहस्राणि, श्रमणा गुणशालिनः (धारिणः) । पट्त्रिं शच्चसहस्राणि, श्रमण्योऽस्य परिच्छदः ॥ ११३ ॥
लक्षमेकोनषष्टिश्च, सहस्राः श्रावकास्तथा । तेभ्यो द्विगुणमानाश्च, श्राद्धयोऽर्कंव्रतधारिकाः ॥ ११४ ॥
मनःपर्यविनां वादिनां चतुर्दशपूर्विणाम् । शतानि पञ्च चत्वारि, त्रीण्येवं स्युर्यथाक्रमम् ॥ ११५ ॥
शतं वैक्रियलब्धीनां, सप्त केवलिनामपि । सर्वार्थसिद्ध्य(द्धा)वधिनां, शतान्यष्टौ(ष्ट) त्रयोदश ॥ ११६ ॥
द्वयोर्द्वयोः किलैकस्या वाचनाया विशेपतः । नव गच्छास्तदीशाश्चैकादशेति यतिक्रमः ॥ ११७ ॥
स्वशासनस्य रक्षार्थं, यक्षं मातङ्गसञ्ज्ञकम् । तथा सिद्धायिकां देवीमादिशदीशिताऽन्तिमः ॥ ११८ ॥
एवं चतुर्विधं सङ्घं, संस्थाप्य जगतां पतिः । सेव्यस्त्रिदशकोटीभिर्विजहार वसुन्धराम् ॥ ११९ ॥
दान–लाभ–वीर्य–भोगोपभोगा अन्तरायकाः । हासो रत्यरती भीतिर्जुगुप्सा शोक–मन्मथौ ॥ १२० ॥
मिथ्यात्वाज्ञानता निद्राऽविरति–द्वेप–रागताः । इत्यष्टादशदोषेण मुक्तो मुक्तिसुखोन्मुखः ॥ १२१ ॥
चतुस्त्रिंशदतिशयैः, प्रातिहार्याष्टकेन च । पञ्चत्रिंशद्वचनातिशयैश्च सहितो बभौ ॥ १२२ ॥
नो भवितव्यतानाशो, गोशालस्त्वा जगत्प्रभुम् । यच्चुक्रोश हहा ! तेऽग्रे, महर्षी दग्धवानपि ॥ १२३ ॥

वसन्ति सन्तो यत्रैकं, मुहूर्त्तं तं कृतार्थताम् । नयन्तीति शिवं देवानन्दर्षभदत्तयोरदात् ॥ १२४ ॥
दिशन् ससप्तभङ्गानि, नव तत्त्वानि तत्त्ववित् । देशोनत्रिंशद्वर्षाणि, पापायां विहरन्नगात् ॥ १२५ ॥
हस्तिपालनृपालस्य, शुक्लांशो शुल्कमण्डपे । कार्तिकामावसीरात्रौ, षष्ठेन:स्वातिभे शुभे ॥ १२६ ॥
पर्यङ्कासनमासीनस्तुर्यारान्ते प्रशान्तहृत् । भवोपग्राहिकर्मांशक्षयादुच्छिन्नबन्धनः ॥ १२७ ॥
सार्द्धद्वये वर्षशते, व्यतीते पार्श्वतः प्रभोः । द्वासप्तत्यब्दसर्वायुः, करणे नागनामके(नि) ॥ १२८ ॥
अष्टादशगणोर्वीशपुरस्ताद् धर्मदेशनाम् । षोडश प्रहरान् कुर्वन्नेकाकी शिवमाप सः ॥ १२९ ॥ [चतुर्भिः सम्बन्धः]
जाति–जन्म–जरा–मृत्युमुख्याबाधाऽकलङ्कितः । तत्रानन्तानन्तकालं, स्थाता त्राताऽङ्गिनां विभुः ॥ १३० ॥
इत्यागमारामकृतोञ्छवृत्तिना, मुग्धेन दृब्धाऽस्य चरित्रमालिका ।
यः कण्ठपीठे लुठितामशाठ्यतस्तनोत्यनन्तां लभते रमामिमाम् ॥ १३१ ॥

इति श्री मुद्रितऋषिमण्डलवृत्तिपृष्ठाङ्क १८ तः उद्धृतं

इति श्री महावीरस्वामिचरित्रम् संपूर्णम्

श्री सनत्कुमार चक्रवर्तिचरित्रम्

तथाहि योगमाहात्म्याद्योगिनां कफविन्दवः । सनत्कुमारादेरिव जायन्ते सर्व्वरुक्छिदः ॥ १ ॥
सनत्कुमारो हि पुरा चतुर्थचक्रवर्त्यभूत् । षट्खण्डपृथिवीभोक्ता नगरे हस्तिनापुरे ॥ २ ॥

कदाचिच्च सुधर्म्मायां सभायां जातविस्मयः । रूपं तस्याप्रतिरूपं वर्णयामास वासवः ॥ ३ ॥
राज्ञः सनत्कुमारस्य, कुरुवंशशिरोमणेः । यद्रूपं न तदन्यत्र, देवेपु मनुजेपु वा ॥ ४ ॥
इति प्रशंसां रूपस्या -श्रद्धानावुभौ सुरौ । विजयो वैजयन्तश्च, पृथिव्यामवतेरतुः ॥ ५ ॥
ततस्तौ विप्ररूपेण रूपान्वेषणहेतवे । प्रासादद्वारि नृपतेस्तस्थतुर्द्वाःस्थसन्निधौ ॥ ६ ॥
आसीत् सनत्कुमारोऽपि तदा प्रारब्धमज्जनः । मुक्तनिःशेपनेपथ्यः सर्वाङ्गाभ्यङ्गमुद्वहन् ॥ ७ ॥
द्वारस्थौ द्वारपालेन द्विजाती, तौ निवेदितौ । न्यायवर्त्ती, चक्रवर्त्ती, तदानीमप्यवीविशत् ॥ ८ ॥
सनत्कुमारमालोक्य विस्मयस्मेरमानसौ । धूनयामासतुर्मौलिं, चिन्तयामासतुश्च तौ ॥ ९ ॥
ललाटपट्टः पर्यस्ताष्टमीरजनिजानिकः । नेत्रे कर्णान्तविश्रान्ते, जितनीलोत्पलत्विपी ॥ १० ॥
दन्तच्छदौ पराभूतपक्वविम्बीफलच्छवी । निरस्तशुक्तिकौ कर्णौ कण्ठोऽयं पाञ्चजन्यजित् ॥ ११ ॥
करिराजकराकारतिरस्कारकरौ भुजौ । स्वर्णशैलशिलालक्ष्मीविलुण्टाकमुरःस्थलम् ॥ १२ ॥
मध्यभागो मृगारातिकिशोरोदरसोदरः । किमन्यदस्य सर्वाङ्गलक्ष्मीर्वाचां न गोचरः ॥ १३ ॥
अहो कोऽप्यस्य लावण्यसरित्पूरो निरर्गलः । येनाभ्यङ्गं न जानीमो. ज्योत्स्नयोडुप्रभामिव ॥१४॥
यथेन्द्रो वर्णयमास तथेदं भाति नान्यथा । मिथ्या न खलु भापन्ते महात्मानः कदाचन ॥ १५ ॥
किं निमित्तमिहायातौ, भवन्तौ द्विजसत्तमौ । इत्थं सनत्कुमारेण, पृष्टौ तावेवमूचतुः ॥ १६ ॥
लोकोत्तरचमत्कार-कारकं सचराचरे । भुवने भवतो रूपं, नरशार्दूल गीयते ॥ १७ ॥

दूरतोऽपि तदाकर्ण्य, तरङ्गितकुतूहलौ । विलोकयितुमायातावावामवनिवासव ! ॥ १८ ॥
वर्ण्यमानं यथा लोके, शुश्रुवेऽस्माभिरद्भुतम् । रूपं नृप ततोऽप्येतत्सविशेषं निरीक्ष्यते ॥ १९ ॥
ऊचे सनत्कुमारोऽपि, स्मितविस्फुरिताधरः । इयं हि कियती कान्तिरङ्गेऽभ्यङ्गतरङ्गिते ॥ २० ॥
इतो भूत्वा प्रतीक्षेथां, क्षणमात्रं द्विजोत्तमौ । यावन्निवर्त्यतेऽस्माभि-रेप मज्जनकक्षणः ॥ २१ ॥
विचित्ररचिताकल्पं भूरिभूपणभूपितम् । रूपं पुनर्निरीक्षेथां, सरत्नमिव काञ्चनम् ॥ २२ ॥
ततोऽवनिपतिः स्नात्वा कल्पिताकल्पभूषणः । साडम्बरः सदोऽध्यास्ताम्बररत्नमिवाम्बरम् ॥ २३ ॥
अनुज्ञातौ ततो विप्रौ, पुरोभूय महीपतेः । निदध्यतुश्च तद्रूपं, विपण्णौ दध्यतुश्च तौ ॥ २४ ॥
क्व तद्रूपं क्व सा कान्तिः, क्व तल्लावण्यमप्यगात् । क्षणेनाप्यस्य मर्त्यानां, क्षणिकं सर्वमेव हि ॥ २५ ॥
नृपः प्रोवाच तौ कस्माद्—दृष्ट्वा मां मुदितौ पुरा । कस्मादकस्मादधुना, विपादमलिनाननौ ॥ २६ ॥
ततस्तावूचतुरिदं, सुधामधुरया गिरा । महाभाग ! सुरावावां, सौधर्मस्वर्गवासिनौ ॥ २७ ॥
मध्ये सुरसभं शक्रश्चक्रे त्वद्रूपवर्णनम् । अश्रद्दधानौ तद्द्रष्टुं, मर्त्यमूर्त्त्यागताविह ॥ २८ ॥
शक्रेण वर्णितं यादृक्, तादृशं वपुरीक्षितम् । रूपं नृप तवेदानीमन्यादृशमजायत ॥ २९ ॥
अधुना व्याधिभिरयं, कान्तिसर्व्वस्वतस्करैः । देहः समन्तादाक्रान्तो, निःश्वासैरिव दर्पणः ॥ ३० ॥
यथार्थमभिधायेति. द्राक्तिरोहितयोस्तयोः । विच्छायं स्वं नृपोऽपश्यद्धिमग्रस्तमिव द्रुमम् ॥ ३१ ॥
अचिन्तयच्च धिगिदं सदा गदपदं वपुः ! मुधैव मुग्धाः कुर्व्वन्ति, तन्मूर्च्छां तुच्छबुद्धयः ॥ ३२ ॥

शरीरमन्तरुत्पन्नैर्व्याधिभिर्विविधैरिदम् । दीर्य्यते दारुणैर्दारु, दारुकीटगणैरिव ॥ ३३ ॥
बहिः कथञ्चिद्यद्येतत्प्ररोच्येत तथापि हि । नैयग्रोधं फलमिव, मध्ये कृमिकुलाकुलम् ॥ ३४ ॥
रुजा लुम्पति कायस्य, तत्कालं रूपसम्पदम् । महासरोवरस्येव, वारिसेवालवल्लरी ॥ ३५॥
शरीरं श्लथते नाशा रूपं याति न पापधीः । जरा स्फुरति न ज्ञानं धिग् स्वरूपं शरीरिणाम् ॥ ३६ ॥
रूपं लवणिमा कान्तिः, शरीरं द्रविणान्यपि । संसारे तरलं सर्वं, कुशाग्रजलबिन्दुवत् ॥ ३७ ॥
अद्यश्वीनविनाशस्य, शरीरस्य शरीरिणाम् । सकामनिर्ज्जरासारं, तप एव महत्फलम् ॥ ३८ ॥
इति सञ्जातवैराग्यभावनः पृथिवीपतिः । प्रव्रज्यां स्वयमादित्सुः, सुतं राज्ये न्यवीविशत् ॥ ३९ ॥
गत्वोद्याने सविनयं विनयन्धरसूरितः । सर्व्वसावद्यविरतिप्रधानं सोऽग्रहीत्तपः ॥ ४० ॥
महाव्रतधरस्यास्य, दधानस्योत्तरान् गुणान् । ग्रामाद्ग्रामं विहरतः समतैकाग्रचेतसः ॥ ४१ ॥
गाढानुरागबन्धेन, सर्व्वं प्रकृतिमण्डलम् । पृष्ठतोऽगात्करिकुलं, महायूथपतेरिव ॥ ४२ ॥ (युग्मम्)
निष्कषायमुदासीनं, निर्म्ममं निष्परिग्रहम् । तं पर्य्युपास्य षण्मासान्, कथञ्चित्तन्न्यवर्त्तत ॥ ४३ ॥
यथाविध्यात्तभिक्षाभिरकालापथ्यभोजनैः । व्याधयोऽस्य ववृधिरे, सम्पूर्णैर्दोहदैरिव ॥ ४४ ॥
कच्छ्रशोषज्वरश्वासारुचिकुक्ष्यक्षिवेदनाः । सप्ताधिसेहे पुण्यात्मा सप्तवर्षशतानि सः ॥ ४५ ॥
दुःसहान् सहमानस्य, तस्याशेषपरीहान् । उपायनिरपेक्षस्य, समपद्यन्त लब्धयः ॥ ४६ ॥
अत्रान्तरे सुरपतिः, समुद्दिश्य दिवौकसः । हृदि जातचमत्कार–श्चकारेत्यस्य वर्णनम् ॥ ४७ ॥

चक्रवर्त्तिश्रियं त्यक्त्वा, प्रज्वलत्तृणपूलवत् । अहो सनत्कुमारोऽयं, तप्यते दुस्तपं तपः ॥ ४८ ॥
तपोमहात्म्यलब्धासु, सर्व्वास्वपि हि लब्धिषु । शरीरनिरपेक्षोऽयं, स्वरोगान्न चिकित्सति ॥ ४९॥
अश्रद्दधानौ तद्वाक्यं, वैद्यरूपधरौ सुरौ । विजयो वैजयन्तश्च, तत्समीपमुपेयतुः ॥५० ॥
ऊचतुश्च महाभाग, किं रोगैः परिताम्यसि । वैद्यावावां चिकित्सावो, विश्वं स्वैरेव भेषजैः ॥ ५१ ॥
यदि त्वमनुजानासि, रोगग्रस्तशरीरकः । तदह्नाय निगृह्णीवो रोगानुपचितांस्तव ॥ ५२ ॥
ततः सनत्कुमारोऽपि प्रत्यूचे भोश्चिकित्सकौ । द्विविधा देहिनां रोगा, द्रव्यतो भावतोऽपि च ॥ ५३ ॥
क्रोधमानमायालोभा, भावरोगाः शरीरिणाम् । जन्मान्तरसहस्रानु—गामिनोऽनन्तदुःखदाः ॥ ५४ ॥
तांश्चिकित्सितुमीशौ, चेद्युवां तर्हि चिकित्सतम् । अथो चिकित्सथो द्रव्यरोगांस्तद्वत पश्यतम् ॥ ५५ ॥
ततोऽङ्गुलीं गलत्पामां, शीर्णां स्वकफविप्रुषा । लिप्तां शुल्वं रसेनेव, द्राक् सुवर्णीचकार सः ॥ ५६ ॥
ततस्तामङ्गुलीं स्वर्णशलाकामिव भास्वतीम् । आलोक्य पादयोस्तस्य, पेततुः प्रोचतुश्च तौ ॥ ५७ ॥
निरूपयिषू रूपं यौ त्वामायातपूर्व्विणौ । तावेव त्रिदशावावां सम्प्रत्यपि समागतौ ॥ ५८ ॥
सिद्धलब्धिरपि व्यधि—बाधां सोढा तपस्यति । सनत्कुमारो भगवानितीन्द्रस्त्वामवर्णयत् ॥ ५९ ॥
आवाभ्यां तदिहागत्य, प्रत्यक्षेण परीक्षितम् । इत्युदित्वा च नत्वा च, त्रिदशौ तौ तिरोहितौ ॥ ६० ॥
एतन्निदर्शनमात्रं, कफलब्धेः प्रदर्शितम् । लब्ध्यन्तरकथा नोक्ता, ग्रन्थगौरवभीरुभिः ॥ ६१ ॥
योगिनां योगमाहात्म्यात्पुरीषमपि कल्पते । रोगिणां रोगनाशाय, कुमुदामोदशालि च ॥ ६२ ॥

मलः किल समाम्नातो द्विविधः सर्व्वदेहिनाम् । कर्णनेत्रादिजन्मैको द्वितीयस्तु वपुर्भवः ॥ ६३ ॥
योगिनां योगसम्पत्तिमाहात्म्याद्द्विविधोऽपि सः । कस्तूरिकापरिमलो रोगहा सर्व्वरोगिणाम् ॥ ६४ ॥
योगिनां कायसंस्पर्शः सिञ्चन्निव सुधारसैः । क्षिणोति तत्क्षणं सर्वानामयानामयाविनाम् ॥ ६५ ॥
नखाः केया रदाश्चान्यदपि योगिशरीरगम् । भजते भेपजीभावमिति सर्व्वौपधिः स्मृता ॥ ६६ ॥
तथाहि तीर्थनाथानां योगभृच्चक्रवर्त्तिनाम् । देहास्थिसकलस्तोमः सर्व्वस्वर्गेपु पूज्यते ॥ ६७ ॥

इति श्री मुद्रितउयोगशास्त्रवृत्तितः उद्धृतं

इति श्रीसनत्कुमारचरित्रम् संपूर्णम्

७ श्रीभरतचक्रि चरित्रम्

अत्रैव भरते शक्रा—ज्ञया श्रीदेन निर्मिता । अस्त्ययोध्यापुरी स्वर्ग-–प्रतिस्पर्द्धिसमृद्धिका ॥ १ ॥
प्रथमः प्रथितः पृथ्व्यां, पुत्रः श्रीवृपभप्रभोः । सार्वभौमोऽभवत्तत्र, भरतो भरतेश्वरः ॥ २ ॥
चतुर्दशानां रत्नानां, विभुर्नवनिधिप्रभुः । द्वात्रिंशता सहस्रैर्भू—भुजां सेवितपत्कजः ॥ ३ ॥
लक्षैश्चतुरशीत्याऽश्व—रथेभानां समाश्रितः । ग्रामाणां च पदातीनां, कोटिप्पण्णवतेः पतिः ॥ ४ ॥
लोकैर्द्वात्रिंशत्सहस्र—देशानां धृतशासनः । सत्पत्तनसहस्राणां, द्विश्चतुर्विंशतेर्विभुः ॥ ५ ॥

सहस्रोनं द्रोणमुख--लक्षं च परिरक्षयन् ॥ ६ ॥

द्वासप्ततेः श्रेष्ठपुर--सहस्राणामधीश्वरः । सहस्रोनं द्रोणमुख--लक्षं च परिरक्षयन् ॥ ७ ॥

गुह्यकानां षोडशभिः, सहस्रैः सेवितोऽनिशम् । षट्खण्डं भरतक्षेत्र--मखण्डाज्ञः प्रपालयन् ॥ ८ ॥

चतुष्षष्टिसहस्रान्तः--पुरस्त्रीभिः सहान्वहम् । क्रीडन् पूर्वोक्तपूर्व्य--पुष्पाभं सौख्यमाश्रयन् ॥ ९ ॥

ऋषभस्वामिनिर्वाणा--स्पदेऽष्टापदपर्वते । चैत्ये स्वकारिते भक्त्या, जिनबिम्बानि पूजयन् ॥ १० ॥ (अष्टभि कुलकम्)

साधर्मिकाणां वात्सल्यं, कुर्वन्नाश्रितवत्सलः । पूर्वलक्षाणि षट् क्षोणी--हर्यश्वः सोऽत्यवाहयत् ॥ ११ ॥

अन्यदा प्रातरभ्यक्तो--द्वर्त्तितस्नपिताङ्गकः । आदर्शसदनं सोऽगा--त्सर्वालङ्कारभूपितः ॥ १२ ॥

तत्राऽऽत्मदर्शे महति, पश्यंश्चक्री निजं वपुः । अष्टाङ्गुलीयकामेकां, ददर्श स्वकराङ्गुलीम् ॥ १३ ॥

अशोभमानां तां प्रेक्ष्य, प्रेक्षावान् क्ष्माधवाग्रणीः । सकलानप्यलङ्कारा--नेकैकमुदतारयत् ॥ १४ ॥

तत उज्झितपाथोजं, पद्माकरमिवाऽऽत्मनः । विलोक्य वपुरश्रीक--मिति दध्यौ धराधवः ॥ १५ ॥

अहो ! आगन्तुकैरेव--द्रव्यैरङ्गं विराजते । स्वाभाविकं तु सौन्दर्यं, किमप्यस्य न दृश्यते ! ॥ १६ ॥

स्वरूपासारतां वक्ति, यस्य संस्कारसारता । मोहादेव तदप्यङ्गं, जना जानन्ति मञ्जुलम् ! ॥ १७ ॥

मनोज्ञमप्यन्नपान--पुष्पगन्धांशुकादिकम् । विनश्यत्यस्य सङ्गेन, ब्रह्मचर्यमिव स्त्रियाः ॥ १८ ॥

तदहो निर्विवेकत्वं, विदुषामपि बालवत् । ये देहस्येदृशस्यापि, कृते पापानि कुर्वते ॥ १९ ॥

तन्मोक्षदायि मानुष्यं, शरीरार्थेन पाप्मना । द्यूतेनेव द्युसद्रत्नं, युक्तं नाशयितुं न मे ॥ २० ॥

ध्यायन्नित्यादि सम्प्राप्तः, संवेगमधिकाधिकम् । आरूढः क्षपकश्रेणीं निश्रेणीं, शिवसद्मनः

घनघातिक्षयं कृत्वा भावचारित्रमाश्रितः । अज्ञानतिमिरादित्यं, केवलज्ञानमाप सः ॥ २१ ॥ (युग्मम्)
कृत्वालोचं शक्रदत्तं, मुनिवेशं दधत्ततः । निर्जगाम गृहाच्चक्रि–साधुर्भानुरिवाम्बुदात् ॥ २२ ॥
तमुपात्तव्रतं वीक्ष्य, क्षामसंसारवासनाः ॥ भूपा दश सहस्राणि, दीक्षामाददिरे मुदा ! ॥ २३ ॥
ततः शक्रादयो देवा–स्तं नत्वा स्वाश्रयं ययुः ॥ भुवि व्यहार्षीद्भगवा–नपि भव्यान् प्रबोधयन् ॥ २४ ॥
सप्तसप्ततिलक्षाणि, पूर्वाणां भरतप्रभोः । कौमारे मण्डलित्वे तु, सहस्रं शरदामभूत् ॥ २५ ॥
चक्रित्वेऽष्टसहस्रोनाः, पूर्वलक्षा रसोन्मिताः । पूर्वाणां लक्षमेकं तु, केवलीत्वे व्रतेऽपि च ॥ २६ ॥
सर्वायुषा चतुरशीतिमितानि पूर्व–लक्षाणि सम्यगतिगम्य महेन्द्रनम्यः ॥
कर्मक्षयेण भरतेश्वरसाधुराजो, भेजे महोदयरमामुदितोदितश्रीः ॥ २७ ॥

इति श्री मुद्रित–उत्तराध्ययनाष्टादशमध्ययनवृत्तितः उद्धृतम्

इतिं श्रीभरतचक्रिचरित्राम् संपूर्णम्

८ श्रीमघवचक्रिचरित्रम्

अभूदिहैव भरते, महीमण्डलसत्पुरे । वासुपूज्यप्रभोस्तीर्थे, नाम्ना नरपतिर्नृपः ॥ १ ॥
स्वप्रजावत् प्रजाः सम्यक्, पालयित्वा चिरं स राट् । संत्यज्य राज्यमन्येद्यु–र्विरक्तो व्रतमाददे ॥ २ ॥

अप्रमत्तश्चिरं दीक्षां, पालयित्वा विपद्य च । अहमिन्द्रः स गिर्वाणो, मध्यग्रैवेयकेऽभवत् ॥ ३ ॥
इतश्चात्रैव भरते, श्रावस्त्यां पुरि भूपतिः । श्रिया समुद्रविजयी, समुद्रविजयोऽभवत् ॥ ४ ॥
तस्या भार्याऽभवद्भद्रा, भद्राकारजितामरी । सोऽथ देवोऽन्यदा च्युत्वा, तस्याः कुक्षाववातरत् ॥ ५ ॥
चतुर्दशमहास्वप्नां—स्तदा च प्रेक्ष्य सा मुदा । राज्ञे जगाद चक्री ते, सुतो भावीति सोऽप्यवक् ॥ ६ ॥
क्रमाच्च सुषुवे पुत्रं, राज्ञी पूर्वेव भास्करम् । महोत्सवैर्नृपस्तस्य, मघवेत्यऽभिधां व्यधात् ॥ ७ ॥
संप्राप्तः सोऽथ तारुण्यं, दत्तराज्यो महीभुजा । उत्पन्नचक्रः षट्खण्डं, साधयामास भारतम् ॥ ८ ॥
भुक्त्वा चिरं चक्रिरमां विरक्तः, प्रान्ते परिव्रज्य स चक्रवर्ती । पंचाब्दलक्षीमतिवाह्य सर्वा—ऽऽयुषो सुरोऽभूत्त्रिदिवे तृतीये ॥९॥

इति श्रीमुद्रितउत्तराध्ययनाष्टादशमध्ययनवृत्तितः उद्धृतं

इति श्रीमघवचक्रिचरित्रकथा संपूर्णा

९ श्री जयचक्रि चरित्रम्

अत्रैव भरते सम्पद्—गृहे राजगृहे पुरे । यशः सुधासमुद्रोऽभू—त्समुद्रविजयो नृपः ॥ १ ॥
पुण्यलावण्यतारुण्या, —शीलालङ्कारशालिनी । वप्रः शालिगुणालीनां, वप्रा तस्य प्रियाऽभवत् ॥ २ ॥
द्विः सप्ततिर्महास्वप्नैः, सूचितोऽभूत्सुतस्तयोः । जयाह्वयो जयन्तस्य, जयन् रूपं वपुःश्रिया ॥ ३ ॥

कलिन्दिकासुधाः पीत्वा, क्रमाद्यौवनमाश्रितः । स द्वादशधनुस्तुङ्गः, पित्र्यां राज्यधुरां दधौ ॥ ४ ॥
जातचक्रादिरत्नश्च, जितषट्खण्डभारतः । बुभुजे रमणीरत्न—मिव चक्रिरमां चिरम् ॥ ५ ॥
स चान्यदा भवोद्विग्नः, संविग्नस्यान्तिके गुरोः । राज्ये निधाय तनयं, सनयं प्राव्रजत्स्वयम् ॥ ६ ॥
सर्वायुषा त्रीनतिगम्य सम्यक्, समासहस्रान् जयचक्रवर्ती ॥
तपोऽनिलैः कर्मघनानपास्य, प्राप्योत्तमं ज्ञानमवाप मुक्तिम् ॥ ७ ॥

इति श्रीमुद्रित—उत्तराध्ययनाष्टादशमध्ययनवृत्तितः उद्धृता

इति श्री जयचक्रिकथा संपूर्णा

१० श्रीहरिषेणचक्रिकथा

अत्रैव भरतक्षेत्रे, पुरे काम्पील्यनामनि । महाहरिरभूद्भूमा——मेराह्वाना च तत्प्रिया ॥ १ ॥
हरिषेणस्तयोर्विश्वा—नन्दनो नन्दनोऽभवत् । चतुर्दशमहास्वप्न——सूचितोऽस्वप्नजिन्महाः ॥ २ ॥
कलाकलापमापन्नो, वर्द्धमानः शशीव सः । चापपंचदशोत्तुङ्गः, पुण्यं तारुण्यमासदत् ॥ ३ ॥
राज्यं प्राज्यं पितुः प्राप्य, तस्य पालयतः सतः । रत्नान्युत्पेदिरेऽन्येद्यु——श्चक्रादीनि चतुर्दश ॥ ४ ॥
ततः स साधयामास, षट्खंडमपि भारतम् । जातचक्रित्वाभिषेको, भोगांश्च बुभुजे चिरम् ॥ ५ ॥

भववासाद्विरक्तोऽथ, लघुकर्मतयाऽन्यदा । सोऽभ्यासीदित्यसौ सम्पत्, प्राक्पुण्यैः सञ्जातास्ति मे ॥ ६ ॥
पुण्यार्जनाय भूयोऽपि, प्रयत्नं विदधे ततः । विनार्जनां हि क्षपिते, मूले स्याद्दुःस्थता भृशम् ! ॥ ७ ॥
ध्यात्वेति तनयं न्यस्य, राज्ये स व्रतमाददे । कर्मकक्षमधाक्षीच्च, सत्तपोजातवेदसा ॥ ८ ॥
समासहस्राणि दशातिवाह्य, सर्वायुषा श्रीहरिषेणचक्री । घातिक्षयाज्ज्ञानमनन्तमाप्य, भेजे महानन्दमनिंद्यकीर्त्तिम् ॥९॥

इति श्री मुद्रित–उत्तराध्ययनाष्टादशमध्ययनवृत्तितः उद्धृता

इति श्री हरिषेणचक्रिकथा संपूर्णा

११ श्री उदयनराजर्षिकथा चरित्रम्

अन्यदोदायननृपः, पौषधौकसि पौषधी । धर्मजागरिकां जाग्र–द्रजन्यामित्यचिन्तयत् ॥ १ ॥
धन्यास्ते नगरग्रामा–करद्रोणमुखादयः । पवित्रयति यान् श्रीमान् वर्द्धमानो जगद्गुरुः ! ॥ २ ॥
श्रुत्वा वीरविभोर्वाणीं, श्राद्धधर्मं श्रयन्ति ये । दीक्षामाददते ये च, धन्यास्तेऽपि नृपादयः ! ॥ ३ ॥
तच्चेत्पुनाति पादाभ्यां, पुरं वीतभयं विभुः । तदा तदन्तिके दीक्षा–मादाय स्यामहं कृती ! ॥ ४ ॥
तच्च तच्चिन्तितं ज्ञात्वा, चम्पातः प्रस्थितः प्रभुः । एत्य वीतभयोद्याने, समवासरदन्यदा ॥ ५ ॥
श्रुत्वाऽथ नाथमायात–मुदायननृपो मुदा । गत्वा नत्वा देशनां च, निशम्येति व्यजिज्ञपत् ॥ ६ ॥

राज्यमङ्गजसात्कृत्वा, व्रतार्थं युष्मदन्तिके। यावदायाम्यहं ताव—त्पावनीयमिदं वनम् ॥ ७ ॥
प्रतिबन्धं मा कृथास्त्व—मित्युक्तः स्वामिना ततः। उदायनो जिनं नत्वा, गृहं गत्वेत्यचिन्तयत् ॥ ८ ॥
सुतायाभीचये राज्यं, यदि दास्यामि साम्प्रतम्। तदाऽसौ मूर्छितस्तत्र, भ्रमिष्यति भवे चिरम्! ॥ ९ ॥
आपातसुन्दरं राज्यं, विपाके चातिदारुणम्। तदिदं न हि पुत्राय, दास्ये विषफलोपमम्! ॥ १० ॥
ध्यात्वेति राज्ये विन्यस्य, जामेयं केशिनं नृपः। जिनोपान्ते प्रवव्राज, केशिराजकृतोत्सवः ॥ ११ ॥
तपोभिरुपवासाद्यै—र्मासान्तैरतिदुष्करैः। शोषयन्कर्म कायं च, राजर्षिर्विजहार सः ॥ १२ ॥
अन्यदा तद्वपुष्यन्त—प्रान्ताहारैरभूद्रुजा। भिषजो भेषजं तस्या, रुजोऽभिदधिरे दधि ॥ १३ ॥
उदायनमुनिश्रेष्ठो, गोष्ठेषु व्यहरत्ततः। दधिभिक्षा हि निर्दोषा, तेष्वेव सुलभा भवेत् ॥ १४ ॥
पुरे वीतभयेऽन्येद्यु—रुदायनमुनिर्ययौ। केशिभूपस्तदामात्यै—रित्यूचेऽहेतुवैरिभिः ॥ १५ ॥
परिषहैर्जितो नूनं, मातुलस्तव भूपते!। राज्यलिप्सुरिहायासी—त्ततो मा तस्य विश्वसीः! ॥ १६ ॥
केश्यूचे राज्यनाथोऽसौ, राज्यं गृह्णातु किं मम?। धनेशे गृह्णति द्रव्यं, वणिक्पुत्रस्य किं रुषा? ॥ १७ ॥
अभ्यधुर्धीसखा धर्मः, क्षत्रियाणां न खल्वयम्। प्रसह्य गृह्यते राज्यं, राजन्यैर्जनकादपि! ॥ १८ ॥
प्रतिदद्या न तद्राज्यं, प्रत्यदान्न हि कोऽपि तत्। तैरित्युक्तस्ततः केशी, किं कार्यमिति पृष्टवान् ॥ १९ ॥
दुष्टास्ते प्रोचुरेतस्मै, विषं दापय केनचित्। व्युद्ग्राहितस्तैस्तदपि, प्रतिपेदे स मन्दधीः! ॥ २० ॥
ततः कयाचिदाभीर्या, स भूपः सविषं दधि। तस्मै दापितवांस्तस्मा—द्विषं चापाहरत्सुरी ॥ २१ ॥

विषमिश्रदधिप्राशि–स्तव तन्मा ग्रहीस्ततः । इत्यूचे च मुनिं देवी, ततः सोऽपि तदत्यजत् । ॥ २२ ॥
विना दधि व्याधिवृद्धौ, भूयः साधुस्तदाददे । तद्विषं च सुरी प्राग्व–ज्जहार व्याजहार च ॥ २३ ॥
तृतीयवारमप्येवं, देवताऽपाहरद्विषम् । तद्भक्तिरागविवशा–ऽप्रमत्तत्प्रमुतश्च सा । ॥ २४ ॥
अन्यदा च प्रमत्तायां, देव्यां सविषमेव सः । बुभुजे दधि भाव्यं हि, भवत्येव यथातथा । ॥ २५ ॥
ततोऽङ्गव्याकुलतया, ज्ञात्वाऽऽत्मानं विषाशिनम् । चकारानशनं साधुः, समतारससागरः । ॥ २६ ॥
त्रिंशद्दिनान्यनशनं, पालयित्वा समाहितः । केवलज्ञानमासाद्य, स राजर्षिः शिवं ययौ ॥ २७ ॥

इति श्री मुद्रित–उत्तराध्ययनाष्टादशमध्ययनवृत्तितः उद्धृता

इति श्री उदयनराजर्षिकथा संपूर्णा

१२ श्री कपिलकेवलिकथा

तथाहि पुर्यां कौशाम्ब्यां जितशत्रुमहीशितुः । पुरोधाः काश्यपाह्वोऽभू–द्विद्याम्भोनिधिपारगः ॥ १ ॥
यशस्विनीयशा नाम्नी, तस्यासीत्प्राणवल्लभा । अजनिष्ट तयोः सूनुः क्रमेण कपिलाभिधः ॥ २ ॥
कपिले च शिशावेव, विपेदे काश्यपोऽन्यदा । कालः कालमकालं वा, न हि मृत्योरपेक्षते ॥ ३ ॥
मृते तस्मिन्नृपोऽन्यस्मिन्, पुरोहितपदं न्यधात् । अस्तङ्गते रवौ तेजः, प्रदोष इव दीपके ॥ ४ ॥

हयारूढं धृतच्छत्रं तं नूतनपुरोहितम् । गच्छन्तमन्यदाऽपश्य-द्यशा भूरिपरिच्छदम् ॥ ५ ॥
तद्दर्शनानिलोद्भूत-भूरिदुःखानलार्दिता । स्मारं स्मारं निजं कान्तं, रुरोद विवशा यशा ॥ ६ ॥
कपिलोऽपि निजामम्बां, रुदतीं वीक्ष्य दुःखितः । रुदन्नित्यवदन्मात---स्त्वं रोदिषि कुतोऽनिशम् ॥ ७ ॥
साऽवादीदस्य विप्रस्य, या सम्पत् पुत्र ! वर्त्तते । साऽभवत्त्वत्पितुः सर्वा, गता च त्वयि निर्गुणे ॥ ८ ॥
सत्यपि त्वयि पुत्रे यत्, क्रमायाताऽप्यऽगाद्रमा । ततोऽहं दुःखिता कुर्वे, रोदनं नन्दनाऽन्वहम् ॥ ९ ॥
सुतः प्रोचे ब्रूहि मात-र्विद्याभ्यासाय पाठकम् । यथा तदन्तिकेऽधीत्य, भवामि गुणवानहम् ॥ १० ॥
यशाऽशंसन्न कोऽप्यत्र, भवन्तं पाठयिष्यति । यो हि त्वां पाठयेत्तस्मै, कुप्येन्नव्यपुरोहितः ॥ ११ ॥
तद्वत्स ! गच्छ श्रावस्तीं, तत्रास्ति त्वत्पितुः सुहृत् । इन्द्रदत्तद्विजः प्राज्ञः, स हि त्वां पाठयिष्यति ॥ १२ ॥
ततः स गत्वा श्रावस्ती-मिन्द्रदत्तं प्रणम्य च । आत्मानं ज्ञापयित्वोचे, ताताऽध्यापय मामिति ॥ १३ ॥
उपाध्यायोऽभ्यधाद्वत्स !, युक्तस्तेऽसौ मनोरथः । विशेषं नह्यहं कञ्चित्, पश्यामि पशुमूढयोः ॥ १४ ॥
किन्तु ते भोजनं दातुं, निःस्वत्वादक्षमोऽस्म्यहम् । तद्विना च कथं नित्य-मखिन्नस्त्वं पठिष्यति ? ॥ १५ ॥
भ्रातुष्पुत्राय ते विद्या-र्थिने प्राघुर्णकाय च । भोज्यदानेऽप्यशक्तोऽस्मि, तन्मे दुःखायते भृशम् ! ॥ १६ ॥
अलपत्कपिलस्तात !, कृतं चिन्तनयाऽनया । भिक्षावृत्त्या करिष्येऽहं, प्रत्यहं प्राणधारणम् ॥ १७ ॥
उवाच पाठको भिक्षा-वृत्त्याऽध्येतुं न शक्यते । तदेहि तव भुक्त्यर्थं, प्रार्थये कञ्चिदीश्वरम् ॥ १८ ॥
इत्युक्त्वा स समं तेन, शालिभद्रेभ्यमन्दिरम् । जगाम कुञ्जर इव, कलभेन समं सरः ॥ १९ ॥

ॐभूर्भुवःस्वरित्यादि–गायत्रीमंत्रवादिनम् । दत्ताशिषं तमिभ्योऽपि, किंकार्यमिति पृष्टवान् ।। २० ॥
ऊचे द्विजोऽमुं मन्मित्र–पुत्रमध्येतुमागतम् । भोजय प्रत्यहं ज्ञानो–पष्टम्भो हि महाफलः ॥ २१ ॥
सहर्षं शालिभद्रेण, तद्वाक्ये स्वीकृतेऽन्वहम् । पपाठ पाठकोपान्ते, भुक्त्वा तद्धाम्नि माणवः ॥ २२ ॥
भोक्तुञ्जतस्य तद्गेहे, कपिलस्यानुवासरम् । दास्येका तरुणी भोज्यं, शोभनं पर्यवेषयत् ॥ २३ ॥
तस्य विद्याभिरात्मानं, भोज्यैरङ्गञ्च पुष्णतः । उदभूद्यौवनं दाक्ष्या–ङ्कुरोज्जीवनजीवनम् ॥ २४ ॥
हास्यशीलो द्विजः सोऽथ, तस्यां दास्यामरज्यत । यौवनं हि विकाराणां, सर्वेषामादिकारणम् ॥ २५ ॥
तया च रक्तया सार्कं, कपिलोऽरमताऽनिशम् । तदेकचित्ता तञ्चैव -मूचे दारयन्यदा रहः ॥ २६ ॥
त्वमेव मे प्रियः किन्तु, निःस्वोऽसीत्यपरं नरम् । सेवे वस्त्रादिहेतोश्चे--न्न ते कोपः प्रजायते ॥ २७ ॥
अन्वमन्यत निर्मन्यु–स्तत्रार्थे कपिलोऽपि ताम् । तस्यां पुर्याञ्चान्यदाऽऽसी--द्दासीनामुत्सवो महान् ॥ २८ ॥
तदा च प्रेक्ष्य तां दासी--मुद्विग्नां कपिलो द्विजः । कुतस्तवारतिरिति, पप्रच्छ स्नेहमोहितः ॥ २९ ॥
साऽवादीदद्य दासीना-मुत्सवः समुपस्थितः । न च मे पत्रपुष्पादे-र्मूल्यं किञ्चन विद्यते ! ॥ ३० ॥
तद्विना तु सखीमध्ये, लप्स्येऽहं विगोपनाम् । सश्रियो हि स्त्रियो निःस्वां, हीलयन्ति सखीमपि ॥ ३१ ॥
तच्छ्रुत्वा कपिलोप्यन्त–रधृताऽधृतिमुच्चकैः । याति स्थानान्तरं दुःखं, प्रीत्या वारीव कुल्यया ॥ ३२ ॥
ततस्तमवदद्दासी, सुन्दर ! त्वं विषीद मा। अत्रास्ति श्रेष्ठिषु श्रेष्ठो, धनाख्यो धनदोपमः ॥ ३३ ॥
यस्त्वं प्रबोधयेत्सुप्तं, स तस्मै स्वर्णमाषकौ । ददातीति निशाशेषे, याहि त्वं तस्य मन्दिरे ॥ ३४ ॥

कल्पकाले च कल्याणिन्, कान्तैः कल्याणभाषितैः । प्रबोधयेस्तं राजीव–मिवार्कः कोमलैः करैः ॥ ३५ ॥
इत्युक्त्वा कश्चिदन्यः प्राग्, मा यासीदिति शङ्कया । औत्सुक्याज्ञातकाला सा, निशीथे प्रजिघाय तम् ॥ ३६ ॥
स च राजनरैश्चौर, इति बद्धः पथि व्रजन् । प्रसेनजिन्महीजानेः, पुरः प्रातरनीयत ॥ ३७ ॥
राज्ञा पृष्टश्च वृत्तान्तं, सर्वं सत्यं जगौ निजम् । तच्छ्रुत्वेत्यभ्यधाद्भूपः कृपारसमहोदधिः ॥ ३८ ॥
यन्मार्गयसि तत्तुभ्यं, ददामि वद कामितम् । स्वामिन् विचार्य याचिष्ये, प्रोवाचेति ततो द्विजः ॥ ३९ ॥
सोऽथ राज्ञाभ्यनुज्ञातो, गत्वाऽशोकवनान्तरे । दध्यौ वस्त्रादिकं भावि, न हि माषद्वयेन मे ॥ ४० ॥
तत्सुवर्णशतं याचे, यद्वा तेनापि नो भवेत् । गृहयानादि तन्निष्क–सहस्रं प्रार्थये नृपात् ! ॥ ४१ ॥
यद्वा तेनापि नापत्य--विवाहादि भविष्यति । तल्लक्षं प्रार्थये दातुः, सत्त्वे किं स्तोकयाच्ञया ॥ ४२ ॥
उद्धारो बन्धुदीनादे--र्लक्षेणापि न सम्भवी । सम्पदां च फलं बन्धु--दीनादीनामुपक्रिया ॥ ४३ ॥
कोटिं कोटिशतं कोटि–सहस्रं वा तदर्थये । तस्येति ध्यायतः पुण्य–वशादियमभून्मतिः ॥ ४४ ॥
माषद्वितयमूलस्याप्य--हो लोभमहीरुहः । विस्फूर्जितं यत्कोटीनां, लाभेऽप्युच्चैः प्रवर्धते ! ॥ ४५ ॥
लोभः स्वल्पोऽपि लाभेना–ऽम्भोजनालमिवाम्भसा । वृद्धिं यातीत्यलं तेन, सन्तोषसुखदस्युना ॥ ४६ ॥
विदेशं मातृनिर्देशा--द्विद्यार्थमहमागतः । सापि नोपार्जिता किन्तु, व्यसनं महदर्जितम् ! ॥ ४७ ॥
मातुर्गुरोश्च वाक्यानि, कुलाचारं च लुम्पता । मया विषयगृद्धेन, कर्मानर्हमिदं कृतम् ! ॥ ४८ ॥
विषवद्विषमोदकै--र्विषयैस्तदलं मम । ध्यायनित्यादिसंवेगा--ज्जातिस्मृतिमवाप सः ॥ ४९ ॥

स्वयंबुद्धः स्वयं कृत्वा, लोचं मूर्धनि शुद्धधीः। देवतादत्तलिङ्गो द्राग्, राज्ञोऽभ्यर्णे जगाम सः ॥ ५० ॥
विमृष्टं किमिति स्पष्टं, पृष्टो राज्ञा विशिष्टधीः। निजां मनोरथश्रेणीं, निवेद्येत्यवदन्मुनिः ॥ ५१ ॥
यथा लाभस्तथा लोभो, लाभाल्लोभः प्रवर्धते। माषद्वयाश्रितं कार्यं, कोट्यापि न हि निष्ठितम्! ॥५२॥
तन्निशम्य नृपस्तुष्टो-ऽवादीन्मुञ्च व्रतम् द्रुतम्। ददामि कोटीमपि ते, भुंक्ष्व भोगान् यथासुखम् ॥ ५३ ॥
मुनिः स्माह कृतं द्रव्यै-रसारैर्निस्पृहस्य मे। जातो निर्ग्रन्थ एवाहं, धर्मलाभोऽस्तु भूपते! ॥ ५४ ॥
इत्युक्त्वा भूभुजोऽभ्यर्णा-न्निर्गत्योग्रं तपश्चरन्। विचरन् भुवि षण्मास्या, केवलज्ञानमाप सः ॥ ५५ ॥
इतश्च योजनान्यष्टा-दश सर्वत्र विस्तृता। अटव्येकाऽभवद्राज-गृहाभिधपुराध्वनि ॥ ५६ ॥
तत्र चेत्कटदासाख्या-श्चौराः पञ्चशतीमिताः। बलभद्रादयोऽभूवन्, पाताले पन्नगा इव ॥ ५७ ॥
विज्ञाय प्रतिबोधार्हा-स्तांश्च विज्ञानचक्षुषा। तेषामुपकृतिं कर्तुं, तत्रारण्ये ययौ यतिः ॥ ५८ ॥
तमायान्तं द्रुमारूढो-ऽपश्यदेको मलिम्लुचः। आयाति श्रमणः कोपी-त्यन्येषाञ्च न्यवेदयत् ॥ ५९ ॥
अस्मानवगणय्यैव, समेत्ययमिति क्रुधा। गृहीत्वा ते मुनि निन्यु-रुपसेनापतिं द्रुतम् ॥ ६० ॥
ऊचे सेनापतिः क्रीडां, कुर्मोऽनेनेति चिन्तयन्। साधो! त्वं नृत्य नृत्येति, ततो यतिरदोऽवदत् ॥ ६१ ॥
वाद्यं नृत्यस्य हेतुस्त-द्वादकश्च न विद्यते। तन्नृत्यं स्यात्कथं? कार्यं, न हि स्यात् कारणं विना ॥ ६२ ॥
वादितेष्वथ तालेषु, चौराणां पञ्चभिः शतैः। ध्रुवकानुच्चकैर्गाय-न्ननर्त कपिलो मुनिः ॥ ६३ ॥

तद्यथा—"अधुवे असाययंमि संसारंमि उ दुक्खपउराए ।
किं नाम होज्ज तं कम्मयं, जेणाहं दुग्गइं न गच्छेज्जा ॥ ६४ ॥
प्रतिध्रुवमिमं गायन्, ध्रुवं कपिलकेवली । जगौ सूरीन् ध्रुवान् शान्त-रसपीयूषसागरान् ॥ ६५ ॥
एतदध्ययनं जज्ञे, तैरेव ध्रुवकैर्ध्रुवम् । शास्त्रत्वं प्रतिपद्यन्ते, वचांस्यपि हि तादृशाम् ॥ ६६ ॥
तेषु चाद्यं ध्रुवं श्रुत्वा, केप्यबुध्यन्त दस्यवः । केचित्त्वन्यं केचिदन्य-तरं तदपरे परम् ॥ ६७ ॥
इत्थं मुनीन्द्रः प्रतिबोध्य तूर्ण-मदीक्षयत्पञ्चशतानि चौरान् । विहृत्य पृथ्व्यां सुचिरं क्रमाच्च, बभूव निर्वाणपुराधिवासी ॥ ६८ ॥

इति श्री मुद्रितउत्तराध्ययनसप्तमाध्ययनवृत्तितः उद्धृता

श्री कपिलकेवलीकथा संपूर्णा.

१३ श्री हालिककथा

भो भव्या ! यदि वः शिव जिगमिषा सम्यक्त्वमेकं तदा, स्वस्वान्ते ध्रियतां स्थिरं किमपरैर्बाह्यक्रियाडम्बरैः ।
अन्तःसागरकोटिकोटिविहितायुर्वर्जकर्मस्थितौ, यल्लभ्यं प्रतिभूश्च मोक्षविषये तस्मिन् कथं नादरः ? ॥ १ ॥
बलादपि श्राद्धजनस्य दीयते, सद्दर्शनं सर्वसुखैकजन्मभू । व्यदीधपद्वीरजिनस्तदुद्यमं, श्रीगौतमेनापि न किं कृषीवले ? ॥
एकदा श्रीमहावीरः, कल्पद्रुरिव जङ्गमः । कुर्वन् विहारं प्रोवाच, मार्गे श्रीगौतमं प्रति ॥ १ ॥

त्वत्तस्तस्य महांल्लाभो, भावी तद्गच्छ सत्वरम् ॥ २ ॥
यः पुरः प्रेक्ष्यते वत्स !, वराकोऽयं कृपीवलः । समाधिस्तव वर्तते ॥ ३ ॥
तत्तथेति प्रतिपद्य, गौतमस्तत्र जग्मिवान् । आलापितो हली भद्र !, दुर्बलौ मा कदर्थय ॥ ४ ॥
कस्मात्करोषि पापानि, हलं वाहयसि मुधा । वराकौ वृषभावेतौ, तदुत्तर भवाम्बुधिम् ॥ ५ ॥
कथं पापकुटुम्बार्थ—मात्माऽनर्थे निपात्यते ? । तपस्यापोतमादाय, रभूदिति च तं जगौ ॥ ६ ॥
इति तद्वाक्यपीयूषै—र्दवदग्ध इव द्रुमः । सिक्तः समुल्लसत्प्रीति—सन्ति मे सप्त कन्यकाः ॥ ७ ॥
अहं विप्रो वसाम्यत्रा—ऽऽसन्नग्रामेऽतिनिर्द्धनः । पापश्रेण्य इवाध्यक्षाः, मूढैः किं न विधीयते ? ॥ ८ ॥
वज्राग्निकल्पा पत्नी मे, तया दग्धः करोमि किम् ? । दुष्पूरोदरपूर्त्यर्थं, करिष्ये नान्यथा वचः ॥ ९ ॥
अतः परं त्वमेवासि, भ्राता माता पिताऽथवा । यदादिशसि तत् कुर्वे, गौतमोऽभिजिनं मुदा ॥ १० ॥
ततोऽर्पितः साधुवेषः, स्वीचक्रे सोऽपि तं तदा । चचाल तं सहादाय, ये पूज्यास्ते तु कीदृशाः ? ॥ ११ ॥
सोऽवादीद्गम्यते कुत्र ?, गुरवो यत्र सन्ति मे । भवतामपि पूज्यानां, समृद्धेरवलोकनात् ॥ १२ ॥
तस्याग्रेऽर्हद्गुणाः प्रोक्ता—स्तेन सम्यक्त्वमर्जितम् । विशिष्य तु जिनेन्द्रस्य, कोऽप्यभूदतिदारुणः ॥ १३ ॥
क्रमेण यावदद्राक्षीत्, श्रीवीरं सपरिच्छदम् । तावत्तस्य हृदि द्वेषः, —त्तदा मे न प्रयोजनम् ॥ १४ ॥
गौतमः प्राह वन्दस्व, श्रीजिनं सोऽपि तं जगौ । अयं गुरुस्त्वदीयश्चे—मुष्टिं बध्वा प्रनष्टवान् ॥ १५ ॥
गृहाण वेषं यास्यामि, शिष्यो नास्मि तवाप्यहम् । इत्युक्त्वा त्यक्तवेषोऽसौ, वरीयानिन्द्रभूतिना ॥ १६ ॥
हसन्ति सर्वेऽपीन्द्राद्या—स्तादृक्तच्चेष्टितेक्षणात् । अहो ! उपार्जितः शिष्यो,

पप्रच्छ गौतमो वीरं, मनाग् लज्जितमानसः । किमिदं कारितं स्वामिन् !, तत्त्ववार्त्तां निवेदय ॥ १७ ॥
ग्रन्थिभेदः कृतोऽनेन, वत्सार्हद्गुणचिन्तनैः । लाभस्तवाभूदस्यैष, द्वेषो यन्मयि तत् शृणु ॥ १८ ॥
पुरा पोतनकग्रामे, प्रजापतिनृपाङ्गजः । अभूवं वासुदेवोऽहं, त्रिपृष्ठ इति विश्रुतः ॥ १९ ॥
अश्वग्रीवो महाराज—स्तदा प्रत्यर्द्धचक्रयभूत् । त्रिपृष्ठहस्तात्तन्मृत्युं, निमित्तज्ञोऽन्यदाब्रवीत् ॥ २० ॥
त्रिपृष्ठस्योपरि तदा, द्वेषमेष भृशं वहन् । चक्रे तन्मारणोपायान्, विफलास्ते तु जज्ञिरे ॥ २१ ॥
शालिक्षेत्रेऽन्यदा तस्य, सिंहः कोऽपि बलोत्कटः । करोत्युपद्रवं हन्तुं, न केनापि स पार्यते ॥ २२ ॥
तद्वारकेण रक्षन्ति, नृपा मुख्यनृपाज्ञया । प्रजापतिक्षितिपते—रन्येद्युर्वारकोऽभवत् ॥ २३ ॥
निषिध्य पितरं तत्र, त्रिपृष्ठो रक्षितुं ययौ । वेगवत्तरमारुह्य, रथं सारथिसंयुतः ॥ २४ ॥
तेनालापितमात्रोऽसौ, सिंहस्तं प्रत्यधावत । क्षमन्ते पौरुषोपेता, रेकारं किमु भूस्पृशाम् ? ॥ २५ ॥
शुक्तिसंपुटवद्द्वेधा, कृत्वा तस्योष्ठयामलम् । विदार्यार्द्धमृतं चक्रे, सिंहं स प्रौढविक्रमः ॥ २६ ॥
कृतो जयजयाराव, आसन्नव्यन्तरामरैः । निनिन्द स्वं पुनः सिंहो, नृमात्रेण हतो हहा ! ॥ २७ ॥
तदा मधुरया वाचा, सारथिस्तमसान्त्वयत् । भविता वासुदेवोऽयं, रङ्कमात्रमिदं नहि ॥ २८ ॥
पुरुषेन्द्रस्य हस्तेन, चेन्मृतः किं विषीदसि ? । मर्त्यलोके ह्ययं सिंह—स्तिर्यग्योनौ पुनर्भवान् ॥ २९ ॥
इति हृष्टस्तया वाचा, मृतः सिंहः समाधिना । भ्रामं भ्रामं भवाम्भोधौ, ते त्रयोऽप्यभवत्क्रमात् ॥ ३० ॥
त्रिपृष्ठजीवो यः सोऽहं, सिंहजीवः कृषीवलः । भवांश्च सारथेर्जीवः, तदिदं भवनाटकम् ॥ ३१ ॥

त्वया मधुरया वाचा, यदसौ प्रीणितः पुरा । मया हतो वराकस्तु, स्नेहवैरे ततस्त्वमू ॥ ३२ ॥
यास्यत्येप हली तु पुद्गलपरावर्त्तार्द्धमध्ये शिवं, त्वत्तो दर्शनमासवान् द्विघटिकं तेनोद्यमः कारितः ।
श्रुत्वेन्द्रप्रमुखा इति व्यतिकरं जाता दृढा दर्शने, तद्भो भव्यजना ! भवद्भिरपि तच्चित्ते चिरं स्थाप्यताम् ॥ ३३ ॥

इति श्री मुद्रित–उपदेशसप्ततिकाया वृत्तितः उद्धृता

श्रीहालिककथा संपूर्णा

१४ श्री नन्दिमणीकार कथा

भवन्ति पुंसां जिनपादवन्दना–ऽभिसन्धिमात्रादपि सौख्यसम्पदः ।
विवन्दिषुर्वीरजिनं स दर्दुरो–ऽप्यभून्महर्द्धिस्त्रिदशो यथा दिवि ॥ १ ॥

पुरे राजगृहे नन्दि–मणिकारः समृद्धियुक् । श्रीवीराद्धर्ममासाद्य, तमेवं कुरुतेऽन्वहम् ॥ १ ॥
सामायिकप्रतिक्रान्ति–पौषधप्रमुखाः क्रियाः । मुमुक्षुरिव कुर्वाणः, समयं गमयत्यऽसौ ॥ २ ॥
गृहीतपौषधो ग्रीष्मे–ऽन्यदा रात्रौ तृषार्दितः । उपवासत्रयप्रान्ते, स इत्थं ह्यचिन्तयत् ॥ ३ ॥
कापीकूपादिकान् वारि–पूरितान् कारयन्ति ये । तेषामेव प्रशस्या श्रीः, सर्वजन्तूपकारिणी ॥ ४ ॥
पौषधं पारयित्वाथ, प्रातर्निर्मितपारणः । कारयामासिवानेष, वापीमनुपमाकृतिम् ॥ ५ ॥

सत्रागारमठान् देव—कुलानि विपिनानि च । तस्यां द्रव्यव्ययेनापि, सर्वतो निरमापयत् ॥ ६ ॥
तत्रासक्तमना धर्म्मे, सञ्जातशिथिलादरः । प्रान्ते तु षोडशासाध्य--व्याधिपीडाविसंस्थुलः ॥७॥ षोडश रोगाश्चेवमुक्ताः—
कासे १ सासे २ जरे ३ दाहे ४ कुच्छिसूले ५ भगंदरे ६ अरसा ७ अजीरए ८ दिट्ठी ९ पुट्ठिसूले १० अरोअए ११ ॥१॥
कंडू १२ जलोअरे १३ सिस १४ कन्नवेअण १५ कुट्ठए १६ । सोल एए महारोगा, आगमंमि विआहिआ ॥ २ ॥
वापीविमोहितस्वान्तो, मृत्वा तस्यामभूदयम् । दर्दुरः कर्म्मभिः को न, विडम्ब्येत सुधीरपि ? ॥ ८ ॥
वापीं दृष्ट्वान्यदा जाति -स्मृतिं प्राप स दर्दुरः । अवज्ञातस्य धर्म्मस्य, ही ममाभूदिदं फलम् ॥ ९ ॥
ततो विरक्तः षष्ठादि, कुर्वन् पारणके पुनः । वाप्यामत्ति जनस्नानात्, प्रासुकं मृत्तिकोदकम् ॥ १० ॥
अन्यदोद्यानमायातं, तत्र वीरजिनेश्वरम् । लोकोक्त्या दर्दुरः श्रुत्वा, वन्दितुं निर्ययौ ततः ॥ ११ ॥
अथ श्रेणिकभूपालः, श्रीवीरं नन्तुमुत्सुकः । चलन्परिवृतः सैन्यै—र्नगरान्निरगाद्बहिः ॥ १२ ॥
दर्दुरोऽपि चलन्मार्गे, नृपाश्वखुरमर्दितः । मृत्वा सौधर्म्मकल्पेऽभू—द्दर्दुराङ्काभिधः सुरः ॥ १३ ॥
सामानिकानां चत्वारः, सहस्रास्तस्य जज्ञिरे । सर्वं तदनुमानेन, ज्ञातव्यं सम्पदादिकम् ॥ १४ ॥
तत्राप्यवधिना ज्ञात्वा, वीरं वन्दितुमागतः । अतुच्छच्छविसम्भार—च्छादितापरदीधितिः ॥ १५ ॥
स्वस्वस्थाननिविष्टेषु, शक्रक्ष्मापादिषु प्रभुः । गिरा योजनगामिन्या, प्रारेभे धर्म्मदेशनाम् ॥ १६ ॥
स्थित्वा जिनान्तिकेऽन्येषां, कुष्ठिरूपं च दर्शयन् । व्यलिम्पत वपुर्जैनं, स दिव्यैश्चान्दनैः रसैः ॥ १७ ॥
श्रेणिकाद्यास्तु जानन्ति, कुष्ठी कोऽप्येष दुष्टधीः । आः ! करोति स्वदेहोत्थ—रसिकाभिर्विलेपनम् ॥ १८ ॥

इतो वहिर्गतः पापी, श्रीजिनाशातनाकरः । मारणीयो मया नून—मिति दध्यौ नृपस्तदा ॥ १९ ॥
इतश्च स जिन १ क्ष्माया २–ऽभग ३ शौकरिकान् ४ क्षुतम् । कृतपूर्व्विण ठद्दिश्य, क्रमाद्वाक्यान्यमुन्यवक् ॥२०॥
सद्यो म्रियस्व १ जीव त्वं २, चिरं जीव म्रियस्व वा ३ । मा जीव मा म्रियस्वेति, ४, ततो रुष्टो भृशं नृपः ॥२१॥
देशनान्ते क्षणाचस्मिन्, विद्युदुद्द्योतवद्गते । अप्राक्षीत्भूपतिर्वीरं, कोऽयं कुष्ठी ? प्रभो ! वद ॥ २२ ॥
तवाप्याशातनामेवं, यश्चकारः दुराशयः । एतावत्प्रदायेऽपि, शीर्षच्छेद्यः स निश्चितम् ॥ २३ ॥
जिनोऽप्युवाच राजेन्द्र !, नाऽयमाशातनाकरः । चान्दनेन रसेनैष, किन्तु चक्रे विलेपनम् ॥ २४ ॥
वाक्यानि यानि सोऽवादी–त्तद्भावार्थमपि प्रभुः। उवाच श्रेणिकादीनां, तत्सम्बन्धं च मूलतः ॥ २५ ॥
उक्तं च— केसिं च वरं मरणं, जीवियमन्नेसिमुभयमन्नेसिं । दद्दुरदेविच्छाए, अहियं केसिंवि उभयंपि ॥ १ ॥
इतश्च्युत्वा विदेहेषु, मोक्षमेष गमिष्यति । श्रुत्वेति विस्मयोत्फुल्ला, लोकाः स्वस्वगृहं ययुः ॥ २६ ॥
जिनेशध्यानमात्रस्य, श्रुत्वेति फलमुत्तमम् । तत्रैव क्रियतां यत्नो, निर्वृतिर्नो भवेद्यथा ॥ २७ ॥

इति श्री मुद्रित–उपदेशसप्ततिकाया वृत्तितः उद्धृता

श्री नन्दिमणीकारकथा संपूर्णा

१५ श्री कुमारपालपूजाकथा

अल्पापि पूजा विहिता जिनेशितुः, फलं महत्किं न तनोति देहिनाम् ? ।

कूष्माण्डवल्ली तनुकापि यच्छति, स्फारं फलं स्वाश्रितमानवेषु यत् ॥ १ ॥
गूर्जरत्राभुवि ज्ञातां, कुमारः परमार्हतः । अत्र चौलुक्यभूपालो, दृष्टान्तः परिकीर्त्यते ॥ २ ॥
मालवान्तः क्वचित्पल्लिधा—मभूज्जैत्र इति श्रुतः । क्षत्रियः परलुण्टाक—चरटैः परिवारितः ॥ १ ॥
मुष्णात्यनेकशः सार्थान्, पुष्णाति व्यसनान्यपि । भद्रप्रकृतिरप्येष, चौरसंसर्गदूषितः ॥ २ ॥
अन्यदा जेसलो नाम, सार्थपः क्वापि पत्तने । गच्छन् कथञ्चिद्विज्ञात—श्चरटैस्तैः सुदुर्म्मदैः ॥ ३ ॥
परःशतवणिक्पुत्रै—र्व्यवसायार्थिभिर्युतः । सहस्रैर्दशभिः प्रौढ—पृष्ठ्योढां च सवस्तुभिः ॥ ४ ॥
जैत्रस्तैश्चरटैः सर्वं, सार्थलोकमलुण्टयत् । सार्थपोऽप्युच्छलन्मन्युः, पुनः स्वं नगरं ययौ ॥ ५ ॥
तत्र विज्ञप्य राजानं, तस्यादाय बलं बहु । जघान पल्लीमागत्य, चरटानुत्कटानपि ॥ ६ ॥
जैत्रस्य तनयं बाल—मपि हत्वातिनिर्दयः । वालयित्वा निजं द्रव्यं, पुनः स्वं नगरं ययौ ॥ ७ ॥
बालहत्याविधायित्वा—त्तत्र राज्ञा स तर्जितः । वैराग्यात्तापसीं दीक्षा—मादाय विदधे तपः ॥ ८ ॥
जैत्रोऽथ जीविताकाङ्क्षी, तदानीं सङ्कटात्ततः । नंष्ट्वा कथञ्चिदप्यागा—दुरञ्जलपत्तने ॥ ९ ॥
तत्र निःशम्बलत्वेन, दुःखी दारिद्र्यपीडितः । तस्थौ कर्म्मकरत्वेन, ओढरव्यवहारिणः ॥ १० ॥
श्रीयशोभद्रसूरीणा—मुपदेशमनारतम् । श्रावं श्रावमसौ जज्ञे, सधर्म्महृदयो मनाक् ॥ ११ ॥
न हन्मि जन्तूनिर्मन्तू—न जल्पाम्यनृतं तथा । इत्याद्यभिग्रहांस्तस्य, पार्श्वे जग्राह स क्रमात् ॥ १२ ॥
अन्यदा वार्षिके पर्व—ण्योढरोऽभ्यर्चितुं जिनम् । जैत्रेण सार्द्धं सद्व्रत्नो, जगाम जिनमन्दिरे ॥ १३ ॥

तत्र पूजापरान्वस्त्रा—भरणाद्यैरलङ्कृतान् । लोकानालोक्य जैत्रोऽपि, मनस्येवमचिन्तयत् ॥ १४ ॥
अहो ! प्राक्पुण्ययोगेन, भवेऽत्र सुभगा अमी । आगाम्यपि भवो ह्येषां, भावी भद्रङ्करः खलु ॥१५॥माघऽप्येवमुच्यते—

हरत्यघं सम्प्रति हेतुरेष्यतः, शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं, व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥ १ ॥

विष्णुं प्रति नारदोक्तिः—जिनेन्द्रमहमप्याशु, पूजयामि ततो ध्रुवम् । यतो जिनेन्द्रपूजैव, प्रतिभूः सर्वसम्पदाम् ॥ २ ॥
विमृश्येति पुरा द्यूत—जितैर्नवकपर्दकैः । आत्मीयैरेव पुष्पाणि, गृहीत्वाऽर्चितवान् जिनान् ॥ १६ ॥
शुभाभिसन्धिपूतात्मो—पवासं चापि तद्दिने । व्यधाद्गुरुमुखेनैष, भक्तिरङ्गत्तरङ्गितः ॥ १७ ॥
मृत्वा क्रमात्स सञ्जातो, गूर्जरत्रानरेश्वरः । भूपः कुमारपालाख्यः, श्रावकः परमार्हतः ॥ १८ ॥
ओढरोऽभूदुदयनो, जयसिंहस्तु सार्थपः । हेमसूरिर्यशोभद्रः, एवं ते क्रमशोऽभवन् ॥ १९ ॥
कौङ्कणे च महाराष्ट्रे, कीरे जालन्धरे पुनः । सपादलक्षे मेवाडे, दीपे कासीतटे तथा ॥ २० ॥
कर्णाटे गूर्जरे लाटे, सौराष्ट्रे कच्छसैन्धवे । उच्चायां चैव भम्भेर्यां, मारवे मालवे तथा ॥ २१ ॥
इत्यष्टादशदेशेषु, कलिकालेऽपि कश्मले । प्रावीवृतदमारिं यः, पुरा केनाप्यकारिताम् ॥ २२ ॥ यदुक्तम्—
पूर्वं वीरजिनेश्वरेऽपि भगवत्याख्याति धर्म्मं स्वयं, प्रज्ञावत्यभयेऽपि मन्त्रिणि न यां कर्त्तुं क्षमः श्रेणिकः ।
अक्लेशेन कुमारपालनृपतिस्तां जीवरक्षां व्यधा—द्यस्यास्वाद्य वचः सुधां स जयतु श्रीहेमचन्द्रो गुरुः ॥ १ ॥
स्वस्ति श्रीमति पत्तने नृपगुरुं श्रीहेमचन्द्रं मुदा, स्वःशक्रः प्रणिपत्य विज्ञपयति स्वामिंस्त्वया सुकृतम् ।

चन्द्रस्याङ्कमृगे यमस्य महिषे यादस्सु यादःपते—र्विष्णोर्मत्स्यवराहकच्छपकुले देवाभयं तन्वता ॥ २ ॥
यावज्जीवमिति श्रीम–द्धर्म्मैकच्छत्रतां सृजन् । यो भावी गणभृत्प्राच्यः, पद्मनाभजिनेशितुः ॥२३ ॥
इत्यल्पपूजापि जिनेश्वराणां, भवेदमन्दाभ्युदयैकहेतुः । अतः समग्रेऽपि हि धर्म्मकार्ये, सैवानिशं मुख्यतया विधेया ॥ २४॥

इति श्रीमुद्रित–उपदेशसप्ततिकावृत्तितः उद्धृता

श्री कुमारपालपूजाकथा संपूर्णा

१६ कलिकुण्डतीर्थउत्पत्ति–कथा

चम्पनगर्या आसन्ने, श्वापदश्रेणिभीषणा । कादम्बरीति विख्याता, विद्यते त्रिकटाटवी ॥ १ ॥
कलिनामा महोत्तुङ्ग–स्तस्यामस्ति शिलोच्चयः । तस्याऽधस्तनभूभागे, कुण्डाख्यं च सरोवरम् ॥ २ ॥
तत्स्थानं तद्द्वयीयोगात्, कलिकुण्डमिति श्रुतम् । तीर्थं तु जातं श्रीपार्श्व–चरणाम्भोजपावनात् ॥ ३ ॥
तथाहि वामनः कोऽपि, पुरा क्वापि पुरेऽभवत् । हस्यते प्रत्यहं चैप, स्थाने स्थाने नृपादिभिः ॥ ४ ॥
तदुद्विग्नो मुमूर्षुः स–न्नाऽऽत्मानं क्वापि पादपे । उल्लम्बयितुमारेभे, स तु मूर्खशिरोमणिः ॥ ५ ॥
सुप्रतिष्ठेन मित्रेण, श्राद्धेनैप निषेधितः । उक्तं च भो महाभाग !, किमेवं म्रियसे मुधा ॥ ६ ॥
सौभाग्यारोग्यरूपादि, यदीच्छसि मनोरमम् । तपःप्रभृतिकं जैनं, धर्म्ममेव तदाचर ॥ ७ ॥

इत्युक्त्वा स गुरोः पार्श्वे, नीतोऽश्रावि च देशनाम् । सम्यक्त्वं ग्राहितः शुद्धं, कृतश्च श्रावकोत्तमः ॥ ८ ॥

ततश्च स चिरं तेपे, तपांसि विविधान्यपि । भूयासमुच्चदेहोऽहं, निदानमिति चातनोत् ॥ ९ ॥

स वामनः क्रमान्मृत्वा, यूथनाथो महाबलः । तस्यामटव्यां सञ्जातो, महीधर इति द्विपः ॥ १० ॥

अन्यदा श्रीपार्श्वनाथः, छद्मस्थो विरहन् भुवि । आयातः पल्वले तत्र, कायोत्सर्गे च तस्थिवान् ॥ ११ ॥

स गजो जलपानार्थं, तदा तत्र समागतः । जगन्नाथमथालोक्य, जातिस्मरणवानभूत् ॥ १२ ॥

अहो ! धर्मं विराध्याऽहं, पशुरज्ञानतोऽभवम् । तदैव देवमर्चित्वा, कुर्वे स्वं सफलं जनुः ॥ १३ ॥

विमृश्येत्यम्बुजव्रातै-रभ्यर्च्य परमेश्वरम् । कृत्वानशनमुत्पन्नो, महर्द्धिर्व्यन्तरेष्वसौ ॥ १४ ॥

श्रुतश्च चम्पानाथेन, करकण्डुमहीभुजा । सर्वो व्यतिकरः सोऽयं, विस्मितश्च स्वचेतसि ॥ १५ ॥

यावत्स भूपतिस्तत्रा-गच्छत्युत्साहपूरितः । विजहार प्रभुस्तावत्, स विषादं दधौ भृशम् ॥ १६ ॥

किं स्यान्निर्भाग्यसत्त्वानां, श्रीजिनेन्द्रस्य दर्शनम् । आत्मानं निन्दयामास, श्लाघयामास च द्विपम् ॥ १७ ॥

स्थाने च तत्र प्रासादं, महान्तं निरमीपदत् । नवहस्तमिताऽस्यापि, तत्र च प्रतिमा प्रभोः ॥ १८ ॥

केचित्पुनरिदं प्राहु-र्धरणेन्द्राऽनुभावतः । नवहस्तप्रमाणार्चा, तदैवाविरभूत्प्रभोः ॥ १९ ॥

वन्दित्वा पूजयित्वा स, प्रतिमां तां प्रमोदवान् । स्वनिर्मापितचैत्ये च, न्यवीविशदयं द्विपः ॥ २० ॥

तत्र स व्यन्तरो लोक-प्रत्ययान् पूरयत्यलम् । ततः प्रभृति सञ्जातं, तत्तीर्थं भुवि विश्रुतम् ॥ २१ ॥

प्रभावनाप्रेक्षणकादिकोत्सवा-नव्याजभक्तिः कर्कण्डुभूपतिः। निर्मापयंस्तत्र पवित्रचेतसा, प्रभावकश्रावकपुङ्गवोऽभवत् ॥

स व्यन्तरोऽपि तामर्चां, पूजयन् प्रणमन्स्तुवन् । क्रमात्सुगतिभाग्भावी, तदेवं यजतार्हतः ॥ २३ ॥

इति श्रीमुद्रित–उपदेशसप्ततिकावृत्तितः उद्धृता

श्री कलिकुण्डतीर्थोत्पत्तिकथा संपूर्णा

१७ क्रोधोपरि सुरविप्र–कथा

तेष्वप्यसौ क्रोधदवानलोऽङ्गिनां, प्रज्वालयत्यद्भुतपुण्यकाननम् ।
आसेवितो यः स्वपरोपतापकृत्, भवेदिहामुत्र च सूरविप्रवत् ॥ १ ॥

श्रीवसन्तपुरे राजा, बभूव कनकप्रभः । सर्व्वाधिकारी सर्व्वेष्टः, सुयशास्तत्पुरोहितः ॥ १ ॥
सूरस्तस्य सुतोत्यन्त—कोपनः कलहप्रियः । योऽग्निवत् प्रज्वलन्नेव, नित्यं तिष्ठति दुष्टधीः ॥ २ ॥
पितरि स्वर्गतेऽन्येद्युः, कोपनत्वेन तत्सुतम् । मुक्त्वा पुरोहितपदे, भूभुजाऽन्यो निवेशितः ॥ ३ ॥
ततः स द्वेषमापन्न—स्तच्छिद्राणि गवेषयन् । नानाव्यापादनोपायां—स्तत्र भूपे व्यचिन्तयत् ॥ ४ ॥
दोहनावसरेऽन्येद्यु—र्लत्तया तं जघान गौः । तेन मर्म्माहता सा तु, वराकी मूर्छिता मृता ॥ ५ ॥
आः ! किमेतत्कृतं पाप ! गौरियं मारिता कुतः । इत्यादि यत्तजल्पन्ती, हतानेन स्वपत्न्यपि ॥ ६ ॥
जाते कलकले तत्र, प्राप्तैर्नृपभटैरयम् । निबध्योपनृपं नीतः, सोऽपि तं वध्यमादिशत् ॥ ७ ॥
नानाविडम्बनापूर्वं, ते नयन्ति पुराद्बहिः । तावत्तत्पुण्ययोगेन, तापसः कोऽप्युपाययौ ॥ ८ ॥

स तानुवाच भो भद्राः !, कोऽयं किमिति मार्यते । ऊचुस्तेऽप्येष पुंरूपो, राक्षसः कोऽपि विद्यते ॥ ९ ॥
कृपया मोचितस्तेन, स तेभ्यः सामयुक्तिभिः । सूरोऽपि तापसीं दीक्षा—मादत्ते स्म तदन्तिके ॥ १० ॥
तप्त्वा तपांसि भूयांसि, तस्यैव नृपतेर्वधे । कृत्वा निदानं स मृतो, जातो वायुकुमारकः ॥ ११ ॥
वसन्तपुरमागत्य, तं भूपप्रमुखं जनम् । रजोभिः स्थगयामास, कटरे ! कोपविप्लवः ॥ १२ ॥
च्युत्वा ततोऽभूच्चण्डालः, प्रथमं नरकं ततः । जगाम कोपकिम्पाक—पादपच्छायमाश्रयन् ॥ १३ ॥
ततो दृग्विषसर्पो—ऽभूद्द्वितीये नरके ततः । ततोऽप्यनन्तसंसारं, भ्रान्तः कोपविडम्बितः ॥ १४ ॥
भूयस्यथ गते काले, श्रीपुरे रत्नभूभृतः । सूरजीवोऽभवद्ग्रामा—ध्यक्षो ब्राह्मणनन्दनः ॥ १५ ॥
तथैव कोपनत्वेन, स नृपेण सहान्यदा । कुर्वाणः कलहं राज—भटैरुल्लम्बितो वने ॥ १६ ॥
चतुर्ज्ञानधरं तत्र, प्राप्तं मुनिवरं तदा । आगतो वन्दितुं राजाऽशृणोत्तद्देशनामिति ॥ १७ ॥
भो भोः ! भीमभवारण्ये, स्थिताः किं ? नश्यत द्रुतम् । यद्बद्धवैरा धावन्ति, वैरिणो वोऽनुगामिनः ॥ १८ ॥
वैरिणः क इति क्ष्माप—पृष्टो ज्ञानी पुनर्जगौ । कषायास्तेष्वपि क्रोधो, धत्ते वैरिषु धुर्यताम् ॥ १९ ॥
योऽयमुल्लम्बितो वृक्षे, पुरस्ताद्वीक्ष्यते नरः । इदं क्रोधफलं विद्धि, सर्वानर्थनिबन्धनम् ॥ २० ॥
सूरजन्मप्रभृतिकं, तच्चरितं तदाऽखिलम् । श्रुत्वा ज्ञानिमुनिप्रोक्तं, प्रतिबुद्धा नृपादयः ॥ २१ ॥
केचित्तस्यान्तिके दीक्षां, श्राद्धधर्मं च केचन । स्वीकृत्याभिग्रहादींश्च, स्वस्वकार्याण्यसाधयन् ॥ २२ ॥
सूरजीवोऽपि स क्ष्माप—च्छोटितः शान्ततां भजन् । दीक्षामादाय सञ्जातः, सर्वसौख्यैकभाजनम् ॥ २३ ॥

स्त्रीरूपाऽपि क्षमैवैका, क्रोधयोधं जयत्यमुम् । गुणाः परे तु तं जेतुं, पुंरूपा अपि न क्षमाः ॥ २४ ॥
आक्रुष्टोऽपि हतो वापि, न बालैः कलहायते । मुनिः संसारभीरुत्वा--दन्यथा तत्समो भवेत् ॥ २५ ॥
श्रूयते हि पुरा साधु--मेकमुग्रतपःपरम् । देवता काचिदभ्येत्यो--पास्ते तद्गुणरञ्जिता ॥ २६ ॥
साधो ! सुखेन चारित्रं, तव निर्वहते सदा । वपुरस्ति निराबाधं, नाप्यन्यः कोऽप्युपद्रवः ॥ २७ ॥
देवो नरो वा यः कश्चि--द्विरूपं कुरुते तव । तदा वाच्यं ममेत्यादि—वार्त्तां नित्यं चकार सा ॥ २८ ॥
निःस्पृहो मुनिरप्याह, न मे किञ्चन दुष्करम् । यतः सन्तोषिणः सौख्यं, यत्तच्चक्रभृतोऽपि नो ॥ २९ ॥
पारणाहेऽन्यदा गच्छ--न्नगरान्तः स:संयतः । अमङ्गलधियाभ्यासद्विजेनैकेन कुट्टितः ॥ ३० ॥
मुनिरप्युच्छलन्मन्यु--र्मुष्टिभिस्तमताडयत् । मुष्टामुष्टि तयोरेवं, चिरं युद्धमजायत ॥ ३१ ॥
भोजनानन्तरे देवी, पप्रच्छ कुशलादिकम् । रुष्टः सोऽप्याह तत्र त्वं, नागता किं त्वयाऽधुना ? ॥ ३२ ॥
मुने ! तत्राहमायाता, परं त्वं नोपलक्षितः । उभयोर्युद्ध्यमानत्वात्त—दानीं समता ह्यभूत् ॥ ३३ ॥
क्षमातपोभ्यां युक्तत्वात्, क्षमाश्रमण उच्यते । तयोरेकतरस्यापि, नाशे नाम्नो निरर्थता ॥ ३४ ॥
इत्थं तया साधुरयं प्रबोधितो, बभूव चारित्रिजनावतंसकः । तत्क्रोधयोधो विजिगीषुभिर्भवं, जेतव्य एवोच्चपदस्पृहा यदि ॥ ३५ ॥

इति श्रीमुद्रित--उपदेशसप्ततिकावृत्तितः उद्धृता

श्री सुरविप्रकथा संपूर्णा

१८ मानोपरि उज्झितकुमार—कथा

मानोऽपि मान्योऽस्तु मनस्विनां कथं, विडम्बयन्नष्टविधाभिरङ्गिनः ।
यं प्राप्य स क्ष्मापतिपुत्र उज्झिता- भिधोऽपि जज्ञे निजजीवितोज्झितः ॥ १ ॥

अष्टविधमदफलं चेदम्——रज्जाभोगे तिसिआ, अट्ठवसट्टा पडंति तिरिएसु । जाईमएण मत्ता, किमिजाई चेंव पावेंति ॥ १ ॥
कुलमत्त सीआलत्ते, उट्टाइजोणि जंति रूवमए । बलमत्तावि पयंगा, बुद्धिमए बुक्कडा हुंति ॥ २ ॥
रिद्धिमए साणाई, सोहग्गमएण सप्पकागाई । लाभमएण वइल्ला, हवंति इअ अट्ठमयदुट्ठा ॥ ३ ॥ इति श्रीमहापुरुषचरित्रे ॥

राजा नन्दिपुरे रत्न–सारो नीतिलतावनम् । सिञ्चन्नम्बुदवत्सर्व–तापनिर्वापकोऽभवत् ॥ १ ॥
तस्य प्रेमलता राज्ञी, साक्षात्प्रेमलतेव या । कोऽपि जीवोऽन्यदा तस्याः, गर्भे समुदपद्यत ॥ २ ॥
अशुभा दोहदास्तस्याः, जातस्तदनुभावतः । नृपव्यापादनस्तैन्य–वञ्चनोल्लम्बनादयः ॥ ३ ॥
जातमात्रोऽपि बालोऽसौ, प्रच्छन्नं त्याजितस्तया । बहिर्बलिष्ठायुष्कत्वा–द्दशाको न मृतः परम् ॥ ४ ॥
एकेन वणिजा दृष्टो, गृहीतश्च दयालुना । अर्पितो निजभार्यायै, पालयामास सापि तम् ॥ ५ ॥
कृतोज्झिताभिधः पित्रा, लब्ध उज्झित इत्ययम् । मनोरथेन महता, जातः पञ्चपवार्षिकः ॥ ६ ॥
अहमेव पटुः प्राज्ञो, धनवान् बलवानपि । केऽमी वराका मनुजाः, मत्पुरः किङ्करा इव ॥ ७ ॥

इत्यहङ्कारपूरेण, तृणीकृतजगत्त्रयः । दिवसानतिचक्राम, स शैलस्तम्भसन्निभः ॥ ८ ॥
मातृपित्रोर्देवगुर्वो–र्न प्रणाममसौ व्यधात् । नित्यमुत्तान एवास्ते, दुर्विनीतशिरोमणिः ॥ ९ ॥
तमाह जनकोऽन्येद्यु–र्वत्स ! विद्यामठं व्रज । पठ ग्रन्थान्मुञ्च शाठ्यं, विनयं कुरु पाठके ॥ १० ॥
अलं मे गलशोषेण, प्राज्ञः प्रागप्यहं यतः । वराकः स उपाध्यायः, किं मे कर्त्ताऽधिकं वद ॥ ११ ॥
वणिजामयमाचारः, इत्यादि बहुचाटुभिः । प्रेषितो लेखशालायां, मातृकादि पपाठ च ॥ १२ ॥
अपराधे क्वचिच्चैष, कलाचार्येण ताडितः । तावत्तमाह रे भिक्षा–चर ! त्वं मां न वेत्सि किम् ? ॥ १३ ॥
पाठनेन तवानेन, किमित्यादि वदन्नयम् । रोषेण सहसोत्थाय, तं जघान चपेटया ॥ १४ ॥
धृत्वा केशेषु दुष्टात्मा, तमुच्चासनसंस्थितम् । पातयामास भूमौ स, किमकृत्यं न पापिनाम् ॥ १५ ॥
ज्ञाते व्यतिकरे तत्र, स आहूतः क्षमाभुजा । भाषितः किमरे मूर्ख !, पण्डितः कुट्टितस्त्वया ॥ १६ ॥
सभ्रूक्षेपं साभिमानं, भूपं स प्राह दुर्मतिः । स मनाक् शिक्षितो भिक्षा–चरस्तत्किन्तु दूषणम् ॥ १७ ॥
अन्योऽपि यदि कश्चिन्मां, शिक्षयिता तादृशं फलम् । स प्राप्स्यतीति सोल्लुण्ठ–मुवाच गतभीतिवत् ॥ १८ ॥
क्रुद्धेन क्षमाभुजा धृत्वा, गलेऽसौ कर्षितः पुरात् । नालंहत्याभिया किन्तु, वराको नहि मारितः ॥ १९ ॥
इह लोकेऽप्यहङ्कार–फलमालोक्यतां बुधाः ! । वियोगः स्वजनैर्भूपा–ऽपमानो वनवासिता ॥ २० ॥
यथा चक्री मनुष्येषु, त्रिदशेषु पुरन्दरः । तथा गुणेषु सर्वेषु, धौरेयो विनयः स्मृतः ॥ २१ ॥
अथोज्झितकुमारोऽपि, पर्यटन्विकटाटवीः । तापसाश्रममायात–स्तपोधनसमाकुलम् ॥ २२ ॥

असौ पर्यस्तिकां बध्वा, तेषामग्रे निविष्टवान् । ननाम न शठस्तैर--प्युक्तं मैवमुपाविश ॥ २३ ॥
ततो रुष्टः परित्यज्य, तदाश्रममविश्रमम् । अरण्यानीं भ्रमन्नेष, सिंहमेकं व्यलोकत ॥ २४ ॥
पुच्छमुच्छाल्य सिंहोऽपि, क्ष्वेडाडम्बरभीषणः । तमभ्यधावत क्रुद्धः, सोऽपि मानी व्यचिन्तयत् ॥ २५ ॥
आः ! क एष पशुः किं वा, नश्यतेऽस्माद्वराकतः । लोका अपि हसिष्यन्ति, मां पशोरपि बिभ्यतम् ॥ २६ ॥
इत्यहङ्कारतस्तस्मा–दनश्यंस्तेन मारितः । शास्त्रेऽपि श्रूयते ह्येवं, मणुआण अहियरो ॥ २७ ॥
स जातो गर्दभस्तस्मात्, करभस्तुरगस्ततः । तत्रैव नगरे भूयः, पुरोहितसुतोऽभवत् ॥ २८ ॥
भूत्वापि सर्वविद्यानां, पारगः स मृतस्ततः । तत्रैव नगरे जातो, डुम्बोऽहङ्कारदोषतः॥ २९ ॥
यथा यथा पुरोधास्तं, पश्यत्यस्य तथा तथा । स्नेहः स्याद् दुस्त्यजे येन, स्नेहवैरे पुरातने ॥ ३० ॥
अन्येद्युस्तत्पुरप्राप्त–केवलज्ञानिनोऽन्तिके । पुरोहितस्तत्स्नेहस्य, हेतुं पप्रच्छ सोऽप्यवक् ॥ ३१ ॥
मूलादारभ्य तद्वृत्त–महङ्कारविपाकजम् । मानेन के न पीडयन्ते, प्राणिनः पण्डिता अपि ॥ ३२ ॥
श्रुत्वा पुरोहितस्तेन, ज्ञानिना गदितं वचः । भवाद्विरक्तः प्रव्रज्य, तदन्ते प्राप निर्वृतिम् ॥ ३३ ॥
उज्झितोऽपि सुगतिं गतवान् श्री–धर्म्ममार्हतमवाप्य गुरुभ्यः। तेन मानव ! न मानविपक्षो, मान्य एष भवता भवबीजम् ॥३४॥

इति श्रीमुद्रित–उपदेशसप्ततिकावृत्तितः उद्धृता

श्री उज्झितकुमार–कथा संपूर्णा

१९ मायोपरि पापबुद्धि–कथा

मायापिशाचीविवशा नरा ये, स्वार्थैकनिष्ठाः परवञ्चनानि। सृजन्ति तेऽधोगतयो भवन्ति, निदर्शनं त्वत्र स पापबुद्धिः ॥१॥

पुरे श्रीतिलके द्रव्यो–पार्ज्जनैकपरायणौ। धर्म्मबुद्धिः पापबुद्धि–रभूतां वणिजावुभौ ॥ १ ॥

ऋजुस्वभावस्तत्राद्यः, सर्वेषां हितचिन्तकः। द्वितीयः कपटी मायी, विश्वस्तस्याऽपि वञ्चकः ॥ २ ॥

तयोरप्यभवन्मैत्री, वाणिज्यं तन्वतोर्मिथः। लोको वदत्ययं योगः, काष्टक्रकचसन्निभः ॥ ३ ॥

तथापि धर्म्मबुद्धिस्तं, न त्यजत्युत्तमत्वतः। अशोभाकृदपि त्याज्यः, कलङ्कः शशिना किमु ॥ ४ ॥

अन्यदा व्यवसायार्थं, तौ गतौ क्वापि पत्तने। वणिजां क्षीणवित्तानां, व्यवसायो हि कामधुक् ॥ ५ ॥

पृथग्पृथगुपार्ज्यैतौ, दीनाराणां सहस्रकम्। प्राग्वद्वक्रेतरस्वान्तौ, वलितौ स्वपुरं प्रति ॥ ६ ॥

आसन्ने स्वपुरे प्राप्ते, शठोऽशठमभाषत। एतावदखिलं वित्तं, पुरान्तर्गृह्यते कुतः ॥ ७ ॥

कियन्निधीयतेऽत्रैवा–ऽवसरे लास्यते पुनः। राजदायाददस्युभ्यो, भयं वित्तस्य नैकधा ॥ ८ ॥

श्रुत्वेति सरलस्वान्तो, वित्तं पञ्चशतीमितम्। न्यास्थत्तत्रैव तच्चेतः–प्रत्ययाय परोऽपि च ॥ ९ ॥

आगतौ स्वगृहे वर्द्धा–पनकं च तयोरभूत्। कियद्दिनान्तरे वित्तं, तद्भूस्थं पापधीरलात् ॥ १० ॥

अथावसरमासाद्य, पापबुद्धिस्तमब्रवीत्। आगच्छ मित्र ! तद्वित्तं, यथा सम्प्रति गृह्यते ॥ ११ ॥

स्थानद्वयं तदालोक्य, रिक्तं प्राह स पापधीः। आः केनापि हृतं वित्त—मावयोर्जीवितोपमम् ॥ १२ ॥

तं धिगस्तु स पापात्मा, म्रियतां किं करिष्यते । विलापान्कृत्रिमानेवं, स सत्यानिव निर्म्ममे ॥ १३ ॥
अथाऽब्रवीत्स पापात्मा, धार्म्मिकं धर्म्मबुद्धिकम् । रे धर्म्मधूर्त्त ! रे दुष्ट !, तवैवैतद्विजृम्भितम् ॥ १४ ॥
धर्म्मबुद्धिरपि प्राह, भ्रातः ! किमिदमुच्यते । नेदृशं मादृशं कर्म्म, किन्तु कस्यापि पापिनः ॥ १५ ॥
जातो विवाद उभयो--र्गतौ राजकुले च तौ । पापबुद्धिस्तदा प्राह, चौरोऽयं धर्म्मबुद्धिकः ॥ १६ ॥
प्राहुर्नियोगिनः साक्षी, युवयोः कोऽपि विद्यते । पापबुद्धिरभाषिष्ट, साक्षिणो वननाकिनः ॥ १७ ॥
शुद्धबुद्धिर्धर्म्मबुद्धि--स्तदा चेतस्यचिन्तयत् । अहो ! धृष्टत्वमेतस्य, अहो ! कपटपाटवम् ॥ १८ ॥
मम श्रीधर्म्म एवात्र, सखाऽन्यैः किं सहायकैः । प्रातः परीक्षा कर्त्तव्ये--त्यादि भूपादयोऽब्रुवन् ॥ १९ ॥
पापबुद्धिस्ततः प्राह, रात्रौ स्वजनकं प्रति । प्रारब्धोऽयं मया कूट--कलहो निखिलोऽपि हि ॥ २० ॥
कथं कर्त्तासि तातेने--त्युक्तः स प्राह, दुष्टधीः । त्वं तात ! विपिने गत्वा, प्रविश क्वापि कोटरे ॥ २१ ॥
राजादीनां पृच्छतां च, त्वया वाच्यमिति प्रगे । निष्कलङ्कः पापबुद्धि--र्धर्म्मबुद्धिस्तु तस्करः ॥ २२ ॥
तेनेति शिक्षितस्तात--स्तथैव निखिलं व्यधात् । प्रत्यूषे मिलिते लोके, स ऊचे च तथैव तत् ॥ २३ ॥
इतस्ततो विलोकन्ते, न च पश्यन्ति कञ्चन । लोकाः सर्वेऽपि साश्चर्या--स्तूर्णमुत्कर्णतां दधुः ॥ २४ ॥
सहसोत्पन्नबुद्धिस्तु, धर्म्मबुद्धिस्तदाऽवदत् । राजानं प्रति देवेदं, कोटरं ज्वालयिष्यते ॥ २५ ॥
देवो वा मानवो वापि, यथा प्रत्यक्षतां व्रजेत् । इत्युक्त्वा सहसोत्थाय, यावत्तज्ज्वालयत्यसौ ॥२६ ॥
तावत्स जनकस्तस्मा--त्कोटरान्निर्गतः क्षणात् । कर्म्मणा प्रेरितो जीवो, जनन्या उदरादिव ॥ २७ ॥

तदानीं तं नृपोऽपृच्छ—दरे ! किमिदमद्भुतम् । सोऽपि वृत्तान्तमाचख्यौ, दुःसुतप्रेरणादिकम् ॥ २८ ॥
तं तत्सुतं च ते लोकाः, धिक्कुर्व्वन्तीति रे ! युवाम् । अकृशाथामिदं किं य--न्मित्रेऽपि द्रोहकारिता ॥ २९ ॥
पापबुद्धिस्ततो राज्ञा, मार्यमाणोऽपि वारितः । लगित्वा पादयोर्धर्म्म—बुद्धिना शुद्धबुद्धिना ॥ ३० ॥
धर्म्मबुद्धेस्तदा श्लाघां, निन्दां पापमतेस्तथा । भूपाद्याश्चक्रिरे माया, कटरेऽत्रैव दुःखदा ॥ ३१ ॥
एवं बभूवाऽशठवक्रभावयुग्, तन्मित्रयुग्मं सुखदुःखभाजनम्। मायां भुजङ्गीमिव दूरतस्ततो--ऽवदातचित्तास्त्यजत द्रुतं जनाः ॥

इति श्रीमुद्रित—उपदेशसप्ततिकावृत्तितः उद्धृता

श्रीपापबुद्धिकथा संपूर्णा

२० लोभोपरि श्री सागर—श्रेष्ठि—कथा

यो द्वादशं यावदुपागतो गुण—स्थानं निषेधं स्थिरसंविदः सृजेत् ।
इहाप्यमुत्रापि विडम्बयेन्नकं, स लोभवैरी किल सागरं यथा ॥ १ ॥

सागरः सादरो द्रव्यो—पार्ज्जने धर्म्मवर्ज्जितः । अभूच्छ्रीमन्दिरे श्रेष्ठो, द्रव्यकोटयष्टकप्रभुः ॥ १ ॥
परं कदर्यमूर्द्धन्यो, न भुंक्ते न ददाति च । कपाटपिहितं प्रायो, द्वारं तस्य सदा भवेत् ॥ २ ॥
गृह एव स्थितस्यास्य, दृष्टौ कोऽपि करोति न । भोजनस्नानदानादि, याचकः कोऽपि नैति च ॥ ३ ॥

कमला गृहिणी तस्य, देविलस्तनयस्तयोः । विमला तत्प्रिया सर्वे-ऽप्येते तच्चकिताः सदा ॥ ४ ॥
तत्र श्वश्रू वधू द्वे ते, मन्त्रतन्त्रविशारदे । अनेकाभिः कुविद्याभिः, स्वैराचारे बभूवतुः ॥ ५ ॥
योगिन्येकाऽन्यदा तस्य, विजने गृहमागता । श्वश्रूवधूभ्यां सा पृष्टा, सादरं नतिपूर्वकम् ॥ ६ ॥
स्वामिन्यत्र गृहे दत्त-द्वारे त्वं कथमागता । साप्याह मम विद्यास्ति, साधारा व्योमगामिनी ॥ ७ ॥
ताभ्यां तस्याश्च सा विद्या, गृहीता बहुमानतः । एकं च शुषिरं दारु, विद्यते तद्गृहे महत् ॥ ८ ॥
तस्मिन्नारुह्य तद्दत्त-मन्त्रशक्त्या च ते उभे । निशीथसमये यातः, क्रीडार्थं स्वेप्सिते पदे ॥ ९ ॥
एयदा कायचिन्तार्थं, निशीथे पुत्र उत्थितः । सुप्ताशेषजनेऽद्राक्षी-त्कौतुकं रहसि स्थितः ॥ १० ॥
श्वश्रूवध्वौ तदोत्थाय, सौत्सुक्यं निभृतक्रमम् । त्वर्यतां त्वर्यतामेव-मूचतुश्च मिथो मुदा ॥ ११ ॥
सोऽप्यभूद्यावदुत्कर्णः, श्वश्रूतावदुवाच ताम् । अरे काष्ठमिदं शीघ्रं, सज्जीकुरु पुरो भव ॥ १२ ॥
आत्मनामस्ति गन्तव्यं, दूरे तन्माविलम्बय । इत्युक्त्वा ते उभे तत्रा-रूढे तन्मन्त्रपूर्वकम् ॥ १३ ॥
तत उत्पतिते व्योम्नि, व्यन्तर्याविव ते उभे । इत्याश्चर्यं तदालोक्या-ऽचिन्तयद्देवलस्तदा ॥ १४ ॥
अहो ! किमेते शाकिन्यौ, पापिन्यौ पतिवञ्चिके । गते कुत्र कदा पश्चा-देते चात्रागमिष्यतः ॥ १५ ॥
इत्यसौ जाग्रदेवास्थात्, तत्र ते यावदागते । ततः क्षणान्तरे जातः प्रातःकालो विकस्वरः ॥१६ ॥
स तयोस्तादृशं वृत्तं, न कस्यापि न्यवेदयत् । परेषां दूषणानीव, प्रायश्चित्तप्रदो गुरुः ॥ १७ ॥
स कौतुकी द्वितीये तु, दिने जाते तमोभरे । प्रागेव शुषिरे तत्र, प्रौढे काष्ठे प्रविष्टवान् ॥ १८ ॥

तथैवारुह्य ते तत्र, जग्मतुः स्वेप्सितं पदम् । प्रवृत्ते क्रीडितुं मुक्त्वा, तत्काष्ठं क्वापि भूतले ॥ १९ ॥
अन्या अपि स्त्रियः सन्ति, मिलितास्तत्र भूरिशः । चिरं क्रीडारसस्ताभि-श्चक्रे तत्राऽविशङ्कितम् ॥ २० ॥
तत्कोटराद्विनिर्गत्य, कुमारोऽपि भ्रमन् क्वचित् । स्वर्णेष्टिकाभिराकीर्ण-मिष्टिकापाकमैक्षत ॥ २१ ॥
उत्फुल्लनयनश्चेत-स्यचिन्तयदयं तदा । स्वर्णद्वीपो ह्ययं नूनं, श्रूयते यो जनोक्तिभिः ॥ २२ ॥
यः प्राप्य क्लेशकोटिभि-र्निःस्वैः स्वप्नेऽपि नेक्ष्यते । अयत्नेनापि सम्प्राप्तो, मया भाग्यं महन्मम ॥ २३ ॥
द्वित्राः स इष्टिकाः साराः, सन्तोषी जगृहे ततः । मनस्वी नहि लोभी स्यात्, सति लाभेऽपि भूयसि ॥ २४
तथैव कोटरे तत्र, स संलीनवपुः स्थितः । स्वाङ्गोपाङ्गानि सङ्कोच्य, प्रावृषीव महामुनिः ॥ २५ ॥
क्रीडित्वा सुचिरं ते अ-प्यागते तत्र निर्भये । तथैवोत्पतिते व्योम्नि, क्रमाच्च गृहमागते ॥ २६ ॥
प्रातःकाले कुमारस्त-द्वृत्तज्ञापनपूर्वकम् । स्वपित्रे दर्शयत्स्वर्णं, विस्मितः सोऽपि तं जगौ ॥ २७ ॥
अरे मूर्ख ! त्वया स्तोक-मिदमात्तं कथं हहा ! । यत्नं विनापि हस्ताप्तं, धनं को नाम मुञ्चति ॥ २८ ॥
अद्याहं तत्र यास्यामि, तद्दास्यामि यथेप्सितम् । दारिद्र्यं द्रावयिष्यामि, निश्चिन्ता हि भवादृशाः ॥ २९ ॥
इत्युक्त्वोत्थितवान् श्रेष्ठी, लोभक्षोभवशंवदः । तद्ध्यानलीनस्तदह-न्यभूत्तन्दुलमत्स्यवत् ॥ ३० ॥
निशीथिन्यां तथैवैष, तत्काष्ठान्तः प्रविष्टवान् । प्रस्थितः सह ताभ्यां च, तं प्रदेशमुपागमत् ॥ ३१ ॥
ततो निर्गत्य पुत्रोक्ता-भिज्ञानादि स्मरन् हृदि । इष्टिकापाकमद्राक्षीत्, प्रत्यक्षमिव रैगिरिम् ॥ ३२ ॥
हृष्टस्तद्दर्शनाच्छ्रेष्ठी, ह्यसन्तुष्टः स इष्टिकाः । गृहीत्वा तत्तथा बभ्रे, कष्टेनामात्स्वयं यथा ॥ ३३ ॥

तथैव श्वश्रूवध्वौ ते, चलिते स्वपुरीमभि । उदन्वदुपरि प्राप्ते, यावत्तावद्वधूरवक् ॥ ३४ ॥
केनापि हेतुना मातः !, काष्ठमद्य महाभरम् । न चलत्यग्रतः शीघ्रं, श्वश्रूरप्याह तां प्रति ॥ ३५ ॥
अरे ! त्यजैतदत्रैव, यच्चैतत् प्रेक्ष्यते तरत् । गृहाण काष्ठं तद्यावो, यथा शीघ्रं पुरे निजे ॥ ३६ ॥
अथ भीतोऽवदच्छ्रेष्ठी, मा मां क्षिपतमम्बुधौ । उपलक्ष्य तमन्योऽन्यं ते ब्रूतस्त्वं क्व रे इह ? ॥३७ ॥
सुतरां कूपिते तस्मा--द्विगोपनभयादिमे । सकाष्ठं तं परित्यज्य, तत्र ते गृहामागते ॥ ३८ ॥ अन्यत्राप्युक्तम्—
अतिलोभो न कर्त्तव्यो, लोभं नैव परित्यजेत् । अतिलोभाभिभूतात्मा, सागरः सागरेऽपतत् ॥ १ ॥
क्रमेण ज्ञातवृत्तान्तो, भीतस्ताभ्यां सुतोऽपि सः । परिव्रज्यामुपादाय, जातः सुखनिकेतनम् ॥ ३९ ॥
लोभस्याप्येनमाकर्ण्य, विपाकं विबुधा जनाः । सन्तोषामृतपूरेणाऽऽत्मानं सिञ्चत सर्वदा ॥ ४० ॥

इति श्रीमुद्रित--उपदेशसप्ततिकावृत्तितः उद्धृता

श्री सागरश्रेष्ठिकथा संपूर्णा

२१ न्यायोपरि श्री यशोवर्मनृपकथा

न्यायो नराणां परमं निधानं, न्यायेन विश्वानि सुखीभवन्ति ।
न्यायोपपन्नं पुरुषं श्रयन्ति, श्रियः श्रयन्त्यः सरितामिवेशम् ॥ १ ॥

श्रीरामनाम स्मरति प्रतिप्रगे, जनः समग्रो न तु रावणाऽभिधाम् ।

पूर्वौ ददौ किं जगृहे च किं परः, सन्न्याय एवात्र बिभर्त्ति हेतुताम् ॥ २ ॥

यतः—यान्ति न्यायप्रवृत्तस्य, तिर्यञ्चोऽपि सहायताम् । अपन्थानं तु गच्छन्तं, सोदरोऽपि विमुञ्चति ॥ १ ॥

गया तिदीहा दहवयण, जिहिं सुरसेव करंति । दीहपल्लट्टइं रावणह, पत्थर नीरि तरन्ति ॥ २ ॥

ये मज्जन्ति निमज्जयन्ति च परास्ते प्रस्तरा दुस्तरे, वार्द्धौ वीर तरन्ति वानरभटान्संतारयन्तेऽपि ।

नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः, श्रीमद्दाशरथेः प्रतापमहिमा सोऽयं समुज्जृम्भते ॥ ३ ॥

पतन्त्यो भित्तयो यस्या-ज्ञया तिष्ठन्ति निश्चलाः । वशीभवन्ति भूताद्या, अपि यन्नामकीर्त्तनात् ॥ १ ॥

आस्तां यच्चरितं तस्य, सेवकोऽपि नरेश्वरः । यशोवर्माऽभिधो न्यायी, यथाऽभून्नापरस्तथा ॥ २ ॥

कल्याणकटके राम, इव नितिलताम्बुदः । यशोवर्माऽभिधो भूपो, भुङ्क्ते साम्राज्यमूर्जितम् ॥ ३ ॥

द्विष्टः पुत्रोऽपि तस्याऽऽसीत्, त्याज्यः स्वाङ्गस्थपङ्कवत् । गुणवानस्वकीयोपि, मान्यः पुष्पमिवाऽभवत् ॥ ४ ॥

निजप्रतोलीद्वारे स, न्यायघण्टामबन्धयत् । यस्य यस्य यदा कार्यं, तदा तां स स वादयेत् ॥ ५ ॥

तच्चिन्तां कुरुते भूपः, प्राणैरपि धनैरपि । एवं पालयतो न्यायं, तस्य गच्छन्ति वासराः ॥ ६ ॥

तस्य न्यायपरीक्षार्थं, राज्याऽधिष्ठातृदेवता । विधाय सुरभीरूपं, राजमार्गेऽन्यदा स्थिता ॥ ७ ॥

वत्समेकं च सौन्दर्य-सौकुमार्यमनोहरम् । विकुर्व्य सद्यः सञ्जातं, स्वपार्श्वे सा न्यवीविशत् ॥ ८ ॥

अत्रान्तरे राजसौधा-दारुह्य वरवाहिनीम् । तत्रागच्छन्नभूत्तस्य, राज्ञः पुत्रोऽतिदुर्दमः ॥ ९ ॥

अतिवेगवशाच्चैष, वाहिनीं तामवाहयत् । तस्यैवोपरि वत्सस्य, स वराको मृतः पुनः ॥ १० ॥
धेनुः कोकूयतेऽत्यर्थं, मुञ्चत्यश्रूणि निर्भरम् । लोको हाहारवं चक्रे, प्रेक्ष्य तादृग्दशां तयोः ॥ ११ ॥
केनाप्यालापिता चैषा, भद्रे ! राजकुलं व्रज । न्यायघण्टास्ति या तत्र, शृङ्गाभ्यां तां च वादय ॥ १२ ॥
यथा तवैतदन्याय—प्रतीकारं नृपः सृजेत् । पञ्चमो लोकपालोऽयं, सर्वसाधारणो यतः ॥ १३ ॥
श्रुत्वेति सा गता तत्र, घण्टां बाढमताडयत् । तस्मिंश्चावसरे भूपो, भोजनायोपविष्टवान् ॥ १४ ॥
घण्टानिनादमाकर्ण्या—ऽकाले भूपः ससम्भ्रमः । इदानीं चालिता केन, घण्टेत्याख्यत्स्वसेवकान् ॥ १५ ॥
विलोक्य तेऽपि तं प्राहु—र्नान्यः कोऽप्यत्र गां विना । अकाले गौः कुतोऽत्रेति, स्वयमेवोत्थितो नृपः ॥ १६ ॥
तत्रागत्य स धेनुं तां, सदुःखं प्राह भूपतिः । भवत्या अपि हा ! पापी, कश्चकार पराभवम् ॥ १७ ॥
पराभूताऽसि येन त्वं, तं दर्शय ममाऽधुना । वराकी सा तु नो वेत्ति, वक्तुं मानवभाषया ॥ १८ ॥
किन्तु सा पूरतो भूय, पृष्ठिलग्नस्य भूपतेः । तं वत्सं दर्शयामास, जिवितव्यमिवात्मनः ॥ १९ ॥
उवाच भूपो हट्टादौ, सन्निविष्टं महाजनम् । क्रूरकर्म्मेदृशं चक्रे, कः पापीति निवेद्यताम् ॥ २० ॥
तदन्यायविधातारं, सर्वे जानन्ति मानवाः । न कोऽपि भाषते किन्तु, तत्सुताऽनर्थशङ्कया ॥ २१ ॥
अतिप्रश्नेऽपि भूपस्य, यावत्कोऽपि न भाषते । तावत् क्रुद्धो नृपः प्राह, सभ्रूक्षेपमिदं वचः ॥ २२ ॥
आः ! पापिनो भवन्तोऽपि, यदीदृगसमञ्जसम् । दृष्टमप्युच्यते यन्न, धिग्वस्तत्पक्षपातिनः ॥ २३ ॥
तदैव भोक्ष्ये यद्येत—त्पापकारी नराधमः । ममाग्रे प्रकटो भावी—त्यभिग्रहमथाऽग्रहीत् ॥ २४ ॥

तस्य न्यायैकनिष्ठस्य, सन्ध्यावधि निषेदुषः । तद्दिने लङ्घनं जात–महो ! न्यायप्रधानता ॥ २५ ॥
सन्ध्यायां मन्दिरे प्राप्त–स्तनयस्तस्य भूपतेः । प्राह स्वकृतमन्यायं, मम दण्डं कुरु प्रभो ! ॥ २६ ॥
स्वपुत्रकृतमन्यायं, श्रुत्वा दूनो नराधिपः । स्वर्णेनापि हि किं तेन, कर्णच्छेदो भवेद्यतः ॥ २७ ॥
प्रातः पर्षदि भूपेन, पृष्टा नीतिविशारदाः । अस्य पुत्रस्य को दण्डो, विधेय ? इति कथ्यताम् ॥ २८ ॥
उक्तं तैरेक एवायं, राज्यार्हस्तनयस्तव । एकलोचनसङ्काशः, कोऽस्य दण्डो भवेत्प्रभो ! ॥ २९ ॥
न्याय एव प्रधानो मे, दुर्नयेन सुतेन किम् ? । अन्येऽप्येवं वितन्वन्ति, शिक्षा चेन्नाऽस्य दीयते ॥ ३० ॥
ततोऽस्य यो भवेद्दण्ड–स्तं वदन्तु विशारदाः ! । मनागपि न कार्यं मे, दाक्षिण्यमभयं हि वः ॥ ३१ ॥
तैरुक्तं देव । यो यादृक्, कुरुते तस्य तादृशम् । अमनोज्ञं मनोज्ञं वा, क्रियते शास्त्रगीरिति ॥ ३२ ॥
अवाहयद्यथा वत्सो–परिष्टादेष वाहिनीम् । तथाऽस्यापि विधीयेत, दण्डः कोऽप्यस्य नापरः ॥ ३ ॥
आनाय्य वाहिनीं पुत्रं, स्थापयित्वा च वर्त्मनि । जनानुवाच भो एषा, पुत्रस्योपरि वाह्यताम् ॥ ३४ ॥
ईदृग्विधं तदादेशं, यदा कोऽपि करोति न । प्रत्यक्षं सर्वलोकानां, तदा भूप इदं जगौ ॥ ३५ ॥
अयं मदीयो दुष्पुत्रो, जीविताद्वा विनश्यतु । आत्मीयेनापि किं तेन, न्यायो यस्य न वल्लभः ॥ ३६ ॥
इत्युक्त्वा सहसोत्थाय, स्वयमेवोपविश्य च । यावत्तां वाहयत्येष, तस्योपरि दयोज्झितः ॥ ३७ ॥
तावन्न गां न वत्सं च, ददर्श स महीपतिः । सा देवी च पुरोभूय, तस्य श्लाघामिति व्यधात् ॥ ३८ ॥
जय सत्त्ववतां धुर्य !, जय न्यायपरायण ! । श्रीरामस्येव सौभाग्यं, त्वदीयं स्तुवते न के ? ॥ ३९ ॥

चिरायुस्ते सुतो भूयात्साम्राज्यं त्वं च पालय । परीक्षेयं मया चक्रे, इत्युक्त्वा सा तिरोऽभवत् ॥ ४० ॥

एवं न्यायः पालनीयो नृपाद्यैर्यस्मात्सर्वाः सम्पदो हस्तगाः स्युः ।

शस्यानि स्युः किं विना वारिवाहं, प्रावृट्काले प्राच्यमासद्वयोत्थम् ॥ ४१ ॥

इति श्रीमुद्रित–उपदेशसप्ततिकावृत्तितः उद्धृता

यशोवर्मनृपकथा संपूर्णा.

२२ धर्मोपरि श्री धर्मराजकथा

श्रीधर्म एव निधिरक्षय एष सौख्य–श्रीणां हितः स्वपरयोश्च भवान्तरेऽपि ।

श्रीधर्मराजचरितं विनिशम्य सम्यक्, कस्तत्र वा शिथिलमादरमातनोति ॥ १ ॥

अस्त्यत्र भरतक्षेत्रे, नगरी सर्वमङ्गला । तत्र वित्रासिताराति–र्भूपतिर्भद्रशेखरः ॥ १ ॥

सभामध्यास्त स क्ष्मापः, परिवारयुतोऽन्यदा । तदा नैमित्तिकः कोऽपि, प्राप्तस्तत्र त्रिकालवित् ॥ २ ॥

यथोचितासने राज–दापिते स उपाविशत् । उदस्य हस्तं सर्वेभ्यः, आशीर्वादमुवाच च ॥ ३ ॥

नृपोऽप्राक्षीन्निमित्तज्ञ !, भविष्यद्वद कीदृशम् ? । स्वरूपं भावि सोऽप्याह, माऽधुना पृच्छ्यतां प्रभो ! ॥ ४ ॥

विशेषतो नृपोऽपृच्छ–दुत्पातः कोऽपि दैवतः ? । किं भावी ? सोऽप्यभाषिष्ट, दुर्भिक्षं द्वादशाब्दिकम् ॥ ५ ॥

अकाण्डाऽशनिसम्पात-सन्निभं तद्वचो नृपः । श्रुत्वा सदुःख इत्याख्यत्, रे ! विमृश्य वचो वद ॥ ६ ॥
समक्षं सर्वसभ्यानां, निमित्तज्ञोऽब्रवीत्पुनः । मद्भाषितं वृथा स्याच्चे-च्छेद्या जिह्वैव मे तदा ॥ ७ ॥
तत्प्रतिज्ञां दृढामेवं, निशम्य क्ष्माभुजाऽपि सः । अस्थापि स्वपुरे क्वापि, गन्तुं नैव ददे तथा ॥ ८ ॥
सर्व्वादरात् सर्व्वलोकै-श्चक्रे धान्यस्य सङ्ग्रहः । स्वकुटुम्बानुमानेन, गत्वा देशान्तरेष्वपि ॥ ९ ॥
स्वस्ववित्तान्यनादृत्य, धान्यान्येव तदा जनैः । मील्यन्ते स्म यतः प्राणाः, नृणामन्नेषु निष्ठिताः ॥ १० ॥
अथोष्णकालेऽतिक्रान्ते, प्रवृत्तेऽपि तपात्यये । उत्पश्ये सर्वलोकेऽपि, वारिदोऽभूदवारिदः ॥ ११ ॥
भृशं निर्व्यथिरे लोकाः, भाविदुर्भिक्षशङ्कया । धर्म्मकर्म्मव्यवस्था हि, स्यात्सुभिक्षाऽनुयायिनी ॥ १२ ॥
प्राप्ते तु श्रावणे मासे, द्वितीयादिवसेऽसिते । उत्तरस्यामभूदभ्रं, लोकः सम्मुखमैयरुः ॥ १३ ॥
वाद्यानि वादयामासु-र्गीतनृत्यादि तेनिरे । आकृष्ट इव तद्भाग्यै-र्ववर्ष जलदस्तदा ॥ १४ ॥
आख्यद्भूपो निमित्तज्ञं, त्वद्वचोऽद्य वृथाऽभवत् । तत्ते करोमि जिह्वाया-श्छेदं यत्तत्प्रलापिनः ॥ १५ ॥
देव ! किञ्चित्प्रतीक्षस्व, यावन्मिलति कोऽपि मे । ज्ञानी मुनिस्तदग्रे य-द्भवेच्छास्त्रार्थनिर्णयः ॥ १६ ॥
कृषिः कृषीवलैः कर्त्तु-मारेभे मुदिताशयैः । क्षेत्रेषु बीजान्युप्तानि, सुपात्रेष्विव धार्मिकैः ॥ १७ ॥
अन्यवर्षीयनिष्पत्ते-र्निष्पत्तिर्द्विगुणाऽभवत् । तस्मिन्वर्षे नृपोऽप्यासी-त्सपौरो बहुलर्द्धिकः ॥ १८ ॥
निवृत्ते कार्त्तिके मासे, हेमन्तसमयेऽन्यदा । आययुः केचिदाचार्या, केवलज्ञानशालिनः ॥ १९ ॥
सदैवज्ञः सपौरस्ता-न्वन्दितुं नृपतिर्गतः । नैमित्तिकोक्त्यलीकत्व-हेतुं पप्रच्छ तं च सः ॥ २० ॥

अवोचन्सूरयो राजन् !, अत्रैव तव पत्तने । धनदत्त इति श्रेष्ठी, तस्य भार्या धनेश्वरी ॥ २१ ॥
तयोरन्येद्युरुत्पन्नः, सुतः सर्वसुखावहः । यस्य प्रभावतो वृष्टो, मेघो युष्मादृशां मुदे ॥ २२ ॥
अयं हि प्राग्भवे रङ्को, भिक्षावृत्तिरभूत् क्वचित् । दृष्ट्वाऽन्यदा मुनिं कञ्चि—द्ववन्दे हर्षपूरितः ॥ २३ ॥
गृहाण नियमान्कांश्चि—दिति तं संयतो जगौ । अन्यथाऽपि तवेदानीं, सम्पत्तिर्नास्ति तादृशी ॥ २४ ॥
ततस्तदन्तिके देवनत्यादीन्नियमानसौ । प्रतिपेदे क्रमाद्भाग्यैः, सोऽपि जातो महर्द्धिकः ॥ २५ ॥
प्राच्यावस्थां निजां तेन, स्मरता हृदि मण्डिताः । सज्जीकृतान्नपानाद्याः, सत्रगेहाः पदे पदे ॥ २६ ॥
रङ्कादारभ्य भूपान्तं, मनुष्यान् लक्षसम्मितान् । तदा सन्तोषयामास, साधूंश्चापि सहस्रशः ॥ २७ ॥
दानपुण्यमखण्डं त—ज्जीविताववधि स व्यधात् । भवेऽत्र तदसौ जातः, आधारः सर्वभूस्पृशाम् ॥ २८ ॥
दुर्भिक्षमभविष्यच्चे—ज्जातो नाऽभूदयं शिशुः । यदैषमोऽन्यदेशेषु, स्तोका एवाभवन् घनाः ॥ २९ ॥
अतो नैमित्तिकः सत्य—स्त्वमेतं माऽवहीलय । श्रुत्वेति विस्मितो राजा, सूरीन्नत्वा गतो गृहम् ॥ ३० ॥
आनाय्य बालकं चक्रे, तमेव नृपतिं नृपः । औचित्याऽऽचरणे सन्तः, किं मुह्यन्ति कदाचन ? ॥ ३१ ॥
यस्याऽऽधारे प्रवर्त्तन्ते, प्रजाः सौख्यसमृद्धिभिः । स एव कीर्त्यते राजा, इति स्मृतिवचो यतः ॥ ३२ ॥
धर्म्मराज इति प्रत्त—नामा भूपप्रमुखैर्जनैः । स बालोऽप्यभवद्राजा, बालार्क इव तेजसा ॥ ३३॥
तदाज्ञा यत्र देशेऽभूत्, दुर्भिक्षं तत्र नाऽभवत् । विक्रीयाऽन्येषु, देशे धान्यानि द्युम्नमर्जितम् ॥ ३४ ॥
एवं स धर्म्मप्रवणः प्रभावनां, चक्रे चिरं श्रीजिनराजशासने ।

प्रान्ते परिव्रज्य तपोभिरुत्कटैः, स मोक्षसौख्यं समवाप भूपतिः ॥ ३५ ॥

इतिश्री मुद्रित-उपदेशसप्ततिकावृत्तित उद्धृता

धर्मराजकथा संपूर्णा

२३ कठोरवचनोपरि जननी-पुत्र-कथा

विचार्य वाच्यं वचनं हितं मितं, न कर्कशं क्वापि निगद्यते बुधैः ।
अप्येकशः प्रोक्तकठोरवाक्यतो, न किं विगुप्तौ जननीसुतावपि ॥ १ ॥
छिन्नद्मि हस्तौ चरणौ च लोचने, निष्काशयामि त्वमरे ! म्रियस्व वा ।
इत्यादयः कर्कशवाक्परम्परा-स्त्याज्या बुधैर्दुर्गतिमार्गदीपिकाः ॥ २ ॥

ताम्रलिप्तीपुरी ताम्र-मयवप्रविराजिता । तत्रेभ्यो रतिसाराह्वो, बन्धुला तस्य च प्रिया ॥ १ ॥
तयोर्बन्धुमती पुत्री, प्रकृत्योद्भटवेषभाक् । सौवर्णसर्वाभरणा, श्रेष्ठिनोऽत्यन्तवल्लभा ॥ २ ॥
तां प्रत्याह पिता वत्से !, मा कार्षीर्वेषमुद्भटम् । नेदृशो वणिजां भाति, सा तथाऽपि न तिष्ठति ॥ ३ ॥
भृगुकच्छपुरात्तत्र, वाणिज्यार्थमुपेयुषा । बन्धुदत्तेन साऽन्येद्युः, परिणीता सदुत्सवैः ॥ ४ ॥
पुनः प्रभूतलाभार्थी, तां तत्रैव विमुच्य सः । रत्नद्वीपं प्रति प्रास्थात्, पोतमारुह्य वारिधौ ॥ ५ ॥

कियत्यपि व्यतिक्रान्ते, भूभागे तस्य वाहनम् । आहन्यमानं कल्लोलै-र्भङ्गमाप क्षणादपि ॥ ६ ॥
अवाप्य फलकं चैकं, बन्धुदत्तस्तदाम्बुधिम् । लग्नस्तरीतुं वातेन, प्रेरितश्च तटेऽलगत् ॥ ७ ॥
निभालयति दिक्चक्रं, यावदुद्भ्रान्तलोचनः । तावत्तन्नगरोद्याने, प्राप्तमात्मानमैक्षत ॥ ८ ॥
अहो ! दैवगतिः केयं ?, लज्यते यत्र मानवैः । ईदृक्षोऽहं कथं गन्ता ?, तत्र श्वशुरमन्दिरे ॥ ९ ॥
स्त्रीपीहर नरसासरउ, संजमियां सहवास । एत्रिण्हइ अलखामणां, जइ को करइं तपास ॥ ९ ॥
अतर्कितानि सौख्यानि, दुःखान्यपि शरीरिणाम् । भवति तदलं क्लेश-हेतुना चिन्तयाऽनया ॥ १० ॥
विचिन्त्येति स्थितो देव-कुले ज्ञापितवानसौ । श्वशुरस्य गृहे स्वस्य, तत्र प्राप्त्यादि केनचित् ॥ ११ ॥
श्रुत्वा जामातृवार्त्तां तां, मनःसन्तापकारिणीम् । आः ! किमेतदिति श्रेष्ठी, प्रोच्चरन् सहसोत्थितः ॥ १२ ॥
यावत्तदन्तिके याति, तावदस्तङ्गतो रविः । उत्सुरत्वात्कुटुम्बेन, वारितः स्वगृहे स्थितः ॥ १३ ॥
ब्राह्मे मुहूर्त्ते जामातृ-मिलनाय चचाल सः । आदाय वस्त्राभरण-प्रभृत्यवसरोचितम् ॥ १४ ॥
सौवर्णवलयव्यूहैः, शोभमानभुजालता । स्वपतिं वीक्षितुं बन्धु-मत्यपि प्रस्थिता सह ॥ १५ ॥
श्रेष्ठिनः पृष्ठिगामिन्या-स्तस्याः कोऽपि करौ तदा । चिच्छेद तस्करो लुब्धः, प्राक्कृतं कर्म नान्यथा ॥ १६ ॥
सञ्जाते तुमुले तत्र, प्राप्तास्तलवरादयः। ज्ञातस्वरूपास्तच्चौर-पदैरेव दधाविरे ॥ १७ ॥
श्रेष्ठी पश्चाद्गतो गेहे, प्रभूतो मिलितो जनः । उच्चरन्कर्म्म कर्मेति, विदधे शोकसङ्कथाम् ॥ १८ ॥
इतश्च चौरोऽप्यासन्न-प्राप्तांस्तान्वीक्ष्य विह्वलः । तद्देवकुलमायातः, सुप्तः आगस्ति यत्र सः ॥ १९ ॥

लोप्त्रं तस्यान्तिके मुक्त्वा, काकनाशं ननाश सः । भटैश्चौरोऽयमेवेति, ज्ञातं तद्वस्तुदर्शनात् ॥ २० ॥
निर्विलम्बं निर्विचारं, शूलायामधिरोपितः । स तैरिति विडम्ब्यन्ते, कर्मभिः के न जन्तवः ? ॥ २१ ॥
अथ श्रेष्ठी सुताशोकं, कृत्वा प्राप्तस्तदन्तिकम् । यावत्तावदयं प्राणै–रुज्झाञ्चक्रे खलैरिव ॥ २२ ॥
दृष्ट्वा तादृगवस्थं तं, तान् जगाद स दुःखितः । भवद्भिः किं कृतं ? भो भोः !, जामातैव हतो मम ॥ २३॥
तद्दुःखदुःखितास्तेऽपि, तत्स्वरूपे निवेदिते । सर्वे स्वस्वगृहं प्राप्ताश्चिन्तयन्तो भवस्थितिम् ॥ २४ ॥
जामातुस्तनयायाश्च, तादृक् तत्कर्म्मवैशसम् । विज्ञाय रतिसारोऽभूद्, धर्म्मसारस्ततः परं ॥ २५ ॥
अन्यदा सुयशास्तत्र, चतुर्ज्ञानी समागतः । श्रेष्ठी तद्देशनां श्रुत्वा–ऽपृच्छत्प्राच्यभवं तयोः ॥ २६ ॥
ज्ञानी प्राह पुरा शालि–ग्रामेऽभूत्काऽपि दुर्गता । महेला बालकसुता, कुटुम्बाद्यैः परिच्युता ॥ २७ ॥
सा महेभ्यगृहे नीच–कर्म्माण्युदरपूर्त्तये । करोति वत्सरूपाणि, चारयत्यङ्गजः पुनः ॥ २८ ॥
अन्यदावत्सरूपाणि, चारयित्वा सुतो गृहे । प्राप्तस्तज्जननी क्वाऽपि, कार्ये सक्ता तु नागता ॥ २९ ॥
बभूव महती वेला, स बालः क्षुधितो भृशम् । गृहप्राप्तां च तामूचे, साधिक्षेपमिदं वचः ॥ ३० ॥
शूलायां त्वमरे रण्डे !, क्षिप्ताऽभूः किमियच्चिरम् ? । बुभुक्षापीडितं मां किं, न जानासि ? विचेतने ! ॥३१ ॥
तथैव साऽपि प्रत्यूचे, छिन्नौ किं ते कराविमौ ? । यदत्र सिक्कके भोज्यं, त्वदर्थं सज्जितं मया ॥ ३२ ॥
कस्मान्न जगृहे ? मूर्ख !, दोषः को मेऽवशत्वतः । एवं ताभ्यां चिरं चक्रे, कलहो बहुलस्तदा ॥ ३३ ॥
अनालोचिततत्पापौ, तौ मातृतनयौ तव । सुताजामातरौ जातौ, तदिदं भवनाटकम् ॥ ३४ ॥

येन यादृग्वचः प्रोक्तं, स तादृक् फलमश्नुते । ततस्तत्त्वमिदं श्रेष्ठिन् !, कार्यो वचनसंवरः ॥ ३५ ॥
श्रुत्वेति तस्य सविधे व्रतमाप्य साधोः, श्रेष्ठी बभूव सुखभाग् रतिसारनामा ।
भ्रान्तौ च तौ भवमनन्तमिति प्रबुध्य, वाच्यं विचार्य वचनं मधुरं मितं च ॥ ३६ ॥

इति श्रीमुद्रित-उपदेशसप्ततिकायावृत्तित उद्धृता

जननी-पुत्र-कथा संम्पूर्णा

२४ सत्योपरि जगतसिंहकथा

पूजात्रयावश्यकयुग्मरूपा, यो लब्धवत् प्रत्यह पञ्च वेलाः। सत्यापयेत्स प्रवरस्तनूमान्, बुधैर्जगत्सिंह इव प्रशस्यः ॥१॥
श्रीपुरोजसुरत्राण--सभाभृङ्गारकारणम् । जगत्सिंह इति श्रेष्ठी, सञ्जातो योगिनीपुरे ॥ १ ॥
अखिलेऽपि पुरे ख्यातः, स एकः सत्यवादिनाम् । असत्यवादिन प्रायो, न प्रतिष्ठा ह्यवाप्यते ॥ २ ॥
स्याद्वह्नावपि शीतत्वं, पवनेऽपि स्थिरात्मता । तैथाऽपि प्रक्ष्यते तत्र, जातु नाऽसत्यवादितौ ॥ ३ ॥
तस्येति ख्यातिमाकर्ण्य, परीक्षायै कृतादरः । अपृच्छद्दुर्ज्जनान् भूपो, रहस्तन्मर्मवेदिनः ॥ ४ ॥
भो भोः ! निगद्यतामस्य, श्रेष्ठिनोऽस्ति कियद्धनम् ? । तेऽपि द्रोहपरा ऊचु-र्लक्षाः सप्ततिसंख्यया ॥ ५ ॥
कियद्दिनान्तरे भूप-स्तमुवाच कियद्धनम् । विद्यते तव ? सोऽप्याह, विमृश्य, कथयिष्यते ॥ ६ ॥

दिने द्वितीये सम्भाल्य, गृहोपस्करमाह सः । अभ्यष्ट ८४ लक्षसंख्या मे, सन्ति वित्तस्य भूपते ! ॥ ७ ॥
एव प्रागुक्तसंख्यातो-ऽधिकोक्त्या सत्य एव यत् । प्रायः स्वद्रव्यसंख्यायां, स्तोकः स्यात्सत्यवादकः ॥ ८ ॥
ततस्तुष्टेन भूपेन, लक्षषोडशकार्पणात् । कृतः कोटीध्वजः श्रेष्ठी, सत्यस्याहो ! फलं कियत् ? ॥ ९ ॥
एकदा दर्शयामास, रत्नं तस्यार्कसोदरम् । भूपः स्वकोशादानाय्य, तं प्रत्येवमुवाच च ॥ १० ॥
एतस्य सदृशं रत्नं, किमन्यद्विद्यते भुवि ? । सोऽप्याह किं धरामध्ये, पातसाहद्वयं भवेत् ॥ ११ ॥
तद्वचोरञ्जितस्तस्या—ऽर्पयत्तद्रत्नमुत्तमम् । न्यासार्थं नहि भेदः स्याम्, द्वयोः प्रीतिः स्थिरान्तरा ॥ १२ ॥
इति प्रीत्या तयोः काले, कियत्यपि गते सति । केनापि हेतुना राजा, रुष्टस्तं प्रत्यथैकदा ॥ १३ ॥
सम्पदो महतामेव, तेषामेव स्युरापदः । नीचास्तादृग्विधा एव, चन्द्रधिष्ण्यनिदर्शनात् ॥ १४ ॥
शीर्षस्य पुष्पाभरणं, मुण्डनं च विधीयते । न चयापचयौ स्यातां, भ्रुवोः केशेषु कर्हिचित् ॥ १५ ॥
ततस्तं श्रेष्ठिनं भूपो, गुप्तिवेश्मन्यधारयत् । स्वकीयं तस्य रक्षार्थं, सेवकं च न्ययोजयत् ॥ १६ ॥
तदा च श्रेष्ठिनः षड्—वेलाधर्मव्यतिक्रमः । दोदूयाक्रन्न तु क्ष्माप—स्थापनात्परतन्त्रता ॥ १७ ॥
सेवकस्य ततस्तस्य, रहः सौवर्णटङ्ककम् । दापयित्वा निजाः पुण्य—वेलाः साधितवानसौ ॥ १८ ॥
यतो भवे भवे लक्ष्मीः, प्राप्यते भववृद्धिकृत् । न तु श्रीधर्मसामग्री, क्षयमेति भवो यथा ॥ १९ ॥
इत्येकविंशतिदिनां—स्तावत्टङ्ककदापनात् । स्वकृत्यान्यकरोद्धर्मा—दरो लोकोत्तरो ह्यसौ ॥ २० ॥
प्रसन्नोऽथ सुरत्राण—स्तं निजाङ्गविभूषणैः । पञ्चवर्णदुकूलैश्च, पञ्चशः पर्यधापयत् ॥ २१ ॥

ततश्चामन्दवाद्यौघै—र्बहुलोकैश्च संयुतः । श्रेष्ठी स्वगृहमायातो, ददानोऽर्थितमर्थिषु ॥ २२ ॥
क्रमेण विजने जाते, रक्षकोऽपि स टङ्कान् । भूपादिभीतः प्रारेभे—ऽर्पयितुं गृह्यतामिति ॥ २३ ॥
श्रेष्ठ्यप्युवाच तं भद्र !, मया तेऽमी समर्पिताः । तत्त्वमेतान्यथाकामं, दत्स्व भुंक्ष्व सुखी भव ॥ २४ ॥
यत्ते प्रसादतो धर्म्मा—ऽनुष्ठानं विदधे मया । एकोऽपि धर्म्मसम्बन्धी, क्षणः कोट्यापि दुर्लभः ॥ २५ ॥
तेषु पञ्च मयैकेन, टङ्केन कृतार्थिताः । तत्तेऽधिकमपि द्रव्यं, दीयते गृह्यते कथम् ? ॥ २६ ॥
इति प्रोच्य पुनर्दान—पूर्वं तं विससर्ज सः । औचित्याचरणे सन्तः, किं मुह्यन्ति कदाचन ? ॥ २७ ॥
सपादलक्षक्ष्मापालो—ऽन्यदा सेवार्थमागतः । सुरत्राणपुरो वस्तु—द्वयं ढौकितवानिदम् ॥ २८ ॥
चान्दनं शकलं मुक्ता—फलद्वन्द्वं च निर्मलम् । दृष्ट्वा तदल्पं भूपस्तु, क्षणं रुष्ट इवाऽभवत् ॥ २९ ॥
पश्यन्ति सभ्याः सर्व्वेऽपि, न तु कोऽपि परीक्षयेत् । दध्यौ सपादलक्षीयो—ऽप्यहो ! मूर्खा अमी जनाः ॥ ३० ॥
अथोवाच जगत्सिंहो, द्वयमेतदमूल्यकम् । चान्दनस्याऽस्य खण्डस्य, पूर्वं माहात्म्यमुच्यते ॥ ३१ ॥
अग्नितप्तं शतमण—प्रमाणमपि जायते । एतत्खण्डेऽपि मध्यस्थे, तैलं हिमकणोपमम् ॥ ३२ ॥
किञ्च षाण्मासिकेनापि, ज्वरेण निधुरीकृतः । घृष्ट्वैतच्छकलं पीत्वा, भवेज्जन्तुर्निरामयः ॥ ३३ ॥
कौतुकं मौक्तिकद्वन्द्व—स्यापि देवाऽवधार्यताम् । विक्रीयैकतरद् द्वैती—यीकं ग्रन्थौ निबध्यते ॥ ३४ ॥
अवश्यं तच्च सन्ध्यायां, मिलत्युत्सुकमित्रवत् । श्रुत्वेति निस्मितो भूपः, परीक्षां कृतवांस्तयोः ॥ ३५ ॥
कथं वेत्सीति भूपेन, पृष्टः श्रेष्ठी पुनर्जगौ । आबाल्याभ्यासतो वस्तु—परीक्षा शिक्षिता मया ॥ ३६ ॥

एवं हि पुण्यविपवे, परीक्षा युज्यते सताम् । बाह्यवस्तुपरीक्षासु, मोदते न मनो मम ॥ ३७ ॥
इत्थं तदुक्तितः प्रीतः, प्रसादं स्फीतमातनोत् । तस्मै सपादलक्षीय--क्ष्मापाय च स भूमिराट् ॥ ३८ ॥
एवं पञ्चाऽऽराधयन्पुण्यवेलाः, यावज्जीवं सत्यभाषां च जल्पन् । जैनं जाग्रच्छाशनं भूरिकालं, चक्रे श्रेष्ठी श्रीजगत्सिंहनामा ॥

इति श्रीमुद्रित--उपदेशसप्ततिकावृत्तितः उद्धृता

श्रीजगतसिंहकथा संपूर्णा.

२५ सन्तोषोपरि श्री विद्यापतिनृपकथा

परिग्रहप्रौढशिलावलम्बिनः, पतन्ति संसारमहाम्बुधौ जनाः ।
सन्तोषवज्रेण विभिद्य तां पुन--स्तरन्ति विद्यापतिवत्सुमेधसः ॥ १ ॥

पोतनाख्ये पुरे राजा, शूरः शूरपराक्रमैः । श्रेष्ठी विद्यापतिस्तस्य, भार्या शृङ्गारसुन्दरी ॥ १ ॥
स्वप्ने तमेकदा लक्ष्मी--रुवाच दशमे दिने । अहं यास्यामि:हे वत्स !, चिरात्त्वं मुत्कलाप्यसे ॥ २ ॥
प्रबुद्धः सोऽपि भार्यायै, तं वृत्तान्तं न्यवेदयत् । लक्ष्मीनाशे कथं कार्य--मिति चिन्तातुरः पुनः ॥ ३ ॥
विशुद्धबुद्धिः साऽप्याह, यद्येवं सकलाऽपि सा । व्ययनीया सुपात्रादा--वन्यथाऽपि हि यास्यति ॥ ४ ॥
अथ व्ययितुमारेभे, स श्रेष्ठी सकलं धनम् । तथाऽपि वर्द्धते किन्तु, कूपोदकमिवाऽन्वहम् ॥ ५ ॥
यथा यथा व्ययस्तस्य, गेहे वृद्धिस्तथा तथा । दीयमानोऽपि भारत्याः, कोशः किं नाम हीयते ? ॥ ६ ॥

परिग्रहव्रते मान—मेवं जगृहतुर्मिथः ॥ ७ ॥
जिनालये जिनेन्द्रस्य, पुरस्तात्तौ च दम्पती । वेषयोर्युग्ममेकैव, भार्या शृङ्गारसुन्दरी ॥ ८ ॥
त्रिः पूजा द्विः प्रतिक्रान्ति—र्भोजनं दानपूर्वकम् । कच्चोलं भाजनं चैकं, सौवर्णे ते उभे परम् ॥ ९ ॥
मासे च विंशतिदिना—न्यावयोः शीलमुत्तमम् । चतुष्प्रकाराहारस्य, त्यागो रात्रौ च सर्वथा ॥ १० ॥
वासरे चैकशो भुक्तिः, पौषधः पर्ववासरे । मासयोग्यं गृहे धान्यं, नियमो द्विपदादिषु ॥ ११ ॥
एकं च टङ्कशतं, जीर्णनाणकसम्भवम् । पूजोपकरणं सर्वं, मुत्कलं परमावयोः ॥ १२ ॥
सच्चित्तमेकं मुक्त्वाऽन्य—सचित्तनियमोऽस्तु नः । प्रतिपद्य गृहं गत्वा, व्ययतः स्म समां श्रियम् ॥ १३ ॥
एवं सम्यक्त्वमूलानि, व्रतानि द्वादशाऽप्यमू । रात्रौ सुप्तः श्रिया प्रोक्तः, स्थिताऽहं वत्स ! ते गृहे ॥ १४ ॥
स विश्राणितसर्वस्वो, निश्चिन्तो दशमे दिने । उपस्थितोऽपि विघ्नस्ते, क्षीणः पुण्याऽनुभावतः ॥ १५ ॥
त्वत्पुण्यदामभिर्बद्धा, क्वाऽप्यहं गन्तुमक्षमा । तया नियन्त्रिता सा हि, चञ्चलाऽपि क्व गच्छति ॥ १६ ॥
शृङ्खलासदृशं पुण्यं, मर्कटीसदृशा रमा । त्यक्त्वा गृहमपि ज्ञाति—वर्गीयान्मुत्कलाय्य च ॥ १७ ॥
अथाऽन्यदिवसे श्रेष्ठी, कृत्वा तामपि पात्रसात् । नगरान्निर्ययौ पुण्य—समूहो मूर्त्तिमानिव ॥ १८ ॥
मौलौ करण्डिकां कृत्वा, जिनार्च्चायाः स धार्म्मिकः । अपुत्रस्य क्षितिपते—रासीदाकस्मिकी मृतिः ॥ १९ ॥
प्रतोलीं यावदायात—स्तावत्तत्पुरवासिनः । साम्राज्यं च प्रदत्तं तै—स्तस्यैव श्रेष्ठिनस्तदा ॥ २० ॥
इतश्च पञ्चदिव्यानि सज्जितानि नियोगिभिः । तदा च दैवीवाग् जाता, तव भाग्यमहो ! महत् ॥ २१ ॥
स प्राह नाहं राज्याऽर्हो—ऽभिषेकेन सृतं मम ।

मा कार्षीः प्रतिषेधं त—न्नाऽन्यथा भवितव्यता । श्रेष्ठ्यपि प्राह यद्येवं, तदा शृणुत मद्वचः ॥ २२ ॥
पूर्वं श्रीजिनबिम्बस्य, कुरुध्वमभिषेचनम् । पश्चान्ममेति तेऽप्येव—मकार्षुर्हर्षपूरिताः ॥ २३ ॥
एवं च प्राप्तसाम्राज्यः, स श्रेष्ठी सपरिच्छदः । नृपसौधमलञ्चक्रे, पुरस्कृतमङ्गलः ॥ २४ ॥
न्यस्य सिंहासने मुख्ये, जिनेन्द्रप्रतिमामसौ । स्वयं तत्पादपीठस्थो, राजकार्याण्यसाधयत् ॥ २५ ॥
रत्नवृष्टिं तदा चक्रुः, सम्यग्दृष्टिसुरा वराः । एकछत्रं जिनस्येव, स राज्यं समसन्नयत् ॥ २६ ॥
अकरोदकरं लोकं, धर्म्मकर्म्मणि कर्म्मठम् । सर्वत्राऽपि जिनाज्ञाऽभूत्, यथा राजा तथा प्रजाः ॥ २७ ॥
स पञ्चशतसंख्यानि, जिनचैत्यान्यचीकरत् । स्वर्णरत्नमयीस्तेषु, प्रतिमाश्च न्यवीविशत् ॥ २८ ॥
अखण्डितस्वनियमो, जिनाज्ञामप्यखण्डयन् । अखण्डं स चिरं राज्यं, चकार जिननिश्रया ॥ २९ ॥

इति नियम्य परिग्रहसागरं, स नृपतिः पदमव्ययमाप्तवान् ।
कुरुत तेन परिग्रहनिग्रहं, सपदि यूयमपीच्छथ चेत् सुखम् ॥ ३० ॥

इति श्रीमुद्रित-उपदेशसप्तकावृत्तित उद्धृता

विद्यापतिनृपकथा सम्पूर्णा.

२६ सामायिकव्रतोपरि केसरीचौरकथा

सामायिकं स्यात्समताविहीनं, निरर्थकं भव्यजनास्तदेतत् ।

आराध्यतां केसरिवद्भवद्भि—र्यथा समस्तानि सुखानि वः स्युः ॥ १ ॥

सामाइयं कुणंतो, समभावं सावओवि घडियदुगं । आउं सुरेसु बंधइ, इत्तियमेत्ताइं पलिआइं ॥ १ ॥
बाणवइकोडीओ, लक्खागुणसट्ठि सहसपणवीसं । नवसय पणवीसाए, सतिहा अडभाग पलिअस्स ॥ २ ॥
सामायिकं समतया, वियुक्तं यः समाचरेत् । करोति परमान्ने स, क्षारक्षेपं विमूढधीः ॥ ३ ॥

श्रीनिवासपुरे राजा, रिपुमर्द्दन इत्यभूत् । श्रेष्ठी समरसिंहाख्य–स्तत्र धर्म्मैककर्म्मठः ॥ १ ॥
तत्पुत्रः केसरीनामा, प्रकृत्येर्ष्यालुरुद्धतः । व्यसनी दुर्विनीतश्च, कुलाङ्गार इवाऽभवत् ॥ २ ॥
अथ निष्काशितो गेहा–त्स पित्रा सर्वसाक्षिकम् । ततो निरङ्कुशश्चक्रे, स चौर्यं सर्वसद्मसु ॥ ३ ॥
इत्थं पुरान्तस्तन्वाने, स्तैन्ये, तस्मिन्नृपोऽन्यदा । सभानिविष्टः प्रोवाच, कोऽयं ? कस्य सुतोऽथवा ? ॥ ४ ॥
तदा तत्र निविष्टस्त–त्तातः प्राह कृताञ्जलिः । दुष्पुत्रोऽयं मम स्वामिन् !, मया निर्वासितो गृहात् ॥ ५ ॥
चौर्यं विना न भोक्तव्यं, मयेत्यस्याऽस्त्यभिग्रहः । एतद्विशेपसम्बन्धः, पुनरित्यवधार्यताम् ॥ ६ ॥
एकदाऽयं सरस्तीरे, स्थितो ध्यायति दुष्टधीः । यावत्तावन्नभोमार्गे, पादुके पदयोर्दधत् ॥ ७ ॥
योगी कोऽप्यागतस्तत्र, ते मुक्त्वा तत्र यावता । स्नानादि कुरुते ताव–त्ते लात्वैप खमुद्ययौ ॥ ८ ॥
तयोः प्रभावादेकोऽपि, नैकतस्करकार्यकृत् । दुष्टरोग इवाऽसाध्यो, पुरस्याऽयं विभोऽभवत् ॥ ९ ॥
पुराधिष्ठातृदेव्यग्रे, वक्ति चैवं स्तुतिं सृजन् । चौरिकार्द्धेन ते भोगं, करिष्येऽर्द्धं ममाऽस्तु च ॥ १० ॥
भाविनी सफला सा चे–त्प्रसादात्तव देवि ! मे । अनुज्ञातस्तयाऽप्येप, सिद्धचौरस्ततोऽभवत् ॥ ११ ॥

भूपोऽथ लब्धतन्मर्म्मा, सारैः परिवृतो भटैः । देवीभवनमागत्य, प्रच्छन्नं स्थितवान् क्वचित् ॥ १२ ॥
तदा च तस्करोऽप्यागात्, तां देवीं जननीमिव । अर्चितुं पादुके पाणौकृत्य कस्याऽप्यविश्वसन् ॥ १३ ॥
भूपतिः प्रकटीभूय, तमाक्रोशति यावता । पक्षिवत्तावदुड्डीनः, पादुके परिधाय सः ॥ १४ ॥
याति यात्येप भोश्चौरः, इति भूपतिभाषिताः । कृतकोलाहलाः सर्वे, भटास्तमनुधाविताः ॥ १५ ॥
अभिग्रहस्य मे भङ्गो, नूनमद्य भविष्यति । यतो याति विना चौर्यं, दिनमद्यतनं मम ॥ १६ ॥
इत्यादि चिन्तयंश्चौरो—ऽप्यग्रेहे गच्छन्नधो भुवि । अपश्यन् ज्ञानिनं कञ्चि–द्वदन्तमिति पर्षदि ॥ १७ ॥
भो भोः प्राणिगणाः ! लब्ध्वा, मानुष्यं रत्नयोनिवत् । रत्नमेकं स्थिरीकार्यं, दुर्लभं द्रव्यकोटिभिः ॥ १८ ॥
ईदृग् रत्नं मयाऽद्याऽपि, चोरितं नास्ति किं कृतम् ? । इत्युत्कर्णोऽभवद्याव--त्तावन्मुनिरभाषत ॥ १९ ॥
एकं सामयिकं रत्नं, दुष्प्रापममरैरपि । रागद्वेषादिदस्युभ्यो, रक्षणीयं प्रयत्नतः ॥ २० ॥
अन्तर्मुहूर्त्तं चित्तस्य, यत्साम्यं तन्निगद्यते । सामायिकं यत्र हेयाः, कषाया एव केवलम् ॥ २१ ॥
न वाह्याऽऽडम्बरः कोऽपि, यस्य दानादिपुण्यवत् । तद्यथाऽवसरं कार्य–महोरात्रमुपासकैः ॥ २२ ॥
श्रुत्वेति केसरी चौर--स्तत्र सस्पृहतां दधत् । मनःसाक्षिकमातेने, व्रतं सामयिकाऽभिधम् ॥ २३ ॥
त्यक्तद्वेषो मनःशुद्ध--भावेन मुनिभाषितम् । अनुष्ठानमयं चक्रे, नृपादेरपि निर्भयः ॥ २४ ॥
वावाराणं गुरुओ, मणवावारो जिणेहिं पन्नत्तो । जो नेइ सत्तमीए, अहवा मुक्खं पराणेइ ॥१॥
तदा च लघुकर्म्मत्वा–त्तस्य केवलमुज्ज्वलम् । बभूव महिमानं च, चक्रुस्तस्य सुरेश्वराः ॥ २५ ॥

सहस्रपत्रसौवर्ण--कमले निषसाद सः । तदग्रे देशनां चक्रे, देवतादत्तवेषभृत् ॥ २६ ॥
अथ प्राप्तो नृपस्तत्र, तद्वृत्तं तादृशं पुनः । निरीक्ष्य विस्मितोऽत्यन्त--महो ! कर्म्मविचित्रता ॥ २७ ॥
केवली प्राह राजेन्द्र !, पश्य सामायिकव्रतम् । यस्य जातं क्षणार्द्धेऽपि, फलं लोकोत्तरं मम ॥ २८ ॥
एवं प्रबोध्य राजादीन्, लोप्त्रं सर्वं निवेद्य च । लोकोपकृतये चक्रे, विहारं वसुधातले ॥ २९ ॥
एवं स केसरिमुनिः प्रतिबोध्य भूरि--कालं जनान् विदलिताऽखिलकर्म्मजालः ।
प्राप्तो यदुच्चपदवीं तदिदं फलं हि, सामायिकव्रतभवं विमृशन्तु सन्तः ! ॥ ३० ॥

इतिश्री मुद्रित--उपदेशसप्ततिकावृत्तित उद्धृता

केसरीचौरकथा संम्पूर्णा.

२७ प्रतिक्रमणोपरि सज्जनदण्डनायककथा

भव्यैः प्रतिकमणमादरणीयमेत--द्यतपञ्चधा जिनवरैर्गदितं हितार्थम् ।
पापान्निवृत्तिरसकृत्सुकृते प्रवृत्ति--रित्थं बुधैर्यदभिधार्थ उदीरितश्च ॥ १ ॥

यदुक्तम्---मिच्छत्तपडिकमणं, तहेव अस्संजमे पडिकमणं । कसायाण पडिकमणं, जोगाण य अप्पसत्थाणं ॥ १
संसारपडिकमणं, चउव्विहं होइ आणुपुव्विए । तीए पच्चुप्पन्ने, अणागए चेव कालंमि ॥ २ ॥

स्वस्थानाद्यत्परस्थानं, प्रमादस्य वशाद्गतः । तत्रैव क्रमणं भुयः, प्रतिक्रमणमुच्यते ॥ ३ ॥
एकस्मिन्नपि यद्येते, स्युः प्रकाराः प्रतिक्रमे । पापादीनां तदा भाव–प्रतिक्रमणमुच्यते ॥ ४ ॥
प्रतिक्रमणमीदृक्षं, ये कुर्वन्ति दिने दिने । तेषामिहाऽप्यमुत्राऽपि, सुखं सज्जनवद्भवेत् ॥ ५ ॥
बाणवह्न्यर्क १२३५ संख्येये, वर्षे श्रीपत्तने पुरे । प्रथिलो भीमदेवोऽभूत्, भूपतिर्भाग्यभासुरः ॥ १ ॥
वेश्या सहस्रकलाख्या, तेन स्वान्तःपुरी कृता । राज्यराष्ट्रादिचिन्तां तु, कुरुते सैव भूपवत् ॥ २ ॥
श्रीमालज्ञातिवांस्तत्र, सज्जनो दण्डनायकः । राज्येऽधिकारी सम्यक्त्व—द्वादशव्रतभूषितः ॥ ३ ॥
स जिनं पूजयित्वैव, भुङ्क्ते शेते विधाय च । प्रतिक्रान्तिमिदं तस्य, निश्चयद्वितयं दृढम् ॥ ४ ॥
अन्येद्युः पत्तने प्राप्ता, यवनानामनीकिनी । सबालवृद्धः सर्वोऽपि, लोकोऽभूद्भयविह्वलः ॥ ५ ॥
सज्जनेन समं देवी, सैन्यमादाय सम्मुखम् । गता सज्जीकृता चाशु, रणक्षेत्रस्य भूमिका ॥ ६ ॥
अश्वानां मानवानां च, जिन २४ दन्त ३२ प्रमास्तदा । सहस्रा अभवन्नष्टा—दशहस्तिशतानि च ॥ ७ ॥
गजाऽश्वशस्त्रसंनाहान्, सुभटानां पृथक् पृथक् । देव्यार्प्पयत्सज्जनं च, सेनानीत्वेऽभ्यतिष्ठिपत् ॥ ८ ॥
ब्राह्मे मुहूर्त्तेऽध्यारूढः, सज्जनो द्विरदं स्वयम् । युद्धाय प्रगुणीचक्रे, समग्रानपि सैनिकान् ॥ ९ ॥
हस्तिकुम्भस्थ एवाऽसौ, स्थापयित्वाऽक्षमालिकाम् । प्रतिक्रमणमातेने–ऽवसरज्ञा हि तादृशाः ॥ १० ॥
पार्श्वस्थाश्चिन्तयन्त्येव–मेष किं योत्स्यति प्रभुः । धार्म्मिको ह्येष युद्धं तु, साध्यं निर्दयमानसैः ॥ ११ ॥
ततो द्विघटिके जाते, प्रतिक्रम्य समाधिना । सामायिकं पारयित्वा, सैन्यं सर्वमचालयत् ॥ १२ ॥

हस्तिस्थेनापि यत्नेन, प्रतिक्रान्तिस्तदा कृता । तत्सैन्यमिलनायैवा-ऽन्यथा तत् शिथिलीभवेत् ॥ १३ ॥
प्रतिक्रमणवेलायाः, व्यतिपातोऽपि सम्भवी । एषोऽपि हेतुः सर्वं हि, कार्यं काले कृतं शुभम् ॥ १४ ॥
अथ युद्धं महज्जातं, सैन्ययोरुभयोरपि । गजाऽश्वरथपत्त्याद्याः, यथा स्वं स्वं डुढौकिरे ॥ १५ ॥
सज्जनेन तथा युद्धं, तथा चक्रे यथा क्षणात् । समस्तं यवनानीकं, काकनाशं ननाश तत् ॥ १६ ॥
सज्जनस्य परं घाताः, दश लग्नास्तदा तनौ । उत्पाट्य नीतो देव्यग्रे, साऽप्येनं प्रत्यचीकरत् ॥ १७ ॥
सज्जनस्य परं घाताः, दश लग्नास्तदा तनौ । उत्पाट्य नीतो देव्यग्रे, साऽप्येनं प्रत्यचीकरत् ॥ १८ ॥
दुकुलाञ्चलवातेन, तस्य वातमवीजयत् । आह्वयच्च महावैद्यान्, कृतास्तैश्च प्रतिक्रियाः ॥ १८ ॥
दुकुलाञ्चलवातेन, तस्य वातमवीजयत् । रात्रौ 'एगिंदिया बेइन्दिआ' इत्याद्यमूचिवान् ॥ १९ ॥
देव्यग्रे सुभटैरुक्तं, स्वामिन्यस्य विमुच्यते । देव्याह सज्जनं चक्रे, विरुद्धं किमिदं भवान् ? ॥ २० ॥
प्रातर्युद्धं तथा चक्रे, यथा कोऽपि चकार न । प्रातस्त्वदीयं येनेदं, तवाऽऽयत्तं वपुर्मम ॥ २१ ॥
सोऽप्याह स्वामिनि ! स्वीयं, रात्रौ कार्यं कृतं मया । श्रुत्वेति तं प्रशंसन्ति, धर्म्मे दार्ढ्यमहो ! कियद् ? ॥ २२ ॥
ममायत्तं मनस्तेन, स्वकार्यं निर्मितं मया । वैद्यैः क्रमेण श्रीधर्म्मं, राजकार्यं च स व्यधात् ॥ २३ ॥
जगाम पत्तनं देवी, सज्जनोऽपि पटूकृतः । तेषां हस्तगतैव स्यात्, निर्वाणसुखसन्ततिः ॥ २४ ॥
सङ्कटे पतितेऽप्येवं, ये न मुञ्चन्ति निश्चयम् । दिवारात्रौ तथा पक्षे, चातुर्मास्यां च वत्सरे ॥ २५ ॥
अन्यथा वा प्रतिक्रान्तिं, पञ्चधा ब्रुवते बुधाः । मज्झिमगाण जिणाणं, कारणजाए पडिक्कमणं ॥१॥
सपडिक्कमणो धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स । अंतो अहो निसस्सा, तम्हा आवस्सयं नाम ॥ २ ॥
समणेन सावएण य, अवस्सकायव्वयं हवइ जम्हा ।

इत्थं प्रतिक्रमणमप्वनणुप्रमाद—मुत्सृज्य भव्यनिवहाः ! क्रियतां भवद्भिः ।
यस्मिन्कृतेऽथ भवभारवियुक् शरीरी, भारप्रमुक्त इव भारवहो लघुः स्यात् ॥ २६ ॥

इति श्रीमुद्रित–उपदेशसप्ततिकावृत्तित उद्धृता

सज्जनदंडनायककथा संपूर्णा.

२८ धान्यसंग्रहोपरि तिलकश्रेष्ठीकथा

श्रेष्ठ्यासीत्तिलको नाम, पुरेऽचलपुरे पुरा । असौ पुरेषु ग्रामेषु, चाकरोद्धान्यसंग्रहम् ॥ १ ॥
माषमुद्गतिलव्रीहिगोधूमचणकादिकम् । ददौ सार्द्धिकया धान्यं, काले सार्द्धं च सोऽग्रहीत् ॥ २ ॥
धान्यैर्धान्यं धनैर्धान्यं, धान्यं जीवधनैरपि । उपायैश्चाग्रहीद्धान्यं, ध्यायन् धान्यं स तत्त्ववत् ॥ ३ ॥
दुर्भिक्षकाले धान्येभ्यः, प्रत्युपात्तैर्महाधनैः । बभार परितो धान्यै–रिवासौ धान्यकोष्ठकान् ॥ ४ ॥
पुनः सुभिक्षे धान्यं स, क्रीत्वा क्रीत्वा समग्रहीत् । लब्धास्वादः पुमान् यत्र, तत्रासक्तिं न मुञ्चति ॥ ५ ॥
कीटकोटिवधं नैषोऽ–जीगणत् कणसंग्रहे । पीडां पञ्चेन्द्रियाणा–मप्यतिभाराधिरोपणात् ॥ ६ ॥
नैमित्तः कोऽपि तस्याख्यद्–भाविदुर्भिक्षमैषमः । सर्वस्वेनाथ सोऽक्रीणात्कणान् पुनरतृप्तिकः ॥ ७ ॥
वृद्धयाऽपि द्रव्यमाकृष्याग्रहीद्धान्यमनेकधा । स्थानाभावे गृहेऽक्षैप्सीत्, किं न कुर्वीत लोभवान् ॥ ८ ॥

असौ जगदमित्रस्य मित्रस्येवोन्मनास्ततः । दुर्भिक्षस्यैष्यतो मार्गमीक्षाञ्चक्रे दिने दिने ॥ ९ ॥
अथ वर्षाप्रवेशेऽपि ववर्षोपेत्य सर्वतः । धारासारैर्घनस्तस्य हृदयं दारयन्निव ॥ १० ॥

गोधूममुद्गकलमाश्चणका मकुष्ठा, मापास्तिलास्तदपरेऽपि कणा विनश्य ।
यास्यन्ति संप्रति हहेति स तैरत्रसो, हृत्स्फोटजातमरणान्नरकं प्रपेदे ॥ ११ ॥

इति श्रीमुद्रित–योगशास्त्रवृत्तितः उद्धृता

तिलकश्रेष्ठिकथा संपूर्णा.

२९ सुवर्णसंग्रहकार नन्दराजकथा

प्राच्यां महेन्द्रनगरीप्रतिबिम्बमिवोच्चकैः । आख्यया पाटलीपुत्रमित्यस्ति प्रवरं पुरम् ॥ १ ॥
आसीत्तत्रातिसुत्रामा, शत्रुवर्गविरुत्रणे । त्रिखण्डवसुधाधीशो, नन्दो नाम नरेश्वरः ॥ २ ॥
सोऽकराणां करं चक्रे, सकराणां महाकरम् । महाकराणामपि च, किञ्चिच्चक्रे करान्तरम् ॥ ३ ॥
यं कञ्चिद्दोषमुत्पाद्य, धनिभ्यो धनमग्रहीत् । छलं वहति भूपानां, हलं नेति नयं वदन् ॥ ४ ॥
सर्वोपायैर्धनं लोका–न्निष्कृपः स उपाददे । अपामब्धिर्नृपोऽर्थानां, पात्रं नान्य इति ब्रुवन् ॥ ५ ॥
तथाऽर्थं सोऽग्रहील्लोका–ल्लोकोऽभून्निर्धनो यथा । भूमावूर्णायुचीर्णायां न खलु प्राप्यते तृणम् ॥ ६ ॥

हिरण्यनाणकाऽऽख्याऽपि, तेन लोकेषु नाशिता । प्रवृत्तो व्यवहारोऽपि, चर्मणो नाणकैस्तदा ॥ ७ ॥
पाखण्डिनोऽपि वेश्या अप्यसावर्थमदण्डयत् । हुताशनः सर्वभक्षी, न हि किञ्चिद्विमुञ्चति ॥ ८ ॥
श्रीवीरमोक्षादेकोन–विंशत्यब्दशतेषु यः । साग्रेषु भावी किं सोऽयं, कल्कीति जनवागभूत् ॥ ९ ॥
आक्रोशान् पश्यतोऽप्यस्य, भूमिभाजनभोजनः । जनो ददौ गतभयो, भयं भवति भाजने ॥ १० ॥
स स्वर्णैः पर्वतांश्चक्रे, पूरयामास चावटान् । भाण्डागाराणि चापूरि, पूर्णकामस्तु नाभवत् ॥ ११ ॥
आकर्ण्य तत्तथाऽयोध्या–नाथेनाथ हितैषिणा । तं प्रबोधयितुं वाग्मी, दूतः प्रेषित आगमत् ॥ १२ ॥
सर्वतोऽप्याहृतश्रीकं, निःश्रीकं तं तथापि हि । दूतो भूपमथापश्य–न्नत्वा चोपाविशत्पुरः ॥ १३ ॥
सोऽनुज्ञातो नृपेणोचे, श्रुत्वा मत्स्वामिवाचिकम् । कोपितव्यं न देवेन, न हिताश्चाटुभाषिणः ॥ १४ ॥
अवर्णवादो देवस्य, यः परम्परया श्रुतः । स प्रत्यक्षीकृतो ह्यद्य, न निर्मूला जनश्रुतिः ॥ १५ ॥
अन्यायतोऽर्थलेशोऽपि, राज्ञः सर्वयशच्छिदे । अप्येकं तुम्बिकाबीजं, गुडभारान् विनाशयेत् ॥ १६ ॥
आत्मभूताः प्रजा राज्ञो, राजा न च्छेत्तुमर्हति । क्रव्यादा अपि न क्रव्यं, निजमश्नन्ति जातुचित् ॥ १७ ॥
प्रजाः पुषाण पुष्णन्ति, पोषिता एव ता नृपम् । वश्याऽपि न ह्यनड्वाही, दत्ते दुग्धमपोषिता ॥ १८ ॥
सर्वदोषप्रसूर्लोभो, लोभः सर्वगुणापहः । लोभस्तत्त्यज्यतामेत–त्त्वद्धितो वक्ति मत्प्रभुः ॥ १९ ॥
नन्दोऽपि तद्गिरा दाव–दग्धभूरिव वारिणा । अत्युष्णबाष्पममुञ्चद्, दग्धुकाम इवाशु तम् ॥ २० ॥
राजदौवारिको जातु, न वध्य इति नन्दराट् । उत्थाय गर्भवेश्मान्तः, सशिरोऽर्त्तिरिवाविशत् ॥ २१ ॥

नासौ सदुपदेशानां, जवासक इवाम्भसाम् । योग्य इत्यामृशन् दूतो-ऽप्यगात् स्वस्वामिनोऽन्तिकम् ॥ २२ ॥
नन्दोऽप्यन्यायपापोत्थैर्वेदनादानदारुणैः । रोगैरिहापि संप्राप्तः, परमाधार्मिकैरिव ॥ २३ ॥
वेदनाभिर्दारुणाभिः, पीड्यमानो यथा यथा । नन्दश्चक्रन्द लोकोऽभू-ज्जातानन्दस्तथा तथा ॥ २४ ॥
पच्यमानो भृज्यमानो, दह्यमान इव व्यथाम् । अवाप नन्दः स्तोकं हि, सर्वं तादृक्षपाप्मनः ॥ २५ ॥

ये भूतले विनिहिता गिरिवच्च कूटीभूताश्च येऽद्य मम काञ्चनराशयस्ते ।
कस्य स्युरित्यभिगृणन्नवितृप्त एव, मृत्वा निरस्तभवदुःखमवाप नन्दः ॥ २६ ॥

इति श्रीमुद्रित–योगशास्त्रवृत्तितः उद्धृता

नन्दनृपकथा संपूर्णा.

३० सन्तोषोपरि अभयकुमारकथा

अन्यदा गणभृद्देव–सुधर्मस्वामिनोऽन्तिके । प्रव्रज्यामग्रहीत्कोऽपि, विरक्तः काष्ठभारिकः ॥ १ ॥
विहरन् स पुरे पौरैः, पूर्वावस्थाऽनुवादिभिः । अभर्त्स्यतोपाहस्य-तागर्ह्यतापि पदे पदे ॥ २ ॥
नावज्ञां सोढुमीशोऽत्र, विहरामि तदन्यतः । इति व्यज्ञपयत् स श्री–सुधर्मस्वामिनं ततः ॥ ३ ॥
सुधर्मस्वामिनाऽन्यत्र, विहारक्रमहेतवे । आपृच्छ्यताभयः पृच्छन्, ज्ञापितस्तच्च कारणम् ॥ ४ ॥

दिनमेकं प्रतीक्षध्व---मूर्ध्वं यत्प्रतिभाति वः । तद्विधत्तेत्ययाचिष्ट, प्रणम्य श्रेणिकात्मजः ॥ ५ ॥
सोऽथ राजकुलात्कृष्ट्वा, रत्नकोटित्रयीं बहिः । दास्याम्येतामेव लोकाः, पटहेनेत्यघोषयत् ॥ ६ ॥
ततश्चेयुर्जनाः सर्वे--ऽप्यवोचदभयोऽप्यदः । जलाग्निस्त्रीवर्जको य--स्तस्य रत्नोच्चयोऽस्त्वयम् ॥ ७ ॥
लोकोत्तरमिदं लोकः, स्वामिन् ! किं कर्तुमीश्वरः ? इति तेष्वाभाषमाणे--ष्वभयोऽपीत्यभाषत ॥ ८ ॥
यदि वो नेदृशः कश्चि--द्रत्नकोटीत्रयं ततः । जलाग्निस्त्रीमुचः काष्ठ--भारिणोऽस्तु महामुनेः ॥ ९ ॥
सम्यगीदृगयं साधुः, पात्रं दानस्य युज्यते । मुधाऽसौ जहसेऽस्माभि--रिति तैर्जगदेऽभयः ॥ १० ॥
अस्य भर्त्सोपहासादि, न कर्त्तव्यमतः परम् । आदिष्टमभयेनैवं, प्रतिपद्य ययुर्जनाः ॥ ११ ॥
एवं बुद्धिमहाम्भोधिः, पितृभक्तिपरोऽभयः । निरीहो धर्मसंसक्तो, राज्यमन्वशिषत्पितुः ॥ १२ ॥
वर्त्तमानः स्वयं धर्मे, स प्रजा अप्यवर्त्तयन् । प्रजानां च पशूनां च, गोपायत्ताः प्रवृत्तयः ॥ १३ ॥
राजा चक्रे जजागार, यथा द्वादशधा स्थिते । तथा श्रावकधर्मे--ऽसावप्रमद्वरमानसः ॥ १४ ॥
बहिरङ्गान् यथाऽजैषीद्--दुर्जयानपि विद्विषः । अन्तरङ्गानपि तथा, स लोकद्वयसाधकः ॥ १५ ॥
तमूचे श्रेणिकोऽन्येद्यु--र्वत्स ! राज्यं त्वमाश्रय । अहं श्रयिष्ये श्रीवीर--शुश्रूषासुखमन्वहम् ॥ १६ ॥
पित्राज्ञाभङ्गसंसार--भीरुरित्यभयोऽब्रवीत् । यदादिशत तत्साधु, प्रतीक्षध्वं क्षणं परम् ॥ १७ ॥
इतश्च भगवान् वीरः, प्रव्राज्योदायनं नृपम् । मरुमण्डलतस्तत्राभ्यागत्य समवासरत् ॥ १८ ॥
ततो गत्वाऽभयो नत्वा, पप्रच्छ चरमं जिनम् । राजर्षिः कोऽन्तिमोऽथाख्यत्तत्रैवोदायनं प्रभुः ॥ १९ ॥

गत्वोचे श्रेणिकं सोऽस्मि, राजा चेन्न ऋषिस्तदा । श्रीवीरोऽन्तिमराजर्षिं शशंसोदायनं यतः ॥ २० ॥
श्रीवीरं स्वामिनं प्राप्य, प्राप्य त्वत्पुत्रतामपि । नो छेत्स्ये भवदुःखं चे--न्मत्तः कोऽन्योऽधमस्ततः ॥२१॥
नाम्नाऽहमभयस्तात ! सभयोऽस्मि भवाद्भृशम् । भुवनाभयदं वीरं, तच्छ्रयामि समादिश ॥ २२ ॥
तदलं मम राज्येना--भिमानसुखहेतुना । यतः सन्तोषसाराणि, सौख्यान्याहुर्महर्षयः ॥ २३ ॥
निर्बन्धाद्ग्राह्यमाणोऽपि, न यदा राज्यमग्रहीत् । तदाऽभयो व्रतायानु--जज्ञे राज्ञा प्रमोदतः ॥ २४ ॥
राज्यं तृणमिव त्यक्त्वा, सन्तोषसुखभागसौ । दीक्षां चरमतीर्थेश--वीरपादान्तिकेऽग्रहीत् ॥ २५ ॥
संतोषमेवमभयः सुखदं दधानः, सर्वार्थसिद्धिसुरधाम जगाम मृत्वा ।
सन्तोषमेवमपरोऽप्यवलम्बमान--स्तान्युत्तरोत्तरसुखानि नरो लभेत ॥ २६ ॥

इति श्रीमुद्रित--योगशास्त्रवृत्तितः उद्धृता

अभयकुमारकथा संपूर्णा.

३१ सामायिकव्रतोपरि चन्द्रावतंसनृपकथा

अस्ति साकेतनगरं, श्रीसङ्केतनिकेतनम् । हसितेन्द्रपुरश्रीकं, सिताहृच्चैत्यकेतनैः ॥ १ ॥
तत्र लोकदृगानन्दो, द्वितीय इव चन्द्रमाः । चन्द्रावतंसो राजा--ऽसीदवतंस इवावनेः ॥ २ ॥

स यथा धारयामास, शस्त्राणि त्राणहेतवे । तीक्ष्णानि शिक्षावशतो, व्रतान्यपि तथा सुधीः ॥ ३ ॥
माघमासे विभावर्यां, सोऽन्यदा वासवेश्मनि । आदीपज्वलनं स्थास्या--मीति सामायिके स्थितः ॥ ४ ॥
तच्छय्यापालिका ध्वान्तं, स्वामिनो मा स्म भूदिति । याते प्राग्यामिनीयामे, प्रदीपे तैलमक्षिपत् ॥ ५ ॥
गते यामे द्वितीयस्मिन्न--पि सा भक्तमानिनी । जाग्रती दीपके क्षीण--तैले तैलं न्यधात्पुनः ॥ ६
त्रियामायास्तृतीयस्मि--न्नपि यामे व्यतीयुषि । मल्लिकायां प्रदीपस्य, तैलं चिक्षेप सा पुनः ॥ ७ ॥
विभातायां विभावर्यामवसानमथासदत् । श्रमोत्पन्नव्यथाक्रान्तो, राजा स इव दीपकः ॥ ८ ॥

सामायिकं समधिगम्य निहत्य कर्म, चन्द्रावतंसनृपतिस्त्रिदिवं ततोऽगात् ।
सामायिकव्रतजुषो गृहिणोऽपि सद्यः, क्षीयेत कर्म निचितं सुगतिर्भवेच्च ॥ ९ ॥

इति श्रीमुद्रित--योगशास्त्रवृत्तित उद्धृता

चन्द्रावतंसनृपकथा सम्पूर्णा.

३२ उपसर्गसहने कामदेवश्रावककथा.

अनुगङ्गं पतद्धंश--श्रेणीभिरिव चारुभिः । चैत्यध्वजै राजमाना, चम्पेत्यस्ति महापुरी ॥ १ ॥
भोगिभोगायतभुज--स्तम्भः कुलगृहं श्रियः । जितशत्रुरिति नाम्ना, तस्यामासीद् महीपतिः ॥ २ ॥

अभूद् गृहपतिस्तस्यां, कामदेवाभिधः सुधीः । आश्रयोऽनेकलोकानां, महातरुरिवाध्वनि ॥ ३ ॥
लक्ष्मीरिव स्थिरीभूता, रूपलावण्यशालिनी । अभूद् भद्राकृतिर्भद्रा, नाम तस्य सधर्मिणी ॥ ४ ॥
निधौ षट् स्वर्णकोट्यः, षड् वृद्धौ षड् व्यवहारगाः । व्रजाः षट् चास्य दश–गोसहस्रमितयोऽभवन् ॥ ५ ॥
तदा च विहरन्नुर्वीं, तत्रोर्वीमुखमण्डने । पुण्यभद्राभिधोद्याने, श्रीवीरः समवासरत् ॥ ६ ॥
कामदेवोऽथ पादाभ्यां, भगवन्तमुपागमत् । शुश्राव च श्रोत्रसुधां, स्वामिनो धर्मदेशनाम् ॥ ७ ॥
कामदेवस्ततो देव–नरासुरगुरोः पुरः । प्रपेदे द्वादशविधं, गृहिधर्मं विशुद्धधीः ॥ ८ ॥
प्रत्याख्यात् स विना भद्रां, स्त्रीर्व्रजान् षड्व्रजीं विना । निधौ वृद्धौ व्यवहारे, षट् षट् कोटीर्विना वसु ॥ ९ ॥
हलपञ्चशतीं मुक्त्वा–ऽत्याक्षीत् क्षेत्राण्यनांसि तु । दिग्यात्रिकाणि, वोढृणि, पञ्च पञ्च शतान्यृते ॥ १० ॥
दिग्यात्रिकाणि चत्वारि, चत्वारि, प्रवहन्ति च । विहाय वहनान्येष, प्रत्याख्यद् वहनान्यपि ॥ ११ ॥
विनैकां गन्धकाषायीं, स तत्याजाङ्गमार्जनम् । दन्तधावनमप्यार्द्रां–मपास्य मधुयष्टिकाम् ॥ १२ ॥
ऋते च क्षीरामलकात् , फलान्यन्यानि सोऽमुचत् । अभ्यङ्गं च विना तैले, सहस्रशतपाकिमे ॥ १३ ॥
विना सुगन्धिगन्धाढ्यमुद्वर्तनकमत्यजत् । विनाष्टावौष्ट्रिकानम्भस्कुम्भान् मज्जनकर्म च ॥ १४ ॥
ऋते च क्षौमयुगलाद्, वस्त्रं सर्वमवर्जयत् । चन्दनागुरुघुसृणा–न्यपास्यान्यद् विलेपनम् ॥ १५ ॥
जातीस्रजं च पद्मं च, विना कुसुममत्यजत् । कर्णिकां नाममुद्रां च, विहायाभरणान्यपि ॥ १६ ॥
तरुष्कागुरुधूपेभ्य, ऋते धूपविधिं जहौ । घृतपूरात् खण्डखाद्या–दन्यद् भक्ष्यमवर्जयत् ॥ १७ ॥

काष्ठपेयां विना पेया--मोदनं कलमं विना । मापमुद्गकलायेभ्य, ऋते सूपं च सोऽमुचत् ॥ १८ ॥
तत्याज च घृतं सर्व--मृते शारदगोघृतात् । शाकं स्वस्तिकमण्डूक्याः, पल्यङ्काच्चापरं जहौ ॥ १९ ॥
अन्यत् स्नेहाम्लदाल्यम्लात्, तीमनं वारिखाम्भसः । जहौ सुगन्धिताम्बूलाद्, मुखवासमथापरम् ॥ २० ॥
ततः प्रभुं स वन्दित्वा, ययौ निजनिकेतनम् । तद्भार्याप्येत्य जग्राह, स्वाम्यग्रे श्रावकव्रतम् ॥ २१ ॥
कुटुम्बभारमारोप्य, ज्येष्ठपुत्रे ततः स्वयम् । तस्थौ पौषधशालाया--मप्रमादी व्रतेषु सः ॥ २२ ॥
तस्थुपस्तस्य तत्राथ, निशीथे क्षोभहेतवे । पिशाचरूपभृद् मिथ्या- दृष्टिः कोऽप्याययौ सुरः ॥ २३ ॥
शिरोरुहाः शिरस्यस्य, कर्कशाः कपिशत्विषः । चकासामासुरापक्वाः, केदार इव शालयः ॥ २४ ॥
भाण्डभित्तनिभं भालं, बभ्रुपुच्छोपमे भ्रुवौ । कर्णौ सूर्पाकृती युग्म--चुल्लीतुल्या च नासिका ॥ २५ ॥
उष्ट्रौष्ठलम्बिनावोष्ठौ, दशनाः फालसन्निभाः । जिह्वा सर्पोपमा श्मश्रु, वाजिवालधिसोदरम् ॥ २६ ॥
तप्तमूषानिभे नेत्रे, हनू सिंहहनूपमौ । हलास्यतुल्यं चिबुकं, ग्रीवोष्ट्रग्रीवया समा ॥ २७ ॥
उरः पुरकपाटोरु, भुजौ भुजगभीषणौ । पाणी शिलाभावङ्गुल्यः शिलापुत्रकसन्निभाः ॥ २८ ॥
पातालतुल्यमुदरं, नाभिः कूपसहोदरा । शिश्नं चाजगराभं, वृषणौ कुतुपोपमौ ॥ २९ ॥
जङ्घे तालद्रुमाकारे, पादौ शैलशिलोपमौ । कोलाहलरवोऽकाण्डा--शनिध्वनिभयानकः ॥ ३० ॥
स मूर्ध्न्याखुस्रजं बिभ्रत्, कण्ठे च सरटस्रजम् । नकुलान् कर्णिकास्थाने--ऽङ्गदस्थाने च पन्नगान् ॥ ३१ ॥
क्रुद्धान्तकसमुत्क्षिप्त--तर्जनाङ्गुलिदारुणम् । उदस्यन्नपकोशासिं, कामदेवं जगाद सः ॥ ३२ ॥

अप्रार्थितप्रार्थक ! रे !, किमारब्धमिदं त्वया । किं स्वर्गमपवर्गं वा, वराक ! त्वमपीच्छसि ? ॥ ३३ ॥
मुञ्चारब्धमिदं नो चेद्—नेन निशितासिना । तरोरिव फलं स्कन्धात्, पातयिष्यामि ते शिरः ॥ ३४ ॥
तर्जयत्यपि तत्रैवं, समाधेर्न चचाल सः । शरभः शैरिभारावैः, किं क्षुभ्यति कदाचन ? ॥ ३५ ॥
कामदेवः शुभध्यानाद्, न चचाल यदा तदा । व्याजहार तथैवायं, द्विस्त्रिस्त्रिदशपांसनः ॥ ३६ ॥
तत्राप्यक्षुभ्यतः सोऽस्य, क्षोभायैभं वपुर्व्यधात् । स्वशक्त्यन्तमनालोक्य, विरमन्ति खला न हि ॥ ३७ ॥
सोऽधत्त विग्रहं तुङ्गं, सजलाम्भोदसोदरम् । सर्वतोऽप्येत्य मिथ्यात्वं, राशीभूतमिवैकतः ॥ ३८ ॥
स दीर्घदारुणाकारं, विषाणद्वन्द्वमुन्नतम् । धारयामास कीनाश–भुजदण्डविडम्बकम् ॥ ३९ ॥
किञ्चिदाकुञ्चितां शुण्डां, कालपाशामिवोद्वहन् । कामदेवं जगादैवं, देवः कूटैकदैवतम् ॥ ४० ॥
मायाविन् ! मुच्यतां माया, सुखं तिष्ठ मदाज्ञया । पाखण्डगुरुणा केन, त्वमस्येवं विमोहितः ? ॥ ४१ ॥
न चेद् मुञ्चस्यमुं धर्मं, शुण्डादण्डेन तद् द्रुतम् । ऋक्ष्यामि त्वामितः स्थानाद्, नेष्यामि च नभोऽङ्गणे ॥ ४२॥
व्योम्नः पतन्तं दन्ताभ्यां, प्रेययिष्यामि चान्तरा । अवनम्य ततस्ताभ्यां, दारयिष्यामि दारुवत् ॥ ४३ ॥
पादैः कर्दममर्दं च, त्वां मर्दिष्यामि निर्दयम् । एकपीण्डीकरिष्यामि, तिलपिष्टिमिव क्षणात् ॥ ४४ ॥
उन्मत्तस्येव तस्यैवं, घोरं व्याहरतोऽपि हि । नोत्तरं कामदेवोऽदाद्, ध्यानसंलीनमानसः ॥ ४५ ॥
असंक्षुभितमीक्षित्वा, कामदेवं दृढाशयम् । द्विस्त्रिश्चतुरभाषिष्ट, तथैव स दुराशयः ॥ ४६ ॥
ततोऽप्यभीतं तं प्रेक्ष्य, शुण्डादण्डेन सोऽग्रहीत् । व्योमन्युच्छालयामास, प्रतीयेष च पूलवत् ॥ ४७ ॥

दलयामास दन्ताभ्यां, पादन्यासैर्ममर्द च । धर्मकर्मविरुद्धानां, किमकृत्यं दुरात्मनाम् ? ॥ ४८ ॥
अधिसेहे च तत् सर्वं, कामदेवो महामनाः । मनागपि च न स्थैर्यं, जहौ गिरिरिव स्थिरः ॥ ४९ ॥
तस्मिन्नचलिते ध्यानादीदृशेनापि कर्मणा । सदर्पः सर्परूपं स, विदधे विबुधाधमः ॥ ५० ॥
देवः पूर्ववदेवोचे, स तं भापयितुं ततः । कामदेवस्तु नाभैषीद्, ध्यानसंवर्मितः सुधीः ॥ ५१ ॥
भूयो भूयस्तथोक्त्वा तं, निर्भीकं प्रेक्ष्य दुःसुरः । आतोद्यमिव वध्रेण, स्वभोगेनाभ्यवेष्टयत् ॥ ५२ ॥
निःशूकमेव दशनै–र्दंदशूको ददंश तम् । स तु ध्यानसुधामग्नो, न तद्बाधामजीगणत् ॥ ५३ ॥
दिव्यरूपं ततः कृत्वा, द्युतिद्योतितदिङ्मुखम् । सुरः पौपधशालायां, विवेशैवमुवाच च ॥ ५४ ॥
धन्योऽसि कामदेव ! त्वं, देवराजेन संसदि । प्रशंसाऽकारि भवतो—ऽसहिष्णुस्तामिहागमम् ॥ ५५ ॥
प्रभवः प्राभवेणापि, वर्णयन्ति ध्रुवस्त्वपि । अतः परीक्षितोऽसि त्वं, नानारूपभृता मया ॥ ५६ ॥
त्वां यथाऽवर्णयच्छक्र—स्तथैवासि न संशयः । क्षम्यतामपराधो मे, परीक्षणभवस्त्वया ॥ ५७ ॥
प्रययावभिधायैवं, स देवो देवसद्मनि । कामदेवोऽपि शुद्धात्मा, प्रतिमां तामपारयत् ॥ ५८ ॥
उपसर्गसहिष्णुं तम–श्लाघिष्ट स्वयं प्रभुः । सभायां भगवान् वीरो, गुरवो गुणवत्सलाः ॥ ५९ ॥
कामदेवो द्वितीयस्मिन्नह्नि पारितपौषधः । त्रिजगत्स्वामिनः पाद–वन्दनार्थमथागमत् ॥ ६० ॥
जगद्गुरुरभाषिष्ट, गौतमप्रभृतीनिति । गृहिधर्मेऽप्यसावेव–मुपसर्गान् विसोढवान् ॥ ६१ ॥
सर्वसङ्गपरित्यागाद्, यतिधर्मपरायणैः । तद्विशेषेण सोढव्या, उपसर्गा भवादृशैः ॥ ६२ ॥

एकादशापि शिश्राय, कामदेवः क्रमेण ताः ॥ ६३ ॥
कर्मनिर्मूलनोपायान्, श्रावकप्रतिमास्ततः । कालधर्ममुपाययौ ॥ ६४ ॥
सोऽथ संलेखनां कृत्वा, प्रपेदेऽनशनव्रतम् । परं समाधिमापन्नः, च्युत्वा ततो विदेहेषूत्पद्य सिद्धिं व्रजिष्यति ॥ ६५ ।
सोऽरुणाभे विमानेऽभूद्, चतुष्पल्यस्थितिः सुरः ।
यथोपसर्गेऽपि निसर्गधैर्यात्, स कामदेवो व्रततत्परः सन् ।
श्लाघ्योऽभवत् तीर्थकृतां तथाऽन्ये-ऽप्येवंविधा धन्यतमाः पुमांसः ॥ ६६ ॥

इति श्रीमुद्रित-योगशास्त्रवृत्तितः उद्धृता

कामदेवश्रावककथा संपूर्णा.

३३ जिनवचनभावनायां दृढप्रहारीकथा.

कस्मिंश्चिन्नगरे कश्चिदा-सीद्द्विजातिरुद्भटः । प्रजासु कर्त्तुमन्यायान्, प्रावर्त्तत स पापधीः ॥ १ ॥
आरक्षपुरुषैरेष, ततो निर्वासितः पुरात् । व्याधहस्तमिव श्येन-श्चौरपल्लीं जगाम च ॥ २ ॥
नृशंसचरितैस्तै-रात्मनस्तुल्य इत्यसौ । चौरसेनाधिपतिना, पुत्रत्वेनान्वमन्यत ॥ ३ ॥
चौरसेनापतौ तस्मिन्न-वसानमुपेयुषि । तत्पुत्र इति तत्स्थाने, स बभूव महाभुजः ॥ ४ ॥
निष्कृपं प्रहरत्येष, सर्वेषां प्राणिनां यतः । ततो दृढप्रहारीति, नाम्ना निजगदे जनैः॥ ५ ॥

अन्येद्युर्विश्वकुट्टाक-लुण्टाकभटपेटकैः । स कुशस्थलनामानं, ग्रामं लुण्टयितुं ययौ ॥ ६ ॥
ब्राह्मणो देवशर्मेति, तत्र दारिद्र्यविद्रुतः । अवकेशीफलमिव, क्षीरान्नं याचितोऽर्भकैः ॥ ७ ॥
पर्यट्य सकले ग्रामे, क्वापि क्वापि स तन्दुलान् । क्वापि क्वापि पयोऽभ्यर्थ्य, परमान्नमपीपचत् ॥ ८ ॥
नद्यां स्नातुं ययावेष, यावत्तावत् तदोकसि । ते क्रूरतस्कराः पेतु-र्दैवं दुर्बलघातकम् ॥ ९ ॥
तेषामेकतमो दस्यु-रपश्यत्तस्य पायसम् । क्षुधातुरः प्रेत इव, तदादाय पलायितः ॥ १०
आच्छिद्यमाने तस्मिंस्तु, पायसे जीवितव्यवत् । क्रन्दन्ति डिम्भरूपाणि, गत्वा पितरमूचिरे ॥ ११ ॥
व्यात्ताननानामस्माकं, दस्युवृन्देन पायसम् । जह्रे प्रसारितदृशा-मनिलेनेव कज्जलम् ॥ १२ ॥
तदाकर्ण्य वचो विप्रः, क्षिप्रं दीप्रः क्रुदग्निना । यमदूत इवादाय, परिघं पर्यधावत ॥ १३ ॥
सरोषराक्षसावेशा-त्समुत्पादितदोर्बलः । हन्तुं प्रववृते दस्यून्, परिघेण पशूनिव ॥ १४ ॥
तेनावकरवत्साक्षा-त्क्षिप्यमाणानवेक्ष्य तान् । वित्रस्यतस्तिरस्कुर्व्वन्, दधावे तस्करेश्वरः ॥ १५ ॥
तस्यापि धावतो दैवा-द्गतिविघ्नविधायिनी । निरोद्धुं दुर्गतिमिव, मार्गे गौरन्तरेऽभवत् ॥ १६ ॥
करालकरवालैक-प्रहारेण वराकिकाम् । जघान नृजघन्यस्तां, चण्डाल इव निर्घृणः ॥ १७ ॥
तस्याभ्यापततो रोरद्विजातेः स शिरो भुवि । पनसद्रोः फलमिवा-पातयत्खड्गयष्टिना ॥ १८ ॥
आः पाप निष्कृप कृतं, किमेतदिति वादिनी । वाला मासवती तं चा-भ्यगात् द्विजकुटुम्बिनी ॥ १९॥
तस्या वृक इव च्छाग्या, गुर्विण्याः सोऽतिदारुणः । कुष्माण्डदारमुदरं, दारयित्वा द्विधाकरोत् ॥ २० ॥

ततो जरायुमध्यस्थं, तस्या गर्भं द्विधाकृतम् । स स्फुरन्तं निरैक्षिष्ट, लताया इव पल्लवम् ॥ २१ ॥
तथा सम्पश्यमानस्य, तस्य विह्वलचेतसः । कृपा गतकृपस्यापि, जज्ञे वल्कमिवाश्मनः ॥ २२ ॥
ततो हा तात तातेति, हा मातर्मातरित्यपि । विलपन्तः समाजग्मु–स्तत्कालं द्विजबालकाः ॥ २३ ॥
नग्नान् भुग्नानतिक्षामान्, श्यामानतिमलेन च । दृष्ट्वा दृढप्रहारी तान् , सानुतापमचिन्तयत् ॥ २४ ॥
हहा भ्रता निर्घृणेन, दरिद्रौ दम्पती मया । अमी बाला हतास्तोय–शोषे जीवन्ति किं झषाः ॥ २५ ॥
क्रूरेण कर्म्मणानेन, नेष्यमाणस्य दुर्गतिम् । अघभीतस्य मे कः स्यादुपायः शरणं च कः ॥ २६ ॥
इति सञ्चिन्तयन्नेव वैराग्यावेगभागसौ । एनोगदागदङ्कारान्साधूनुद्यान ऐक्षत ॥ २७ ॥
नत्वोवाचेत्यहं पाप्मा, भाष्यमाणोऽपि पाप्मने । पङ्किलः स्पृश्यमानोऽपि, पङ्किलीकुरुते परम् ॥ २८ ॥
येषामेकतरमपि, नरकायैव तान्यहम् । ब्रह्मस्त्रीभ्रुणगोघात–पातकान्यकृपो व्यधात् (म्) ॥ २९ ॥
मामीदृशमपि त्रातुं, साधवो यूयमर्हथ । मेघानां वर्षतां स्थान–मस्थानं वा न किञ्चन ॥ ३० ॥
अथ ते साधवस्तस्मै, यतिधर्ममुपादिशन् । सोऽथ च्छत्रमिवोष्णालुः, पापभीरुस्तमाददे ॥ ३१ ॥
न भोक्ष्ये तत्र यत्राह्नि स्मरिष्याम्यस्य पाप्मनः । करिष्ये सर्वथा क्षान्तिं, सोऽग्रहीदित्यभिग्रहौ ॥ ३२ ॥
पूर्वावस्कन्दिते तस्मि–न्नेव ग्रामे कुशस्थले । कर्मक्षयं चिकीर्षुः स, विजहार महामनाः ॥ ३३ ॥
स एवायं कृतच्छद्मा, पापः पापीयसामहो । इत्यतर्ज्यत लोकेन, स महात्मा दिवानिशम् ॥ ३४ ॥
गोभ्रूणद्विजघात्येष, इति लोकेन जल्पता । विशन् गृहेषु भिक्षार्थं, श्वेव लोष्टैरकुट्यत ॥ ३५ ॥

स्मार्यमाणः स तत्पापं, प्रतिवासरमप्यसौ । शान्तस्तान्तो न भुङ्क्ते स्म, किंवा सत्त्वस्य दुष्करम् ॥ ३६ ।
क्वचित्प्रातः क्वचिन्मध्यंदिने सायमपि क्वचित् । स्मार्यमाणः स तत्पापं, कुत्राप्यह्नि न भुक्तवान् ॥ ३७ ॥
लोष्टुभिर्यष्टिभिः पांशु–वृष्टिभिर्मुष्टिभिर्जनाः । यमघ्नुः सोऽधिसेहे तत्सम्यक् चैवमभावयत् ॥ ३८ ॥
आत्मन् यादृक्कृतं कर्म्म, तादृशं फलमाप्नुहि । यादृक्षमुप्यते बीजं, फलं तादृक्षमाप्यते ॥ ३९ ॥
यदमी निरनुक्रोश–माक्रोशान्मयि तन्वते । अयत्नेनैव सिद्धा, तन्ममेयं कर्म्मनिर्ज्जरा ॥ ४० ॥
मय्याक्रोशाः प्रमोदाय, यथैषां मे तथैव हि । यत्प्रीत्या सहमानस्य, कर्म्मक्षयविधायिनः ॥ ४१ ॥
यन्मां भर्त्सयतामेषां, सुखमुत्पद्यतेऽद्य तत् । उत्पद्यतां भवे हन्त, दुर्लभः सुखसङ्गमः ॥ ४२ ॥
अमी मदीयं दुष्कर्म्म–ग्रन्थिं परुषभाषितैः । क्षारैरिव चिकित्सन्तो, नितान्तं सुहृदो मम ॥ ४३ ॥
कुर्व्वन्तु ताडनं हन्त, ममैते यदिदं किल । स्वर्णस्येवाग्निसन्तापो, मलिनत्वमपोहति ॥ ४४ ॥
कर्षन् दुर्गतिशुभ्रेभ्यो, स्वं प्रक्षिपति तत्र यः । कथं कुप्याम्यहं तस्मै, प्रहारानपि कुर्वते ॥ ४५ ॥
मत्पापानि व्यपोहन्ति, निजपुण्यव्ययेन ये । कथङ्कारमिवैतेभ्योऽपरः परमबान्धवः ॥ ४६ ॥
वधबन्धादि हर्षाय, यन्मे संसारमोचनम् । तदेवानन्तसंसारहेतु–रेषां दुनोति माम् ॥ ४७ ॥
केचित्परेषां तोषाय, त्यजन्त्यर्थान्वपूंष्यपि । एषां प्रीतिदमाक्रोश–हननादि कियन् मम ॥ ४८ ॥
तर्जितोऽहं हतो नाऽस्मि, हतो वा नाऽस्मि मारितः । मारितो वा न मे धर्मोऽपहृतो बान्धवैरिव ॥ ४९ ॥
आक्रोशवागधिक्षेपो, बन्धनं हननं मृतिः । सह्यं श्रेयोऽर्थिना सर्वं, श्रेयो हि बहुविघ्नकम् ॥ ५० ॥

एवं भावयता तेन, गर्हता स्वं च दुष्कृतम् । निर्दग्धः सर्वतः कर्म्म--राशिः कक्ष इवाग्निना ॥ ५१ ॥
अम्लानं केवलज्ञान--मथ लेभे सुदुर्लभम् । अयोगिकेवलिगुण--स्थानस्थो मोक्षमाप च ॥ ५२ ॥
योगप्रभावेण दृढप्रहारी, यथैष मुक्त्वा नरकातिथित्वम् । पदं प्रपेदे परमं तथान्योऽप्यसंशयानः प्रयतेत योगे ॥५३॥

इतिश्री मुद्रित--योगशास्त्रवृत्तित उद्धृता

दृढप्रहारीकथा सम्पूर्णा.

३४ सत्यव्रतत्राणोपरि कालिकाचार्यकथा.

अस्ति भूरमणीमौलिमणिस्तुरमणी पुरी । यथार्थनामा तत्रासीज्जितशत्रुर्महीपतिः ॥ १ ॥
रुद्रेति नामधेयेन, ब्राह्मणी तत्र विश्रुता । दत्त इत्यभिधानेन, तस्याः पुत्रो बभूव च ॥ २ ॥
दत्तो नितान्तदुर्दान्तो, द्यूतमद्यप्रियः सदा । सेवितुं तं महीपालं, प्रवृत्तो वर्त्तनेच्छया ॥ ३ ॥
राज्ञा प्रधानीचक्रेऽसौ, छायावत्पारिपार्श्वकः । आरोहायोपसर्पन्त्या, विषवल्लेरपि द्रुमः ॥ ४ ॥
विभेद्य प्रकृतीरेष, राजानं निरवासयत् । पापात्मानः कपोताश्च, स्वाश्रयोच्छेददायिनः ॥ ५ ॥
तस्य राज्ञो दुरात्माऽसौ, राज्ये स्वयमुपाविशत् । क्षुद्रः पादान्तदानेऽपि, क्रामत्युच्छीर्षकावधि ॥ ६ ॥
पशुहिंसोत्कटान् यज्ञान--ज्ञो धर्मधिया व्यधात् । धूमैर्मलिनयन् विश्वं, स मूर्त्तैरिव पातकैः ॥ ७ ॥

विहरन् कालिकार्याख्य-श्चाचार्यस्तस्य मातुलः । तत्राजगाम भगवान-ञ्जवानिव संयमः ॥ ८ ॥
तत्समीपमनापित्सु-र्दत्तो मिथ्यात्वमोहितः । अत्यर्थं प्रार्थितो मात्रा, मातुलाभ्यर्णमाययौ ॥ ९ ॥
मत्तोन्मत्तप्रमत्ताभो दत्तोऽपृच्छत्तमुद्भटम् । आचार्य यदि जानासि, यज्ञानां ब्रूहि किं फलम् ॥ १० ॥
उवाच कालिकाचार्यो, धर्मं पृच्छसि तच्छृणु । तत्परस्य न कर्त्तव्यं, यद्यद्भिप्रियमात्मनः ॥ ११ ॥
ननु यज्ञफलं पृच्छामी-ति दत्तोदिते पुनः । सूरिरूचे न हिंसादि, श्रेयसे किन्तु पाप्मने ॥ १२ ॥
पुनस्तदेव साक्षेपं, पृष्टो दत्तेन दुर्धिया । ससौष्ठवमुवाचार्यो, यज्ञानां नरकः फलम् ॥ १३ ॥
दत्तः क्रुद्धोऽभ्यधादेव-मिह कः प्रत्ययो वद । आर्योऽप्युचे श्वकुम्भ्यां, त्वं पक्ष्यसे सप्तमेऽहनि ॥ १४ ॥
दत्तः कोपादुदस्तभ्रू—ररुणीकृतलोचनः । भूताविष्ट इवोवाच, प्रत्ययोऽत्रापि को ननु ? ॥ १५ ॥
अथोचे कालिकार्योऽपि, श्वकुम्भीपचनात्पुरः । तस्मिन्नेवाह्न्यकस्मात्ते, मुखे विष्ठा प्रवेक्ष्यति ॥ १६ ॥
रोषाद् दत्तो जगादेदं, तव मृत्युः कुतः कदा । न कुतोऽपि स्वकाले द्यां, यास्यामीत्यवदन्मुनिः ॥ १७ ॥
अमुं निरुन्द्ध दुर्बुद्धि—मिति दत्तेन रोषतः । आदिष्टैः कालिकाचार्यो, रुरुधे दण्डपूरुषैः॥ १८ ॥
अथ दत्तात् समुद्विग्नाः, सामन्ताः पापकर्मणः । आह्वन्नाद्यं नृपं तस्मै, दत्तमर्पयितुं किल ॥ १९ ॥
दत्तोऽपि शङ्कितस्तस्थौ, निलीनो निजवेश्मनि । कण्ठीरवत्रस्तो, निकुञ्ज इव कुञ्जरः ॥ २० ॥
स विस्मृतदिनो दैवा—दागते सप्तमे दिने । बहिर्निर्गन्तुमारक्षै—राजमार्गानरक्षयत् ॥ २१ ॥
तत्रैको मालिकः प्रात—र्विशन् पुष्पकरण्डवान् । चक्रे वेगातुरो विष्ठां, मीतः पुष्पैः प्यधत्त च ॥ २२ ॥

इहाहनि हनिष्यामि, पशुवन्मुनिपांसनम् । चिन्तयन्निति दत्तोऽपि, निर्ययौ सादिभिर्वृतः ॥ २३ ॥
एकेन वल्गताऽश्वेन, विष्ठोत्क्षिप्ता खुरेण सा । दत्तस्य प्राविशच्चास्ये, नासत्या यमिनां गिरः ॥ २४ ॥
शिलास्फालितवत्सद्यः, श्लथाङ्गो विमनास्ततः । स सामन्ताननापृच्छ्य, ववले स्वगृहं प्रति ॥ २५ ॥
नाऽस्मन्मन्त्रोऽमुना ज्ञात, इति प्रकृतिपूरुषैः । गृहमप्रविशन्नेव, बद्ध्वा दध्रे स गौरिव ॥ २६ ॥
अथ प्रकाशयंस्तेजो, निजं राजा चिरन्तनः । प्रादुरासीत्तदानीं स, निशात्यय इवार्यमा ॥ २७ ॥
सोऽहिः करण्डनिर्यात, इव दूरं ज्वलन् क्रुधा । दत्तं श्वकुम्भ्यां नरककुम्भ्यामिव तदाऽक्षिपत् ॥ २८ ॥
अधस्तात्ताप्यमानायां, कुम्भ्यां श्वानोऽन्तरा स्थिताः । दत्तं विदद्रुः परमाधार्मिका इव नारकम् ॥ २९ ॥
निरस्तभूपालभयोपरोधः श्रीकालिकाचार्य इवैवमुच्चैः । सत्यव्रतत्राणकृतमतिज्ञो न जातु भाषेत मृषा मनीषी ॥ ३० ॥

इति श्रीमुद्रित—योगशास्त्रवृत्तित उद्धृता

कालिकाचार्यकथा सम्पूर्णा.

३५ सुविनेयानां मोक्षदायित्वे चण्डरुद्राचार्यकथा.

उज्जयिन्यां पुरि स्नात्रो—द्याने नंदनसन्निभे । चंडरुद्राभिधः सूरिः, सगच्छः समवासरत् ॥ १ ॥
ऊनाधिकक्रियादोषान्, स्वगच्छीयतपस्विनाम् । दर्शं दर्शं स चाकुप्यत्, प्रकृत्याप्यतिरोषणः ॥ २ ।

भूयसां वारणं ह्येषां, मयैकेनातिदुष्करम् । परं रोषातिरेकान्मे, स्वहितं न हि जायते ॥ ३ ॥
ध्यात्वेति सूरिरेकांते, तस्थौ सद्ध्यानहेतवे । तस्मिं विहाय शिष्याणां, स्वाध्यायध्यानतत्परः ॥ ४ ॥ युग्मम्
इतश्चोज्जयिनीवासी, व्यवहारिसुतो युवा ॥ आगात्कुंकुमलिप्तांगो, नवोढस्तत्र मित्रयुक् ॥ ५ ॥
साधून् दृष्ट्वा परीहास—पूर्वकं तान् प्रणम्य च । सोऽवादीद्भगवंतो मे, धर्मं ब्रूत सुखाकरम् ॥ ६ ॥
वैहासिकोऽयमिति ते, ज्ञात्वा नो किंचिदूचिरे । ततो भूयः स निर्ग्रंथान्, सोपहासमभाषत ॥ ७ ॥
दौर्भाग्याद्भार्यया त्यक्तो, विरक्तोऽहं गृहाश्रमात् । तत् प्रसद्य भवांभोधि—तारकं दत्त मे व्रतम् ॥ ८ ॥
धूर्त्तः प्रतारयत्यस्मा—न्नर्मवाक्यैर्मुहुर्मुहुः । तद्धृष्यतामसौ सम्यक्, चिंतयित्वेति ते जगुः ॥ ९ ॥
गुरोरधीना न वयं, स्वयं दीक्षादि दद्महे । तदाश्रय व्रताय त्व—मस्मद्गुरुमितः स्थितम् ॥ १० ॥
श्रुत्वेति सवयस्योऽथ, सोऽव्रजत्सूरिसन्निधौ । अब्रवीत्तं च वंदित्वा, सोपहासं कृताञ्जलिः ॥ ११ ॥
गृहव्यापारतो भग्नो, लग्नोऽस्मि त्वत्पदाब्जयोः । तत्प्रव्राजय मां स्वामिं—स्तिष्ठामि ससुखं यथा ॥ १२ ॥
सहास्यामिति तद्वाचं, श्रुत्वा कोपातिरेकतः । सूरिर्जगौ व्रतेच्छुश्चे—त्तदा भस्मानय द्रुतम् ॥ १३ ॥
ततस्तत्सुहृदैकेना—नीते भस्मनि साधुराट् । तं गृहीत्वा स्वबाहुभ्यां, लोचं कृत्वा ददौ व्रतम् ॥ १४ ॥
तद्विलोक्य विषण्णास्त—द्वयस्यास्तमथाभ्यधुः । मित्र ! सद्यः पलायस्व, धाम यामो वयं यथा ॥ १५ ॥
आसन्नसिद्धिकः सोऽथ, लघुकर्मेत्यचिंतयत् । कथं गच्छाम्यहं गेहं, स्ववाचा स्वीकृतव्रतः ॥ १६ ॥
प्रमादसंगतेनापि, या वाक् प्रोक्ता मनस्विना । सा कथं दृषदुत्कीर्णा—क्षरालीवाऽन्यथा भवेत् ॥ १७ ॥

नर्मणापि मया लब्धं, रक्षणीयं ततो व्रतम् । जहाति द्युमणिं को हि, विनायासमुपस्थितम् ॥ १८ ॥
ध्यात्वेति भावसाधुत्वं, स सुधीः प्रत्यपद्यत । यथास्थानं ततो जग्मु–स्तद्वयस्या विषादिनः ॥ १९ ॥
विनेयोऽथावदत्सूरिं, भगवन् ! बंधवो मम । श्रामण्यं मोचयिष्यंति, तद्यामोऽन्यत्र कुत्रचित् ॥ २० ॥
गच्छो महानसौ गच्छन्, प्रच्छन्नमपि यज्जनैः । ज्ञायते तद् द्वयोरेवा—ऽऽवयोर्गमनमर्हति ॥ २१ ॥
सूरिः प्रोवाच यद्येवं, तदाऽध्वानं विलोकय । यथा रजन्यां गच्छामः, सोऽप्यालोक्य तमाययौ ॥ २२ ॥
प्रतस्थेऽथ निशीथिन्यां, सूरिर्नूतनशिष्ययुक् । पुरो याहीति गुरुणा, चोक्तः शिष्यो ययौ पुरः ॥ २३ ॥
अपश्यन्निशि वृद्धत्वात्, स्थाणुना स्खलितो गुरुः । वेदनाविह्वलो जज्ञे, ज्वलद्रोपभराकुलः ॥ २४ ॥
हा दुष्टशिष्य ! सन्मार्गो, न व्यलोकीति विब्रुवन् ! दण्डेन शिष्यं शिरसि, कृतलोचे जघान सः ॥ २५ ॥
तत्प्रहारस्फुटन्मौलि–र्निर्गच्छद्रुधिरोऽपि सः । न व्यब्रवीन्नाप्यकुप्यत्, प्रत्युतैवमचिंतयत् ॥ २६ ॥
स्वगच्छमध्ये ससुखं, तिष्ठंतोऽमी महाशयाः । अधन्येन मया दुःख–भाजनं विहिता हहा ! ॥ २७ ॥
आजन्मसौख्यदाः शिष्या, गुरोः स्युः केऽपि धीधनाः । आद्य एव दिनेऽहं तु, जातोऽसातकरो गुरोः ॥ २८ ॥
स्थाण्वादिना गुरोः पीडा, माभूद्भूयोऽपि भूयसी । ध्यायन्निति प्रयत्नेन, स चचाल शनैः शनैः ॥ २९ ॥
तस्यैवं व्रजतः शुद्धा–शयस्य समतानिधेः । महात्मनः समुत्पेदे, निशायामेव केवलम् ॥ ३० ॥
अथ प्रभाते संजाते–ऽभ्युदिते च दिवाकरे । सूरिणा ददृशे शिष्यो, रुधिरालिप्तमस्तकः ॥ ३१ ॥
ततः शांतरसाचांत–स्वांतः सूरिरचिंतयत् । अहो ! नवीनशिष्यस्या–ऽप्यमुष्य क्षांतिरुत्तमा ॥३२॥

क्रोधाध्मातेन मयका, दंडेनैवं हतोऽपि यत् । नातनोद्वाङ्मनोदेहै-र्वैगुण्यं किंचिदप्यसौ ॥ ३३ ॥
चिरप्रव्रजितस्यापि, रोषदोषांश्च जानतः । प्राप्ताचार्यपदस्यापि, धिग्मे प्रबलकोपताम् ! ॥ ३४ ॥
इयच्चिरं सुदुष्पालं, पालितं मयकाव्रतम् । परं तन्निष्फलं जज्ञे, कोपात्तन्मेऽमुना कृतम् ॥ ३५ ॥

भावनाभिरिति भावितचित्तः, सोऽपि केवलमवाप मुनींद्रः ।
एवमुत्कटरुषोऽपि गुरोः स्यु-र्मोक्षदाः सविनयाः सुविनेयाः ॥ ३६ ॥

इति श्रीमुद्रित-उत्तराध्ययनसूत्रवृत्तित उद्धृता

चण्डरुद्राचार्यकथा संपूर्णा.

३६ क्षुधापरीषहे हस्तिमित्रकथा

अस्त्यत्र भरते स्वर्ग-जयिन्युज्जयिनी पुरी । हस्तिमित्राभिधः श्रेष्ठी, तत्राभूद्भूरिभूतिमान् ॥ १ ॥
सौभाग्यसेवधिर्दक्षाव—धिस्तस्य च वल्लभा । अकाण्ड एवाम्रियत, स्वप्राणेभ्योऽपि वल्लभा ॥ २ ॥
संसारासारतां ध्यायं-स्ततो वैराग्यवानसौ । प्राव्राजीत् हस्तिभूत्याह्व-पुत्रयुक् साधुसन्निधौ ॥ ३ ॥
अन्यदा तावुज्जयिन्याः, प्रस्थितौ सह साधुभिः । प्रति भोजकटं यान्ता-वरण्यानीमवापतुः ॥ ४ ॥
हस्तिमित्रमुनेस्तत्र, मर्माभित्कण्टको महान् । भग्नः पादतले तेन, पुरो गन्तुं स नाशकत् ॥ ५ ॥
ततः स तद्व्यथापूरैः, प्रापितः प्राणसंशयम् । स्वसन्निधिस्थितान् साधू-नभ्यधादिति धीनिधिः ॥६ ॥

यूयं व्रजत कान्तार-पारञ्च प्राप्नुत द्रुतम् । अहं त्विहैवानशनं, करिष्ये गन्तुमक्षमः ॥ ७ ॥
तच्छ्रुत्वा मुनयः प्रोचु-र्हस्तिमित्र ! विषीद मा । त्वां सहोत्पाट्य नेष्यामो, मोक्ष्यामो न पुनर्वने ॥ ८ ॥
धर्मकृत्येषु सारं हि, वैयावृत्यं जगुर्जिनाः । तत्पुनर्ग्लानसम्बन्धि, विना पुण्यं न लभ्यते ॥ ९ ॥
वैयावृत्यं तदेतत्ते, करिष्यामो वयं मुदा । तदाकर्ण्य जगौ हस्ति--मित्रर्षिः सत्त्वसेवधिः ॥ १० ॥
सत्यमेतत्परमहं, प्राप्तकालोऽस्मि साम्प्रतम् । तन्मामुत्पाट्य मा यूयं, मुधा बाधामवाप्स्यथ ! ॥ ११ ॥
किञ्चात्र श्वापदाकीर्णे, प्रचुरोपद्रवे वने । सर्वेषां त्यक्तसार्थानां, न स्थातुमुचितं चिरम् ॥ १२ ॥
इत्युक्त्वाऽनशनं कृत्वा, क्षमयित्वा च संयतान् । स सद्यः प्रेषयामास, सह सार्थेन साग्रहम् ॥ १३ ॥
स्थातुकाममपि स्नेहा--त्सहादायाथ तत्सुतम् । प्रस्थिता मुनयो हस्ति---मित्रस्त्वस्थाद्गुहान्तरे ॥ १४ ॥
दूरं गत्वापि तत्पुत्रो, वञ्चयित्वा मुनीनगात् । पितुः समीपं स्नेहो हि, निर्मन्त्राकर्षणं मतम् ॥ १५ ॥
ततस्तातोऽवदत्पुत्र !, न शोभनमदः कृतम् । मुनीन् विमुच्य मत्पार्श्व--मविमृश्य यदागमः ॥ १६ ॥
प्रासुकान्नोदकादीनां, दाता नास्तीह कोऽपि यत् । क्षुत्तृषाविवशस्तस्मा---त्त्वमप्यत्र विपत्स्यसे ! ॥ १७ ॥
ततः पुत्रोऽवदत्तात !, यद्भाव्यं तद्भवत्विह । परमस्यामवस्थायां, मुक्त्वा वो न व्रजाम्यहम् ! ॥ १८ ॥
हस्तिमित्रोऽथ तत्रैव, दिवसे वेदनाकुलः । स्मृतपञ्चनमस्कारो, विपद्याजनि निर्जरः ॥ १९ ॥
विपन्नमपि जीवन्तं, सुतो मोहाद्विवेद तम् । प्रयुक्तावधिरज्ञासी---त्सुरोऽपि प्राग्भवं निजम् ॥ २० ॥
अद्राक्षीच्च वपुः स्वीयं, तत्रस्थं तनयञ्च तम् । ततस्तत्कृपया स्वाङ्गे, प्रविश्येति सुरोऽब्रवीत् ॥ २१ ॥

भिक्षायै वत्स ! गच्छ त्वं, सोऽवादीत् क्व व्रजाम्यहम् । उवाच निर्जरो याहि, भूरुहेषु वटादिषु ॥ २२ ॥
तद्वासिनो जनास्तुभ्यं, प्रदास्यन्त्यशनादिकम् । तत्प्रपद्य ययौ सोऽपि, मुग्धात्मा भूरुहामधः ॥ २३ ॥
धर्मलाभ इति प्रोच्चैः, प्रोच्य तत्राथ तस्थुषे । तस्मै भिक्षामदाद्वृक्षा—न्निर्गत्यालङ्कृतः करः ॥ २४ ॥
इत्थं भिक्षां ददौ तस्मै, हस्तिमित्रामरोऽन्वहम् । कृताहारश्च तं स्नेहा—द्वार्त्तयामास सर्वदा ॥ २५ ॥
देशे भोजकटस्याथ, जज्ञे दुर्भिक्षमुल्बणम् । ततस्तत्राभवद्भिक्षा, भिक्षूणामतिदुर्लभा ॥ २६ ॥
व्रतिनस्ते ततो वर्षे, द्वितीये प्रति मालवम् । वलिताः पूर्वदृष्टेन, चेलुस्तेनैव वर्त्मना ॥ २७ ॥
अटव्यां चाययुस्तस्यां, क्षुल्लकं ददृशुश्च तम् । क्व तिष्ठसि ? कथं भुङ्क्षे ?, पप्रच्छुरिति तञ्च ते ॥ २८ ॥
आवादीत्सोऽथ तिष्ठामि, सर्वदा पितुरन्तिके । वृक्षनिर्गतहस्ताच्च, लभेऽहमशनादिकम् ॥ २९ ॥
अद्य यावद्विनाऽऽहारं, वृद्धः किं जीवतीति ते । तं वीक्षितुं गताः शुष्क—मद्राक्षुस्तत्कलेवरम् ॥ ३० ॥
ततस्ते व्यमृशन्नूनं, हस्तिमित्रोऽभवत्सुरः । कृपयाऽन्नादिदानेन, तेनैवायमरक्ष्यत ॥ ३१ ॥
अत्राहुः केऽपि बालेन, न सोढः क्षुत्परीषहः । वृद्धेन स पुनः सोढो, धैर्याधरीतभूभृता ॥ ३२ ॥
अन्ये त्वाहुः सुतेनापि, सोढ एव परीषहः । यन्नासौ प्रासुकालाभे–ऽप्यैच्छद्भोक्तुं फलादिकम् ॥ ३३ ॥
हस्तिभूतिरपि ज्ञात्वा—ऽऽहारलाभं सुधाशनात् । आलोचितः प्रतिक्रान्तो, विजहार सहर्षिभिः ॥ ३४ ॥

परीषहो दुर्विषहो यथाऽऽभ्यां, सेहे बुभुक्षाविषयो मुनिभ्याम् ।

ऐदंयुगीनैरपि पुण्यपीनैः, सह्यस्तथाऽसौ मनसाप्यदीनैः ॥ ३५ ॥

इति श्रीमुद्रित-उत्तराध्ययनवृत्तितः उद्धृता

हस्तिमित्रकथा संपूर्णा.

३७ तृट्परिषहे धर्मशर्ममुनिकथा

अभूदुज्जयिनीपुर्य्यां, धनमित्राभिधो वणिक् । धनशर्माश्रयस्तस्य, धनशर्मा सुतोऽभवत् ॥ १ ॥
गुरुवाणीं समाकर्ण्य, गुरुवैराग्यवान् धनः । पुत्रेण पुण्यसत्रेण, सत्रा तत्राऽऽददे व्रतम् ॥ २ ॥
स्वस्मिन् परे च सहितौ, सहितौ तौ व्रतिव्रजैः । प्रस्थितावेलगपुराऽध्वनि मध्यान्दिनेऽन्यदा ॥ ३ ॥
तदा च भीष्मग्रीष्मार्क—करसम्पाततापितः । पिपासापीडितो बालः, स चचाल शनैः शनैः ॥ ४ ॥
मुनयोऽन्येऽग्रतो जग्मु—र्धनमित्रमुनिः पुनः । पश्चाच्चचाल सूनोस्तत्—प्रेमपाशनियन्त्रितः ॥ ५ ॥
मार्गे तत्रायर्यौ रंग—त्तरङ्गाथ तरङ्गिणी । ततः पिताऽलपत्पुत्रं, तां निरीक्ष्य प्रमोदभाक् ॥ ६ ॥
जानामि चेष्टया वत्स !, त्वां पिपासापराजितम् । मदभ्यर्णे च नास्त्यम्भः, प्रासुकं तत्करोमि किम् ? ॥ ७ ॥
तदिदानीं नदीनीरं, पीत्वोदन्या निहन्यताम् । निषिद्धमपि कार्यं हि, कार्यमापदि धीधनैः ॥ ८ ॥
यदुक्तं—'निषिद्धमप्याचरणीयमापदि, क्रिया सती नाऽवति यत्र सर्वथा ।

घनाम्बुना राजपथेऽतिपिच्छिले, क्वचिद्बुधैरप्यपथेन गम्यते ॥ ९ ॥”

मृत्युदामापदमिमां, तदुल्लङ्घ्य कथञ्चन । पश्चादालोचयेः पापं, समीपे सद्गुरोरिदम् ॥ १० ॥
इत्युदीर्य समुत्तीर्य, स नदीमित्यचिन्तयत् । नूनं मद्दर्शने पुत्रो, ह्रिया पास्यति नोदकम् ॥ ११ ॥
ह्रीमान् कुर्वन्नकार्यं हि, स्वच्छायातोऽपि शङ्कते । तद्दर्शनपथादस्या—पसरामि शनैः शनैः ॥ १२ ॥
ध्यात्वेति स पुरोऽचालीत्, क्षुल्लोऽथ प्राप निम्नगाम् । तृषार्त्तोऽपि न तत्तोय—मपिवच्च दृढव्रतः ॥ १३ ॥
अन्ये त्वाहुरुदन्या ,नि—बाधितः स शिशुर्भृशम् । शुष्यत्तालुमुखोरस्क—श्चेतसीति व्यचिन्तयत् ॥ १४ ॥
पिबाम्यऽनादेयमपि, नादेयं वारि साम्प्रतम् । प्रायश्चित्तं ग्रहीष्यामि, पश्चात्सद्गुरुसन्निधौ ॥ १५ ॥
विमृश्येति समुत्पाट्य, पातुमञ्जलिना जलम् । निन्ये यावन्मुखस्याग्रे, सोऽध्यासीदिति तावता ॥ १६ ॥
पिबामीमान् कथं जीवा—नहं विज्ञातजैनगीः । उदबिन्दौ यदेकत्रा—ऽसङ्ख्यजन्तून् जिना जगुः ॥ १७ ॥
त्रसाः पूतरमत्स्याद्याः, स्थावराः पनकादयः । नीरे स्युरिति तद्घाती, सर्वेषां हिंसको भवेत् ॥ १८ ॥
तत्कियद्भिर्दिनैर्यान्ति, रक्षिता अपि ये ध्रुवम् । तान् प्राणान् रक्षितुं दक्षः, परप्राणान्निहन्ति कः ॥ १९ ॥
सजीवं जीवनमिदं, तन्न पास्यामि सर्वथा । निर्णीयेति शनैर्नद्यां, स मुमोचाञ्जलेर्जलम् ॥ २० ॥
बालोऽप्यबालधैर्यस्ता-मुत्तीर्य तटिनीं ततः । तत्तीर एव सोऽपत-त्तृष्णया गन्तुमक्षमः ॥ २१ ॥
धर्मस्थैर्यं दधच्चित्ते, पिपासाविवशोऽपि सः । स्मृतपञ्चनमस्कारो, विपद्य त्रिदिवं ययौ ॥ २२ ॥
प्रयुज्याथावधिज्ञानं, ज्ञात्वा पूर्वभवं निजम् । पुरो गत्वा स्थितं तातं, प्रेक्ष्य स्वाङ्गे प्रविश्य च ॥ २३ ॥

अन्वगाद्धनमित्रर्षि, ततश्चलयितुं सुरः । समायान्तं सुतं दृष्ट्वा, हृष्टः सोऽप्यचलत्पुरः ॥ २४ ॥ [युग्मम्]
अथोदन्या व्यथार्त्तानां, मुनीनामनुकम्पया । धनशर्माऽमरो भूरि- गोकुलान्यध्वनि व्यधात् ॥ २५ ॥
तेभ्योऽधिगत्य तक्रादि, साधवः स्वास्थ्यमासदन् । सुधाकुण्डेभ्य आसाद्य, पीयूषमिव निर्जराः ॥ २६ ॥
विहरन्तः सुखेनैवं, तत्कृते व्रजिकाव्रजे । उल्लङ्घ्यारण्यमापुस्ते, क्रमादन्तिमगोकुलम् ॥ २७ ॥
ततोऽग्रे गच्छतां तेषां, मध्यात्कस्यापि विण्टिकाम् । स्वं जिज्ञापयिषुः सोऽथ, तत्र व्यस्मरयत्सुरः ॥ २८ ॥
दूरं गत्वा विण्टिकां च, स्मृत्वा स वलितो व्रती । उपधेर्विण्टिकां तत्रा-ऽपश्यत्स्वां न तु गोकुलम् ॥ २९ ॥
तामादाय प्रचलितो, मिलितोऽन्यतपोधनैः । अवद्द्विण्टिकालाभं, गोकुलादर्शनं च सः ॥ ३० ॥
जाताश्चर्यास्तदाकर्ण्य, मुनयो व्यमृशन्निति । नूनं दिव्यानुभावेन, गोकुलान्यभवन् वने ॥ ३१ ॥
अत्राऽन्तरे प्रादुरासीत्, स सुरः कान्तिभासुरः । विहाय पितरं सर्वान्, मुनीनऽन्यान्ननाम च ॥ ३२ ॥
एनं कुतो न नमसी-त्युक्तः स व्रतिभिस्ततः । स्वीयं व्यतिकरं सर्वं, निवेद्येत्यवदत्सुरः ॥ ३३ ॥
सजीवाऽम्भोऽपि पातुं य-स्तदासौ मे मतिं ददौ । तत्पूर्वभववप्ताऽपि, साधुरेष न वन्द्यते ॥ ३४ ॥
स्नेहादपि रिपोरेव, कार्यं विहितवानसौ । यद्दुर्गतिनिमित्तं मे, तदा तदुपदिष्टवान् ॥ ३५ ॥
अपास्यं चेत्सचित्ताम्बु, तदैतद्वचनादहम् । व्रतभङ्गभवात्पापा-दभ्रमिष्यं तदा भवे ॥३६ ॥
स एव हि पूज्यो, गुरुश्च जनकोऽपि च । शिष्यं सुतं च यः क्वापि, नैवोन्मार्गे प्रवर्त्तयेत् ॥ ३७ ॥
धनशर्मसुपर्वैव—मुदीर्यागात्त्रिविष्टपम् । साधवोऽपि ततः स्थाना-द्विजह्रुस्ते यथासुखम् ॥ ३८ ॥

क्षुल्लो यथाऽयं धनशर्मनामा, सेहे पिपासां सुदृढप्रतिज्ञः । एवं समग्रैरपि संयतैः सा, सह्या महानन्दपदानुरक्तैः ॥३९॥

इति श्रीमुद्रित-उत्तराध्ययनवृत्तितः उद्धृता

धर्मशर्ममुनिकथा सम्पूर्णा.

३८ शीतपरिषहे साधुचतुष्ककथा.

पूरे राजगृहेऽभूवं—श्चत्वारश्चतुरोत्तमाः । सखायोऽन्योन्यमुत्कृष्ट—प्रेमभाजो वणिग्वराः ॥ १ ॥
भद्रबाहुस्वामिपार्श्वे, श्रुत्वा धर्मं जिनोदितम् । ते चत्वारोऽपि सञ्जात—संवेगाः प्राव्रजन् मुदा ॥ २ ॥
गुरुशुश्रूषणात्पार-दृश्वानस्ते श्रुतोदधेः । एकाकित्वविहाराख्यां, प्रतिमां प्रतिपेदिरे ॥ ३ ॥
कल्पश्चायमभूत्तेषां, यद्विहाराशनादिकम् । तृतीय एव प्रहरे, कार्यं कार्यं समाहितैः ॥ ४ ॥
तुर्ययामप्रवेशे तु, भवेद्यो यत्र संस्थितः । तेन तत्र प्रतिमया, स्थेयं प्रहरसप्तकम् ॥ ५ ॥
कल्पमेनं श्रयन्तस्ते, विहरन्तो धरातले । परेद्यवि पुरं राज—गृहं पुनरुपाययुः ॥ ६ ॥
तदा च तुहिनव्यूहैः, पीडयन् जगतिजनम् । पत्रपुष्पफलोपेतान् स्थाणून्, कुर्वन् महीरुहान् ॥ ७ ॥
तटाकान्यपि सर्वाणि, स्त्यानयन्नाज्यवन्निशि । निरास्पदान् पक्षिपशु—श्वापदान् दारुतां नयन् ॥ ८ ॥
शीतकम्प्रदरिद्राणां, दन्तवाद्यं प्रवादयन् । कृशानुसेविनं कुर्वन्, सर्वं श्रोत्रियवज्जनम् ॥ ९ ॥
रुष्टानपि मिथोऽत्यर्थं, दम्पतीन् परिरम्भयन् । हेमन्तर्त्तुः प्रववृते, विश्वं हेममयं सृजन् ॥१०॥ (चतुर्भिः कलापकम्)

हिमर्त्तौ तत्र वैभार-गिरेस्ते मुनयः पुरे । आहारार्थं समाजग्मुः, प्रहरेऽह्नस्तृतीयके ॥ ११ ॥
कृताहाराश्च ते सर्वे, गन्तुं वैभारभूधरम् । पृथग् पृथग् न्यवर्त्तन्त, पुरमध्यान्महर्षयः ॥ १२ ॥
वैभाराद्रिगुफाद्वारे, प्राप्तस्यैकस्य तेष्वथ । द्वितीयस्य पुरोद्याने, तृतीयस्य तदन्तिके ॥ १३ ॥
तुर्यस्य तु पुरोपान्ते, चतुर्थः प्रहरोऽभवत् । कायोत्सर्गं ततः कृत्वा, ते तत्रैवावतस्थिरे ॥ १४ ॥ (युग्मम्)
तेष्वद्रिकन्दराद्वार-संस्थितस्य तपस्विनः । उच्चैः स्थित्वादलग-च्छीतमत्यन्तदारुणम् ॥ १५ ॥
पतत्तुहिनसम्पर्क-शीतलैः शैलमारुतैः । कायश्चकम्पे तस्योच्चै-र्न किञ्चिदपि मानसम् ॥ १६ ॥
स शीतवेदनां सम्यक्, सहमानो महामुनिः । यामिन्याः प्रथमे यामे, परलोकमसाधयत् ॥ १७ ॥
उद्यानस्थस्य नीचैस्त्वा-च्छीतमल्पं किमप्यभूत् । ततो रजन्याः प्रहरे, द्वितीये स व्यपद्यत ॥ १८ ॥
उद्यानपार्श्ववृत्तेस्तु, वृक्षाद्याश्रयतोऽलगत् । शीतमल्पं ततो यामे, स विपन्नस्तृतीयके ॥ १९ ॥
आसीदल्पतरं शीतं, तुर्यस्य नगरोष्मणा । ततः स प्रहरे तुर्ये, परासुत्वमगान्मुनिः ॥ २० ॥

चत्वारोऽपि प्राज्यधैर्या मुनीन्द्राः, स्वर्गं प्रापुस्ते विषह्येति शीतम् ।
इत्थं सर्वैः साधुभिस्त्यक्तकामै-स्तत्सोढव्यं मुक्तिसंयुक्तिकामैः ॥ २१ ॥

इति श्रीमुद्रित-उत्तराध्ययनवृत्तित उद्धृता

साधुचतुष्ककथा सम्पूर्णा.

३९ उष्णपरीषहे अरहन्नकमुनिकथा.

अभूल्लक्ष्मीकुलागारं, नगरी तगराभिधा । दत्तप्रमोदस्तत्रासी--द्दत्तनामा वणिग्वरः ॥ १ ॥
स भद्राभार्यया साकं, भुञ्जानः सुखमुत्तमम् । अरहन्नकनामानं, पुत्ररत्नमजीजनत् ॥ २ ॥
धर्ममार्हतमाकर्ण्या--ऽर्हन्मित्राचार्यसन्निधौ । विरक्तो व्रतमादत्त, दत्तः पत्नीसुतान्वितः ॥ ३ ॥
दत्तोऽरहन्नकं स्नेहा--दिष्टैर्भोज्यैरपोषयत् । कदाचिदपि भिक्षार्थं, प्रेषयामास तं न तु ॥ ४ ॥
उत्तमर्णं इवानेन, किमयं पोष्यतेऽन्वहम् । समर्थोऽपि च किं भिक्षा--चर्यामेप न कार्यते ? ॥ ५ ॥
ध्यायन्तोऽपीति निर्ग्रन्था, वक्तुं किमपि नाशकन् ।:पुत्रं वा पालयन् वप्ता, निषेद्धुं केन शक्यते ? ॥ ६ ॥ युग्मम्
निदाघसमयेऽन्येद्यु--र्दत्तः साधुर्व्यपद्यत । तद्वियोगान्महादुःख--माससादाऽरहन्नकः ॥ ७ ॥
ततोऽन्ये संयतास्तात--विरहातुरचेतसे । तस्मै द्वित्रान् दिनान् याव--दानीयाहारमार्पयन् ॥ ८ ॥
अथ तं यतयोऽवोचन्, भिक्षार्थं पर्यट स्वयम् । नेदानीं पितृवत्कोऽपि, दास्यत्यानीय भोजनम् ॥ ९ ॥
दग्धोपरिष्ठात् पिटको--पमां वाचं निशम्य ताम् । चचाल विमनाः सोऽथ, भिक्षायै मुनिभिः समम् ॥ १० ॥
अतीवसुकुमाराङ्गः, पूर्वमप्यकृतश्रमः । तदा निदाघतापेन, पर्यभूयत सोऽधिकम् ॥ ११ ॥
ग्रीष्मार्ककिरणोत्तप्त--रेणुकानिकरेण सः । अदह्यत पदोर्द्वंद्वं, मौलौ च तपनांशुभिः ॥ १२ ॥
पश्चात्स्थितोऽन्यसाधुभ्य--स्तृपा शुष्यन्मुखाम्बुजः । महेभ्यसदनच्छायां, विश्रामाय स शिश्रिये ॥ १३ ॥

सौभाग्यमन्मथं तं च, तत्रस्थं तद्गृहेश्वरी । धनाढ्यवणिजो भार्या--ऽपश्यत्प्रोषितभर्तृका ॥ १४ ॥
अचिन्तयच्च सा रूप--महो ! अस्य मनोहरम् । यद्दृष्टमात्रमपि मे, समाकर्षति मानसम् ॥ १५ ॥
तदमुं रमयित्वा स्वं, करोमि सफलं वयः । ध्यात्वेति प्राहिणोद् दासीं, सा तदाह्वानहेतवे ॥ १६ ॥
दास्याहूतः सोऽपि तस्याः, मनसीव गृहेऽविशत् । सापि हर्षभरोदञ्च--त्कुचकुम्भा तमभ्यगात् ॥ १७ ॥
पप्रच्छ च स्मितोन्मिश्र--दन्तांशुद्योतिताधरा । समग्रसुभगोत्तंस !, किं याचसि भवानिति ॥ १८ ॥
अथारहन्नकः स्माह, भिक्षामभ्यर्थये शुभे । ततः सा व्यामृशत्स्मेर--स्मरापस्मारविह्वलो ॥ १९ ॥
वशीकरोम्यमुं स्निग्ध--मधुराहारदानतः ॥ स्वादुभोज्यं हि सर्वेषां, वशीकरणमुत्तमम् ॥ २० ॥
ध्यात्वेति सार्पयत्तस्मै, मोदकान् सुन्दरान् बहून् । सोऽपि पर्यटनग्लानः, प्राप्य तान् मुमुदे भृशम् ॥ २१ ॥
पश्यन्ती स्निग्धया दृष्ट्या, सा प्रपच्छेति तं पुनः । युवत्वेऽपि त्वया तीव्रं, किमर्थं व्रतमाददे ॥ २२ ॥
मुनिरूचे मया दीक्षा, जग्रहे सौख्यहेतवे । सुधामधुरया वाचा, ततः सा पुनरब्रवीत् ॥ २३ ॥
यद्येवं तन्मया सार्द्धं, भुङ्क्ष्व वैषयिकं सुखम् । पालिताया इयत्कालं, दीक्षायाः फलमाप्नुहि ॥२४ ॥
कुरूप--दुःस्थ--स्थविर--कर्कशाङ्ग--जनोचिताम् । इमां कष्टक्रियां मुञ्च, मुधा स्वं वञ्चयस्व मा ॥ २५ ॥
इदं गृहमियं लक्ष्मी--रयं परिजनोऽखिलः । सर्वमेतत्तवायत्तं, यदि त्वं स्वीकरोषि माम् ॥ २६ ॥
लावण्याढ्यमिदं रूपं, शरीरं चेदमावयोः । अन्योन्यसङ्गमादद्य, सफलत्वं प्रपद्यताम् ॥ २७ ॥
भवेद्यदि च दीक्षायां, भवतोऽत्यन्तमाग्रहः । भुक्तभोगस्तदा भूयो, वार्द्धके तां समाचरेः ॥ २८ ॥

श्रुत्वेति तद्वचस्तस्याः, विभ्रमांश्च विलोक्य सः। भग्नचित्तोऽभवत्को वा, कामिनीभिर्न भिद्यते ? ॥ २९ ॥
यदुक्तं—"दृष्टाश्चित्रेऽपि चेतांसि, हरन्ति हरिणीदृशः ? । किम्पुनस्ताः स्मितस्मेर-विभ्रमभ्रमितेक्षणाः ? ॥३०॥"
ततः स्वीकृत्य तद्वाच—मवतस्थे स तद्गृहे । तया सार्कं यथाकामं, रेमे चात्यन्तरक्तया ॥ ३१ ॥
अथ गोचरचर्यायां, वसतौ चाऽरहन्नकम् । अप्रेक्षमाणा मुनयो—ऽन्वेपयन्निखिले पुरे ॥ ३२ ॥
तत्प्रवृत्तिमपि क्वापि, नालभन्त तथाऽपि ते । ततस्तन्मातुरार्याया--स्तं तद्वृत्तान्तमूचिरे ॥ ३३ ॥
वार्त्तां निशम्य तां पुत्र—शोकेनातिगरीयसा । प्रणष्टचित्ता सा भूता--ऽऽविष्टेवोन्मत्ततामगात् ॥ ३४ ॥
ततोऽरहन्नकेत्युच्चै—र्विलपन्ती सगद्गदम् । सा पुरे सकलेऽभ्राम्य—द्वृत्ता चेटकपेटकैः ॥ ३५ ॥
पन्थानमभिपिञ्चन्ती, नयनश्रवदश्रुभिः । तमिस्रेणेव मोहेन, प्रस्खलन्ती पदे पदे ॥ ३६ ॥
दृष्टोऽरहन्नकः क्वापि, पुत्रो मे प्राणवल्लभः ? । यं यं पश्यति तं तं च, पृच्छन्तीति पुनः पुनः ॥ ३७ ॥
कृतानुकम्पा सुजनै—र्हस्यमाना च दुर्जनैः । दृष्टाऽरहन्नकेनोच्चै—र्गवाक्षस्येन साऽन्यदा ॥३८॥ [त्रिभिर्विशेषकम्]
प्रत्यभिज्ञाय तां प्रेक्ष्य, तदवस्थां च तादृशीम् । स समुत्पन्ननिर्वेदः, स्वहृदीति व्यचिन्तयत् ॥ ३९ ॥
अहो ! मे निर्विवेकत्व—महो ! दुष्कर्मकारिता । यदस्या वचनैस्त्यक्तं, मया मुक्तिप्रदं व्रतम् ॥ ४० ॥
दुस्सहे व्यसने माता, पातितेयमपीदृशे । स्वात्मा च व्रतभङ्गेन, भवाब्धौ पातितो हहा ! ॥ ४१ ॥
इदानीमपि तन्मातुः, शोकमुन्मूलयाम्यहम् । ध्यात्वेति स गृहात्तस्मा—न्निर्जगाम ससम्भ्रमः ॥ ४२ ॥
कुलाङ्गारोपमो मात—रसौ त्वामरहन्नकः । नमतीति ब्रुवन् बाष्प--प्लुताक्षस्तां ननाम च ॥ ४३ ॥

तं वीक्ष्य स्वस्थचित्ता सा, सप्रमोदेवमब्रवीत् । एतावन्ति दिनान्यस्थात्, कुत्र पुत्र ! भवानिति ? ॥ ४४ ॥
ततः प्रोवाच स प्राच्यं, सर्वं व्यतिकरं निजम् । तं श्रुत्वा साऽवदद्वत्स !, भूयः स्वीकुरु संयमम् ॥ ४५ ॥
तुच्छानां मर्त्यसौख्याना--मेतेषां हेतवे कृतिन् ! । अनन्तदुःखदा मा स्म--स्वीकार्षीर्नरकव्यथाः ॥ ४६ ॥
सोऽशंसन्नैव शक्तोऽस्मि, पापोऽहं व्रतपालने ! । ततो वदसि चेन्मातः !, करोम्यनशनं तदा ॥ ४७ ॥
तुष्टा भद्राऽभ्यधाद्भद्र !, तवैतदपि साम्प्रतम् । नत्वनन्तभवभ्रान्ति--निमित्तं व्रतभञ्जनम् ॥ ४८ ॥ यदाहुः--
"वरमग्गिम्मि पवेसो, वरं विसुद्धेण कम्मुणा मरणं । मा गहिअव्वयभंगो, मा जीअं खलिअसीलस्स ॥ ४९॥"
ततः स योगं सावद्यं, प्रत्याख्याय महाशयः । क्षमयित्वाऽखिलान् जन्तू--न्निन्दित्वा दुरितं निजम् ॥ ५० ॥
श्रित्वा चत्वारि शरणा--न्यादायाऽनशनं तथा । गत्वा बहिर्दिनेशांशु--तापितामश्रयच्छिलाम् ॥ ५१ ॥ युग्मम्
धर्मध्यानी पादपोपगमनं प्रतिपालयन् । तामुष्णवेदनां सम्यक्, सहमानोऽतिदारुणाम् ॥ ५२ ॥
स साधुः सुकुमाराङ्गः, स्मरन् पञ्च नमस्क्रियाः । व्यलीयत मुहूर्त्तेन, तत्र म्रक्षणपिण्डवत् ॥ ५३ ॥ युग्मम्
इत्थमुष्णमधिसह्य स पश्चा--दर्हन्नकमुनिस्त्रिदशोऽभूत् । एवमेतदपरैरपि सम्यग्, मर्षणीयमृषिभिर्निरसर्पैः ॥५४॥

इति श्रीमुद्रित--उत्तराध्ययनवृत्तितः उद्धृता।

अरहन्नकमुनिकथा संपूर्णा.

४० दंशमशकपरीषहे श्रमणभद्रमुनि कथा

अस्त्यकम्पा पुरी चम्पा–भिधाना भूवि भूषणम् । तस्यां सान्वर्थनामासी–ज्जितशत्रुर्महीपतिः ॥ १ ॥
तस्य श्रमणभद्राह्वः, सूनुः सात्त्विकपुङ्गवः । युवराजोऽजनि जग–ज्जनाह्लादनचन्द्रमाः ॥ २ ॥
धर्मघोषगुरोः पार्श्वे, धर्मं श्रुत्वा जिनोदितम् । विरक्तः कामभोगेभ्यो, महात्मा सोऽग्रहीद्व्रतम् ॥ ३ ॥
श्रुताम्भोनिधिपारीणः, स प्रसादाद्गुरोरभूत् । एकाकित्वविहाराख्यां, प्रतिमां च प्रपन्नवान् ॥ ४ ॥
निम्नभूमिप्रदेशेषु, विहरन् सोऽन्यदा मुनिः । शरत्काले महाटव्यां, तस्थौ प्रतिमया निशि ॥ ५ ॥
सूचीरवमानवदना–स्तत्र दंशा सहस्रशः । विलग्य कोमले तस्य, शरीरे शोणितं वपुः ॥ ६ ॥
निरन्तरं विलग्नैस्तै–र्दंशैर्दंशनतत्परैः । स मुनिः स्वर्णवर्णोऽपि, लोहवर्ण इवाऽऽबभौ ॥ ७ ॥
दशत्सु तेषु तस्योच्चै–र्वेदनाऽऽसीत्तथापि सः । तितिक्षामास तां क्षान्ति–क्षमो न तु ममार्ज तान् ॥ ८ ॥
अचिन्तयच्च दंशोत्था, व्यथाऽसौ कियता मम । इतोऽप्यनन्तगुणिता, नरकेषु हि सा भवेत् ॥ ९ ॥
यतः—"परमाधार्मिकोत्पन्ना, मिथोजाः क्षेत्रजास्तथा । नारकाणां व्यथा वक्तुं, पार्यन्ते ज्ञानिनाऽपि न ! ॥ १० ॥
किञ्च–अन्यद्वपुरिदं जीवाज्जीवश्चान्यः शरीरतः । जानन्नपीति को दक्षः, करोति ममतां तनौ ? ॥ ११ ॥
किञ्चानेन शरीरेण, स्वल्पकालविनाशिना । यद्येषां जायते तृप्तिः, किं न प्राप्तं ? तदा मया ॥ १२ ॥
भावयन्निति स प्राज्ञः, क्षममाणश्च तां व्यथाम् । रात्रावेव जहौ प्राणान्, दंशैः शोषितशोणितः ॥ १३ ॥

इति विषह्य स दंशपरीषहं, श्रमणभद्रमुनिस्त्रिदशोऽभवत् । तदपरैरपि साधुवरैरयं, जिनवचो निपुणैः परिषह्यताम् ॥१॥

इति श्रीमुद्रित—उत्तराध्ययनवृत्तितः उद्धृता

श्रमणभद्रमुनिकथा संपूर्णा.

४१ नैषेधिकीपरीषहे कुरुदत्तमहर्षिकथा

अभूत्पुरे गजपुरे, कुरुदत्तसुताभिधः । महेभ्यपुत्रो महतां, गुणानामेकमास्पदम् ॥ १ ॥
स संविग्नो गुरूपान्ते, प्रव्रज्याधीत्य च श्रुतं । प्रतिपेदेऽन्यदेकाकि—विहारप्रतिमां सुधीः ॥ २ ॥
विहरन्नेकदा सोऽथ, साकेतनगरान्तिके । तस्थौ प्रतिमया तुर्य—पौरुष्यां धैर्यमन्दरः ॥ ३ ॥
ततश्च गोधनं हृत्वा, चौरा ग्रामात्कुतश्चन । कुरुदत्तसुतस्यर्षेः, पार्श्वस्थेनाऽध्वना ययुः ॥ ४ ॥
साधुपार्श्वमथाऽभ्येयु—र्गोधनान्वेषका अपि । द्वौ मार्गौ तत्र दृष्ट्वा ते, पप्रच्छुश्चेति तं मुनिं ॥ ५ ॥
ब्रूहि साधो ! पथा केन, जग्मुश्चौराः सगोधनाः । तच्छ्रुत्वापि मुनिस्तेषां, न ददौ किञ्चिदुत्तरं ॥ ६ ॥
ततस्ते कुपिता वारि—क्लिन्नामादाय मृत्तिकां । मौलौ तस्य मुनेः पालीं, बबन्धुर्दुष्टचेतसः ॥ ७ ॥
तत्र क्षिप्त्वा चिताङ्गारान्, ययुस्ते क्रोधविह्वलाः । मुनिस्तु तैर्ज्वलन्मौलि—रप्येवं ह्यचिन्तयत् ॥ ८ ॥
'सह कलेवर ! खेदमचिन्तयन्, स्ववशता हि पुनस्तव दुर्लभा ।

बहुतरं च सहिष्यसि जीव हे !, परवशो न च तत्र गुणोऽस्ति ते ॥ ९ ॥'
ध्यायन्निति यतिमौलिं, मनश्चाकम्पयन्नहि । सहित्वा चोपसर्गं तं, परलोकमसाधयत् ॥ १० ॥
नैषेधिक्याः परीषहः, श्रीमुनिराजेन यथाऽमुनाऽधिसेहे । सकलैरपि साधुभिस्तथाऽसौ, सहनीयो महनीयपादपद्मैः ॥११॥

इति श्रीमुद्रित–उत्तराध्ययनवृत्तितः उद्धृता

श्री कुरुदत्तमहर्षिकथा संपूर्णा.

४२ शय्यापरिषहे सोमदत्त–सोमदेवर्षिकथा

बभूव पूर्यां कौशाम्ब्यां, यज्ञदत्ताभिधो द्विजः । तस्याभूतां सोमदत्त–सोमदेवाभिधौ सुतौ ॥ १ ॥
सोमभूतिमुनेः पार्श्वे, तौ द्वावपि महाशयौ । प्राव्राजिष्टां भवोद्विग्ना–वभूतां च बहुश्रुतौ ॥ २ ॥
अन्यदा स्वजनान् द्रष्टुं, तौ कौशाम्बीमुपेयतुः । स्वजनास्तु तदाऽवन्त्यां, गत्वाऽभूवन् स्थितास्तयोः ॥ ३ ॥
ततस्तावप्यचलता–मभिमालवकं मुनी । पिबन्ति तत्र देशे च, मद्यं केचिद्द्विजा अपि ॥ ४ ॥
तत्र ब्राह्मणगेहेषु, भिक्षार्थं गतयोस्तयोः । द्रव्येणान्येन संयोज्य, मद्यं विप्रस्त्रियो ददुः ॥ ५ ॥
अन्ये त्वाहुर्ददे ताभि–र्मद्यमेव यथास्थितम् । तद्विशेषमजानन्ता–वपातां तच्च तावपि ॥ ६ ॥
वपुर्भ्रमादिना सीधुं, पीतं ज्ञात्वाथ तौ मुनी । जाताऽनुतापौ निष्पापौ, मिथो व्यमृशतामिति ॥ ७ ॥

अयुक्तमेतदावाभ्या-मजानद्भ्यां महत्कृतम् । सुरामप्यऽपिबावाऽऽवां, प्रमादादसमीक्ष्य यत् ॥ ८ ॥
सेवेताकल्प्यमप्येव-माहारार्थी कदाचन । तदाहारपरीहार-मेवाऽऽवां कुर्वहेऽधुना ॥ ९ ॥
इत्यालोच्यापगातीर-गतकाष्ठोपरि स्थितौ । तावकार्ष्टां पादपोप-गमनं मुनिसत्तमौ ॥ १० ॥
अकालेऽपि तदा मेघ-वृष्टिर्जज्ञेऽतिभूयसी । पूरयन्ती पयःपुरै-र्नदीं प्लावितसैकतैः ॥ ११ ॥
आरूढश्रमणं दारु, ततारोडुपवत्ततः । उत्तेरतुस्ततो नैव, तदापि व्रतिनौ तु तौ ॥ १२ ॥
सोऽथ सिन्धुरयः कूल-तरून्मूलनतत्परः । काष्ठारूढौ यती सद्य-स्तौ निनाय पयोनिधौ ॥ १३ ॥
उच्छलल्लोलकल्लोल-लोलनान्दोलनव्यथाम् । उल्लोलोत्क्षिप्तकाष्ठौघा-भिघातञ्चातिदारुणम् ॥ १४ ॥
जलजन्तुकृतां ग्रास-विबाधाञ्चातिदुःसहाम् । तत्र धीरमनस्कौ ता-वक्षमेतां क्षमानिधी ॥ १५ ॥ (युग्मम्)
यावज्जीवं विषह्येति, तीव्रं शय्यापरीषहम् । देवभूवं सोमदत्त-सोमदेवावन्दिताम् ॥ १६ ॥
तौ साधुसिंहौ सहतः स्म शय्या-परीषहं यद्वदहार्यधैर्यौ । तथा विषह्यो मुनिभिः स सर्वैः, शमामृतक्षीरपयोधिकल्पैः

इति श्रीमुद्रित-उत्तराध्ययनवृत्तित उद्धृता

सोमदत्त-सोमदेवर्षिकथा संपूर्णा.

४३ आक्रोशपरीषहे क्षपककथा.

तथाहि क्वाप्यभूत्कश्चि—दनगारो गुणान्वितः । तपोऽतिदुस्तपं मास—क्षपणादिकमाचरन् ॥ १ ॥
तद्गुणावर्जिता कापि, तं ननामाऽनिशं सुरी । कार्यं मदुचितं पूज्यैः, प्रसाद्यमिति चाब्रवीत् ॥ २ ॥
श्रुत्वा विप्रस्य कस्यापि, दुर्वाक्यं सोऽन्यदा मुनिः । जातकोपः समं तेन, योध्धुं प्रववृतेतराम् ॥ ३ ॥
क्षुत्क्षामदेहः क्षपक—स्ततस्तेन द्विजन्मना । हत्वा मुष्ट्यादिभिः पृथ्व्या—मपात्यत तरस्विना ॥ ४ ॥
मुहुर्मुहुस्ताडयित्वा, द्विजेन मुमुचेऽथ सः । ततः स्वस्थानमगम—त्क्षपकोऽपि कथञ्चन ॥ ५ ॥
तत्पार्श्वेऽथ विभावर्यां, विभाभिर्भासुरी सुरी । समाजगाम तत्पादौ, प्रणनाम च पूर्ववत् ॥ ६ ॥
तां देवीं जल्पयामास, न किञ्चित्क्षपकः पुनः । अजल्पन्तं च तं साधु—मेवं पप्रच्छ देवता ॥ ७ ॥
त्वं न जल्पयसि स्वामि—न्नपराधात्कुतोऽद्य मां ? । ततो वाचंयमोऽप्युच्चैः, प्रत्युवाचेति निर्जरीम् ॥ ८ ॥
द्विजेन हन्यमानोऽपि, यन्नाहं रक्षितस्त्वया । ममापकारिणस्तस्य, किञ्चिन्नापकृतं च यत् ॥ ९ ॥
ततस्त्वां वादये नाहं, वाङ्मात्रप्रीतिकारिणीम् । तच्छ्रुत्वाऽभ्यधाद्देवी, स्मितविच्छुरिताधरा ॥ १० ॥
युवयोरभवद्युद्धं, यदान्योन्यविलग्नयोः । तदाहमपि तत्रैवा—ऽभूवं कौतुकदर्शिनी ॥ ११ ॥
किन्तु तुल्यौ युवां दृष्टौ, कोपाविष्टौ मया तदा । कः साधुः ? को द्विजश्चेति, नाज्ञासिषमहं तदा ॥ १२ ॥
युष्मद्रक्षां विप्रशिक्षा—मत एव च न व्यधाम् । श्रुत्वेति क्षपकः शान्त—कोपाऽऽटोपोऽब्रवीदिति ॥ १३ ॥

सन्नृता प्रेरणा देवि, त्वयाऽसौ विहिता मम । तदमुष्यातिचारस्य, मिथ्यादुष्कृतमस्तु मे ॥ १४ ॥
ततो यतिं तं प्रणिपत्य सत्य—भक्त्या निज धाम जगाम देवी ।
कुप्यन्मुनिः स्यादिति बालतुल्यो, नाक्रोशकारिष्वपि तेन कुप्येत् ॥ १५ ॥

इति श्रीमुद्रित--उत्तराध्ययनवृत्तित उद्धृता

क्षपककथा संपूर्णा.

४४ श्री अर्जुनमालर्षिकथा

अभूत्पुरे राजगृहे, गृहे निःशेषसम्पदाम् । मालाकारोऽर्जुनाह्वानः, स्कन्दश्रीस्तस्य च प्रिया ॥ १ ॥
यक्षो मुद्गरपाण्याह्वः, पुराद्राजगृहाद्बहिः । अर्जुनस्याराममार्गे—ऽभवत्तद्गोत्रदेवता ॥ २ ॥
कुसुमैर्मेदुरामोद—प्रमोदितजगज्जनैः । तं यक्षमर्जुनो भूरि—भक्त्याऽपूजयदन्वहम् ॥ ३ ॥
स्कन्दश्रीरन्यदा भर्तु—र्भक्तं दत्वा गृहं प्रति । पुष्पाण्यादाय वलिता, यक्षचैत्यान्तिकं ययौ ॥ ४ ॥
तदा च तां दुर्ललित—गोष्ठीसक्ता मदोत्कटाः । यक्षवेश्मस्थिताः प्रेक्षा—मासुः षट् कामिनो नराः ॥ ५ ॥
असौ सौन्दर्यवसति—र्वनिताऽर्जुनमालिनः । गृह्यतामिति जल्पन्तो, द्रुतं ते जगृहुश्च ताम् ॥ ६ ॥
यक्षायतनमध्ये च, तां समानीय कामिनीम् । यक्षस्याग्रे बुभुजिरे, ते सर्वेऽपि पुनः पुनः ॥ ७ ॥

तदा च यक्षपूजार्थं, तत्रागादर्जुनोऽपि हि । तंचायान्तं विलोक्यैवं, स्कन्दश्रीस्तानभाषत ॥ ८ ॥
आगच्छत्यर्जुनोऽसौ तत्किं मां यूयं विमोक्ष्यथ ? । ततस्तेऽचिन्तयन्नून-मेतस्याः प्रियमस्त्यदः ॥ ९ ॥
वराकान्मालिकादस्मा—न्नास्माकं भीरु ! भीरिति । ब्रुवन्तस्ते बबन्धुश्च, द्रुतमर्जुनमालिनम् ॥ १० ॥
तं यक्षस्य पुरो न्यस्य, तस्य पश्यत एव हि । सिषेविरे ते तत्कान्ता-महम्पूर्विकया मुहुः ॥ ११ ॥
स्वभार्यां भुज्यमानां तै-र्वीक्ष्याऽचिन्तयदर्जुनः । एनं यक्षं पुष्पपुञ्जैः पूजयाम्यहमन्वहम् ॥ १२ ॥
अद्य त्वस्यैव पुरतः, प्राप्नोम्येतां विडम्बनाम् । तन्निश्चितमिदं नैव, यक्षः कोप्यत्र विद्यते ॥ १३ ॥
यदि चात्र भवेद्यक्ष—स्तदासौ मां स्वसेवकम् । नैवेदानीमुपेक्षेत, पीड्यमानमनाथवत् ॥ १४ ॥
ध्यायन्तमिति तं ज्ञात्वा, यक्षस्तदनुकम्पया । प्रविवेशाशु तस्याङ्गे—ऽच्छिदत्तद्बन्धनानि च ॥ १५ ॥
सहस्रपलनिष्पन्नं, गृहीत्वा लोहमुद्गरम् । तान्नारीसप्तमान् गोष्ठी—पुरुषान् षट् जघान च ॥ १६ ॥
इत्थं प्रतिदिनं नारी-सप्तमान् मानवान् स षट् । जघान सतताभ्यासा-द्भ्रामं भ्रामं पुराद्बहिः ॥ १७ ॥
तज्ज्ञात्वा पूर्जनः सर्व-स्तावन्न निरगाद्बहिः । यावत्तेन हता न स्युः, षट् नारीसप्तमा नराः ॥ १८ ॥
अन्यदा तत्पुरोपान्ते, श्रीवीरः समवासरत् । न त्वर्जुनभयात्कोऽपि, जिनं नन्तुं ययौ जनः ॥१९॥
तदा तत्पुरवास्तव्यः, श्रुत्वा श्रीमज्जिनागमम् । एवं सुदर्शनः श्रेष्ठी, दध्यौ हर्षोच्छ्वसत्तनुः ॥ २० ॥
अहो ! जगज्जनाम्भोज—प्रबोधननभोमणिम् । श्रीवीरमपि नन्तुं नो, यात्यर्जुनभयाज्जनः ॥ २१ ॥
जिनस्य विश्वत्रितय—त्रायिणो ध्यायिनं जनम् । हन्तुमीष्टे न हीन्द्रोऽपि, तज्जनोऽयं बिभेति किम् ? ॥२२॥

यद्भाव्यं तद्भवतु वा, स्वामिनं किन्तु वन्दितुम् । यास्याम्येवेति स ध्यात्वा, निरगान्नगराद्बहिः ॥ २३ ॥
अर्जुनोऽपि दधावे द्राग्, वीक्ष्यायान्तं सुदर्शनम् । उल्लालयन् मुद्गरं तं, पुष्पकन्दुकलीलया ॥ २४ ॥
तं चापतन्तं वेगेन, धनुर्मुक्तपृषत्कवत् । वीक्ष्येति व्यमृशद्धर्य—स्थैर्यधैर्यैः सुदर्शनः ॥ २५ ॥
अयं मुद्गरपाणिर्मां, हन्तुमायाति मालिकः । तदात्मकृत्यं कुर्वेऽह—मेवं ध्यात्वेति सोऽब्रवीत् ॥ २६ ॥
अर्हत्सिद्धमुनीन् जैनं, धर्मं च जगदुत्तमम् । शरणं प्रतिपन्नोऽस्मि, श्रीवीरं च जगद्गुरुम् ॥ २७ ॥
किश्चास्मादुपसर्गाच्चेदद्य मोक्षो भवेन्मम । तदा चतुर्विधाहारः, कल्पते नान्यथा पुनः ॥ २८ ॥
इत्थं निगद्य साकारा—ऽनशनं प्रतिपद्य च । स्मरन् पञ्च नमस्कारान्, कायोत्सर्गं चकार सः ॥ २९ ॥
सद्यः सुदर्शनाभ्यर्ण—मायासीदर्जुनोऽप्यथ । नाशकत्तमुपद्रोतुं, किन्तु धर्मप्रभावतः ॥ ३० ॥
ततस्तं परितोऽभ्राम्य—द्दुवलानर्जुनोऽधिकम् । शशाक शशकः सिंह—मिव नाक्रमितुं पुनः ॥ ३१ ॥
भ्रामं भ्राममविश्रामं, यक्षः श्रान्तोऽभवत्ततः। न तु तं द्रष्टुमैशिष्ट, दुर्दृष्टयाऽर्कमुलूकवत् ॥ ३२ ॥
आदाय मुद्गरं मुक्त्वा--ऽर्जुनं यक्षोऽगमत्ततः । अपि देवबलाद्धर्म—बलमेव विशिष्यते ! ॥ ३३ ॥
मुक्तस्तेनार्जुनः पृथ्व्यां, पपात च्छिन्नशाखिवत् । उत्तस्थौ च क्षणादङ्गं मोटयन् गतनिद्रवत् ॥ ३४ ॥
किमकार्षं ? क्व स्थितोऽस्मि ?, का दशा मम विद्यते ? । इति स ज्ञातवान्नैव, निद्रावस्थानुभूतवत् ॥ ३५ ॥
सोऽथाऽप्राक्षीत्स्वस्वरूपं, कृतोत्सर्गं सुदर्शनम् । उपसर्गः शशामेति, सोऽप्युत्सर्गमपारयत् ॥ ३६ ॥
सर्वं तत्पूर्ववृत्तान्तं, तस्मै सम्यग् जगाद च । तच्छ्रुत्वा जातनिर्वेदो--ऽर्जुनश्चिन्तितवानिति ॥ ३७ ॥

अहो ! अज्ञानिना घोरं, कर्मेदं नरकप्रदम् ! । मया कृतमिति ध्यायन्, सोऽपृच्छदिति तं पुनः ॥३८ ॥
किमर्थं प्रस्थितोसि त्वं ?, ब्रूहि भ्रातः ! सुदर्शन ! । सोऽभ्यधाच्छ्रीमहावीरं, वन्दनार्थं व्रजाम्यहम् ॥ ३९ ॥
तच्छ्रुत्वेत्यर्जुनोऽवादी–द्वन्दितुं परमेश्वरम् । अहमप्यागमिष्यामि, त्वया सह महामते ! ॥ ४० ॥
ततस्तेन समं हृष्टः, श्रीमहावीरसन्निधौ । अगात्सुदर्शनः स्वामि–दर्शनोत्सुकदर्शनः ॥ ४१ ॥
श्रीवर्द्धमानतीर्थेश–पादपद्मौ प्रणम्य तौ । सम्यक् शुश्रुवतुर्धर्म–देशनां क्लेशनाशिनीम् ॥ ४२ ॥
देशनान्ते च सर्वज्ञं, प्रणम्यापृच्छदर्जुनः । स्वामिन् ! कथं विशुद्धिर्मे, भवेद्बहुलपाप्मनः ॥ ४३ ॥
अथोचे भगवांस्त्वं चे–दात्मशुद्धिं चिकीर्षसि । तर्हि संयममादाय, तपस्तप्यस्व दुस्तपम् ॥ ४४ ॥
मलं स्वर्णगतं वह्नि–र्हंसः क्षीरगतं जलम् । यथा पृथक्करोत्येवं, जन्तोः कर्ममलं तपः ॥ ४५ ॥
यथाऽम्बुदा विलीयन्ते, प्रचण्डपवनाऽऽहताः । तथा तीव्रतपोऽपास्ताः, पाप्मानः प्रबला अपि ॥ ४६ ॥
तन्निशम्यार्जुनः स्वामि–समीपे व्रतमाददे । निर्जरार्थं व्यहार्षीच्च, पुरे राजगृहे सदा ॥ ४७ ॥
निरन्तरं षष्ठतपः, कुर्वन् साम्यसुधाम्बुधिः । साध्वाचारं च सकलं, निष्कलङ्कमपालयत् ॥ ४८ ॥
अस्मत्स्वजनहन्ताऽसौ, दुष्टो दुष्कर्मदूषितः । धूर्तो धत्तेऽधुना साधु–वेषं वेषविडम्बकः ! ॥ ४९ ॥
इत्याद्यैर्बहुलोकोक्तै–राक्रोशैस्ताडनैस्तथा । स महात्मा न चुक्षोभ, प्रत्युतैवमचिन्तयत् ॥ ५० ॥ (युग्मम्)
"मन्निन्दया यदि जनः परितोषमेति, नन्वप्रयासजनितोऽयमनुग्रहो मे ।
श्रेयोऽर्थिनो हि मनुजाः परतुष्टिहेतो–र्दुःखार्जितान्यपि धनानि परित्यजन्ति ॥ ५१ ॥

किञ्च "अक्कोसहणणमारण—धम्मब्भंसाण बालसुलहाणं । लाभं मण्णइ धीरो, जहुत्तराणं अलाभंमि ॥ ५२ ॥
इति ध्यायन् स षण्मासीं, सोढाक्रोशपरीषहः । कृतकर्मक्षयः प्राप, केवलज्ञानमुज्ज्वलम् ॥ ५३ ॥
ततश्चिरं स प्रतिबोध्य भव्यान्, मुक्तिं ययावर्जुनमालिसाधुः। एतद्वदाक्रोशपरीषहोन्यै–रपि क्षमाढ्यैः श्रमणैर्विषह्यः ॥५४॥

इति श्रीमुद्रित–उत्तराध्ययनवृत्तितः उद्धृता आक्रोशपरीषहे अर्जुनमालर्षिकथा सम्पूर्णा.

४५ वधपरीषहे स्कन्दकाचार्यकथा

अभून्नगर्यां श्रावस्त्यां, जितशत्रुर्महीपतिः । सधर्मचारिणी तस्य, धारिणी संज्ञिकाऽभवत् ॥ १ ॥
गौरीशयोः स्कन्द इव, स्कन्दकोऽभूत्सुतस्तयोः । पुरन्दरसुतादेश्या, पुरन्दरयशाः सुता ॥ २ ॥
तदा दण्डकभूपोऽभू–त्कुम्भकारकृते पुरे । पुरोहितस्तु तस्याऽऽसी–दभव्यः पालकाभिधः ॥ ३ ॥
तेन दण्डकिसंज्ञेन, भूभृता भूरिभूतिना । पुरन्दरयशाः कन्या, पितृभ्यां पर्यणायि सा ॥ ४ ॥
अन्यदा सुव्रतस्वामी, भव्याम्भोजनभोऽध्वगः । श्रावस्त्यां समवासार्षी–त्सुरासुरनमस्कृतः ॥ ५ ॥
धन्यंमन्यः स्कन्दकोऽगा–त्तं नन्तुं परमेश्वरम् । श्रुत्वा तद्देशनां श्राद्ध–धर्मंच प्रत्यपद्यत ॥ ६ ॥
पुरोधाः पालकः सोऽथ, कुम्भकारकृतात्पुरात् । केनचिद्राजकार्येण, श्रावस्त्यामन्यदाऽऽययौ ॥ ७ ॥
स च भूपसभामध्ये, कुर्वन्निर्ग्रन्थगर्हणाम् । द्रुतं निरुत्तरीचक्रे स्कन्दकेन महाधिया ॥ ८ ॥

पापः प्राप ततो द्वेषं, पालकः स्कन्दकोपरि । अपकर्तुं पुनः किञ्चि—त्तस्य न प्राभवत्तदा ॥९॥
कृतप्रस्तुतकृत्योऽथ, पालकः स्वास्पदं ययौ । जगाम न तु तच्चिता—त्कोपः स्कन्दकगोचरः ॥ १० ॥
अथ श्रीसुव्रतस्वामि—पादान्ते दान्तमानसः । प्राव्राजीत्स्कन्दकः सार्कं, मर्त्यानां पञ्चभिः शतैः ॥ ११ ॥
क्रमाद्बहुश्रुते जाते, स्कन्दके सुव्रतप्रभुः । तस्मै शिष्यतया तानि, पञ्च साधुशतान्यदात् ॥ १२ ॥
अन्येद्युः सुव्रतार्हन्तं, स्कन्दकः पृष्टवानिति, व्रजाम्यहं स्वसुर्देश—मादेशः स्याद्यदि प्रभोः ॥ १३ ॥
जगौ जगत्प्रभुस्तत्रो—त्पत्स्यते मारणान्तिकः । सर्वेषामुपसर्गो व—स्तच्छ्रुत्वा स्कन्दकोऽवदत् ॥ १४ ॥
आरधनासाधको हि, नोपसर्गस्तपस्विनाम् । दुःखायते महानन्द—महानन्दाभिलाषिणाम् ! ॥ १५ ॥
ततो ब्रूहि प्रभो ! तस्मि—न्नुपसर्ग उपस्थिते । आराधका भविष्यामो, वयं यद्वा विराधकाः ? ॥ १६ ॥
स्वामी स्माह त्वां विनाऽन्ये, सर्वेप्याराधका इति । स्कन्दकस्तन्निशम्येति, व्यमृशद्भृशमुत्सुकः ॥ १७ ॥
आराधका इयन्तः स्यु—र्विहारे यत्र साधवः । नूनं स शुभ एवेति, विचिन्त्य स्कन्दकोऽचलत् ॥ १८ ॥
क्रमादद्गत्वा कुम्भकार— कृते स सपरिच्छदः । उद्याने समवासार्षी—त्तमश्रौषीच्च पालकः ॥ १९ ॥
ततः प्राग्वैरशुद्धयर्थ—मुद्याने तत्र पालकः । प्रच्छन्नं गोपयामास, विविधायुधधोरणीम् ॥ २० ॥
इति दण्डकिराड्गे चा—ऽपडक्षीणमुवाच सः । जितः परीषहैरत्र, स्कन्दकोऽस्ति समागतः ॥ २१ ॥
अयं स्वयं महावीर्य—श्चण्डदोर्दण्डविक्रमैः । साधुवेषधरैर्युक्तो, भटानां पञ्चभिः शतैः ॥ २२ ॥
उद्याने गोपितैः शस्त्र—प्रकरैरतिदारुणैः । त्वां वन्दितुं गतं हत्वा, राज्यमेतद्ग्रहीष्यति ! ॥ २३ ॥ (युग्मम्)

विलोकय ! ॥ २४ ॥
प्रत्ययश्चेन्न ते स्वामि—न्नस्मिन्मद्वचने भवेत् । तदा तद्गोपिताऽस्त्राणि, गत्वोद्यानं निरैक्षत ! ॥ २५ ॥
एवं व्युद्ग्राहितस्तेन, तदुद्यानं गतो नृपः । स्थानेषु पालकोक्तेषु, नानास्त्राणि विधायिनाम् ॥२६॥
दृष्ट्वा तानि नृपः क्रुद्धो, मुनीन्सर्वानबन्धयत् । अकार्यं विद्यते किञ्चि—न्नाऽविमृश्य इति ब्रुवन् ! ॥ २७ ॥
पापस्य पालकस्यैव, तान्निबद्ध्यार्पयन्नृपः । यत्तुभ्यं रोचते तत्त्व—मेषां कुर्या पीडायन्त्रान्तिकेऽनयत् ॥ २८ ॥
मूषकानिव मार्जार—स्तान् प्राप्य मुदितोऽथ सः । संयतान् संयतान्मर्त्य—यन्त्रेणानेन वोऽखिलान् ॥ २९ ॥
इति प्रोचे च रे ! यूय—मिष्टं स्मरत दैवतम् । इदानीं पीडयिष्यामि, विप्रमुक्ता मनस्विनः ॥ ३० ॥
ततस्ते साधवो धीरा, ज्ञातोपस्थितमृत्यवः । जीविताशामृत्युभीति—विदधुर्विधिपूर्वकम् ! ॥ ३१ ॥
गृहीतालोचनाः सम्यक्, मैत्रीभावमुपागताः । पर्यन्ताराधनां सर्वे, धीरैर्भाव्यं मनस्विभिः ॥३२
मर्तव्यं कातरेणापि, धीरेणापि च भूस्पृशा । द्विधापि नियते मृत्यौ, गतस्पृहाः ! ॥ ३३ ॥ युग्मम्
इत्यादि वदतोत्साह्य—मानाः स्कन्दकसूरिणा । अभवंस्ते विशेषेण, स्वदेहेऽपि क्षेपमपीडयत् ॥ ३४ ॥
क्रूराशयः क्रूरकर्मा, क्रूरगीः पालकस्ततः । एकैकं श्रमणं यन्त्रे, क्षेपं बद्धमधारयत् ॥ ३५ ॥
पीड्यमानान् विनेयान् स्वान्, वीक्ष्यान्तर्दह्यतामयम् । इति स स्कन्दकं यन्त्र—पार्श्वे पुनः ! ॥ ३६ ॥
पीड्यमानानगाराङ्गो—च्छलच्छोणितविन्दुभिः । समन्ताद्ध्रियमाणोऽपि, नाऽकुप्यत्स्कन्दकः महाशयः ! ॥ ३७ ॥
किन्तु साम्यसुधास्यन्द—भावितैः समयोचितैः । वाक्यैर्निर्यामयामास, तानेवं स कृती ? ॥ ३८ ॥
"भिन्नः शरीरतो जीवो, जीवाद्भिन्नश्च विग्रहः । विदन्निति वपुर्नाशेऽप्यन्तः खिद्येत कः

किञ्चाखिलो विपाकोऽय—मस्ति स्वकृतकर्मणः । दुःखाय नोपसर्गस्त—त्सतां कर्मजिघांसताम् ॥ ३९ ॥
अवश्यं नाशिनो बाह्य—स्याङ्गस्याऽस्य कृते ततः । कोपः कार्यो नान्तरङ्ग—ध्रुवधर्मधनापहः ॥ ४० ॥"
स्कन्दकेनेति निर्याम्य—माना निर्मलमानसाः । महात्मानो विपक्षे च, मित्रे च समदृष्टयः ॥ ४१ ॥
यन्त्रपीडनपीडां तां, क्षममाणाः क्षमाधनाः । केवलं प्राप्य कैवल्य—सुखं ते लेभिरे क्रमात् ! ॥ ४२ ॥ युग्मम्
द्रुतं हतेषु तेनैवं, द्व्युनपञ्चशतर्षिषु । एकं क्षुल्लकमुद्दिश्य, पालकं स्कन्दकोऽवदत् ॥ ४३ ॥
अनुकम्प्यमिमं बालं, पीडयमानम् निरिक्षितुम् । नाहं शक्ष्यामि नियतं, पूर्वं पीडय मां ततः ! ॥ ४४ ॥
तच्छ्रुत्वा पालकस्तस्य, भूरिदुःखविधित्सया । गुरोः पश्यत् एव द्राक्, प्राक् तं बालमपीडयत् ! ॥ ४५ ॥
शुक्लध्यानसुधाऽऽसार—शान्तकर्महुताशनः । बालः सोऽपि महासत्त्वो, महानन्दमविन्दत ! ॥ ४६ ॥
तद्वीक्ष्य स्कन्दकाचार्यः, क्रुद्धोऽन्तर्ध्यातवानिति । अनेन सपरीवारः, पापेनाऽस्मि विनाशितः ! ॥ ४७ ॥
क्षुल्लकोऽपि हि मद्वाचा, क्षणमेकं न रक्षितः । निग्राह्य एव पापोऽसौ, तन्मया गर्वपर्वतः ॥ ४८ ॥
अयं भूपोऽपि निग्राह्यो—ऽस्मद्विनाशनिबन्धनम् । उपेक्षाकारिणोऽस्माकं, वध्या जानपदा अपि ! ॥ ४९ ॥
तद्दुष्करस्य चेदस्य, भवेन्मत्तपसः फलम् । तदाहं दाहकोऽमीषां, भूयासं भाविजन्मनि ! ॥५० ॥
इत्थं कृतनिदानः स, पीडितस्तेन दुर्धिया । मृत्वा वह्निकुमारेषु, सुरोऽभूत्परमर्द्धिकः ॥ ५१ ॥
पुरन्दरयशास्तत्र, दिने चैवमचिन्तयत् । कुतो हेतोः पुरीमध्ये न दृश्यन्तेऽद्य साधवः ! ॥ ५२ ॥
इतश्च स्कन्दकमुने—रजोहरणमुत्तमम् । रक्ताभ्यक्तः कर इति, जगृहे गृध्रपक्षिणा ॥ ५३ ॥

तद्रजोहरणं च द्राग्, भवितव्यनियोगतः । पुरः पुरन्दरयशो–देव्या गृध्रो न्यपातयत् ॥ ५४ ॥
तच्चादायोद्वेष्टयन्ती, सा स्वयं परिकर्मितम् । काम्बलं खण्डमद्राक्षी–द्भ्रातुः प्रव्रजतोऽर्पितम् ॥ ५५ ॥
चिह्नेन तेन च ज्ञात्वा, सोदरादीन् मुनीन् हतान् । महतीमधृतिं प्राप्ता, साऽवादीदिति भूपतिम् ॥ ५६ ॥
रे साधुद्विष्ट ! पापिष्ठ !, विनङ्क्ष्यत्यधुना भवान् । महर्षीणां सुराणां च न ह्यवज्ञा शुभावहा ! ॥ ५७ ॥
इत्युदीर्येति दध्यौ चा–ऽधुनाऽहं व्रतमाददे । अलं संसारवासेना–ऽमुना दुःखौघदायिना ! ॥ ५८ ॥
चिन्तयन्तीति सा देवैः, सुव्रतस्वामिसन्निधौ । नीताऽऽदाय परिव्रज्यां, परलोकमसाधयत् ! ॥ ५९ ॥
ज्ञात्वाऽथाऽवधिना प्राच्यं, स्ववृत्तं स्कन्दकामरः । क्रोधाध्मातो देशयुक्त–मधाक्षीन्मङ्क्षु तत्पुरम् ॥ ६० ॥
ततोऽरण्यमभूद्देश–भूमौ दण्डकिभूपतेः । अद्यापि दण्डकारण्य–मिति तत्प्रोच्यते बुधैः ॥ ६१ ॥

एकोनपञ्चशतसाधुवरैरवार्य–वीर्यैर्यथा वधपरीषह एष सोढः ! ।
सह्यस्तथा यमपरैरपि साधुमुख्यैः, श्रीस्कन्दकश्रमणवन्न पुनर्विधेयम् ॥ ६२ ॥

इति श्रीमुद्रित–उत्तराध्ययनवृत्तितः उद्धृता स्कन्दकाचार्यकथा संपूर्णा.

४६ तृणस्पर्शपरीषहे भद्रमहर्षिकथा

श्रावस्तीनगरीभर्तु–र्जितशत्रुमहीपतेः । भद्राभिधोऽभवत्सूनुः, सात्त्विकेषु शिरोमणिः ॥ १ ॥
मुनीनामन्तिके जैनं, धर्मं श्रुत्वा विरक्तधीः । स प्रव्रज्यामुपादत्त, क्रमाच्चाऽभूद्बहुश्रुतः ॥ २ ॥

प्रतिपद्याऽन्यदैकाकि–विहारप्रतिमा व्रती । विजहार धरापीठे–ऽप्रतिबद्धः समीरवत् ॥ ३ ॥
अन्येद्युर्विहरन् सोऽथ, क्वापि राज्यान्तरे गतः । हेरिकोयमिति ज्ञात्वा, जगृहे राजपुरुषैः ॥ ४ ॥
कस्त्वं ? केन चरत्वाय, प्रहितोसीति ? जल्प रे ! । पप्रच्छुरिति तं भूयः, पुरुषाः परुषाः रुषा ॥ ५ ॥
व्रती तु प्रतिमास्थत्वा–न्न किमप्युत्तरं ददौ । ततस्ते कुपिताः क्षार--दानेन तमतक्षयन् ॥ ६ ॥
निशातखड्गवत्तीक्ष्ण--धारैर्दर्भैश्च तं मुनिम् । गाढमावेष्टय मुक्त्वा च, ते दुष्टाः स्वाश्रयं ययुः ॥ ७ ॥
यतेस्तस्याऽमिपं बाढं, समन्तादपि तैः कुशैः । विदग्धस्येव वैदग्ध्यं, दुर्विदग्धैरकृत्यत !॥ ८ ॥
तथापि कलुषं ध्यान--मकुर्वाणः क्षमानिधिः । स सम्यगधिसेहे तं, तृणस्पर्शपरीषहम् ॥ ९ ॥
लग्ना शूकशिखाऽप्यङ्गे--ऽङ्गिनां क्षोभाय जायते । स तु दक्षो न चुक्षोभ, मांसमग्नैः कुशैरपि ! ॥ १० ॥
एवं तृणस्पर्शपरीषहं यथा–ऽधिसोढवान् भद्रमुनिर्महाशयः । तथाऽयमन्यैरपि साधुपुङ्गवै--स्तितिक्षणीयः क्षतमोहवैरिभिः ॥

इति श्रीमुद्रित--उत्तराध्ययनवृत्तितः उद्धृता भद्रमहर्षिकथा संपूर्णा

४७ पृथ्वीचन्द्र–गुणसागर–प्रबन्धः गतैकादशो भवः

अथास्ति कोशले देशेऽयोध्या नाम महापुरी । हरिसिंहो नृपस्तत्र, तस्य पद्मावती प्रिया ॥ १ ॥
इतः सर्वार्थतश्च्युत्वा, कुसुमायुधनिर्जरः । विमानस्वप्नतः पद्मावती–कुक्षाववातरत् ॥ २ ॥
पूर्णे काले प्रशस्तेऽह्नि, सुखं प्रासूत सा सुतम् । व्यधात् तस्याभिधां, पृथ्वीचन्द्र इत्यवनीधवः ॥ ३ ॥

क्रमेणाभ्यस्तसद्विद्यो-ऽनवद्यचरितोऽथ सः । अवापत् तरुणीनेत्र-जीवनं यौवनं वयः ॥ ४ ॥
कन्याः षोडश भूपोऽथ, कुमारं पर्यणाययत् । नृसिंहो हरिसिंह-स्तं महामहपुरस्सरम् ॥ ५ ॥
ज्यायसी श्रेयसी तस्य, मातुलस्य सुताऽभवत् । जयदेवस्य ललित-सुन्दरीत्यभिधानतः ॥ ६ ॥
पृथ्वीचन्द्रः पुनर्भोग-विमुखः स्त्रीषु नो रतिम् । मनागप्यभजच्चेति, दध्यौ चेतसि सन्ततम् ॥ ७ ॥
अहो ! पितृभ्यामेषोऽस्मि, रागाब्धौ पातितः कथम् ? । यदेता दयिता नैव, मां विमुञ्चन्ति जातुचित् ॥ ८ ॥
कथञ्चित् तदुपायेन, प्रेयसीः प्रतिबोध्य ताः । प्रतिपद्ये परिव्रज्यां, कुर्यां स्वहितमञ्जसा ॥ ९ ॥
ततोऽमुं निर्मितामन्द-धर्मकर्मैच्छमङ्गजम् । मत्वा मोहादश्रुमिश्र-नयनो जनकोऽब्रवीत् ॥ १० ॥
वत्स ! स्वच्छमतेऽस्माकं, तावद् वार्द्धक्यमागतम् । त्वं तु राज्यरमारामासमा-गमपराङ्मुखः ॥ ११ ॥
तद् विचार्य यदत्र स्या-दुचितं कथयाशु तत् । त्वयि राज्यधरेऽप्यापि, यद् वयं राज्यलोलुपाः ॥ १२ ॥
तदेतद्ह्रीकरं लोके, न चायं नः कुलक्रमः । प्राव्रजन् पूर्वजा यन्नः, सर्वे राज्यधरेऽङ्गजे ॥ १३ ॥
तत् स्वीकुरु त्वमात्मीयं, राज्यं मा प्रार्थनां वृथा । कार्पीर्नः स इति श्रुत्वा, तत् पित्रोक्तं तथाऽकरोत् ॥ १४ ॥
ततो निवेशितो राज्ये, पृथ्वीचन्द्रो महामहात् । मोदन्ते स्म जनाः सर्वे, तद्राज्यं विक्ष्य विस्मिताः ॥ १५ ॥
अथ पृथ्वीमहेन्द्रेऽस्मिन्, पृथ्वीचन्द्रे पृथुद्युतौ । पृथ्वीं शासत्यन्यदेत्य, सुधनाऽऽख्यो वणिग्वरः ॥ १६ ॥
प्राणमत् प्राभृतेनोर्वी-पतिं विरचिताञ्जलिः । तं संमान्य नृपोऽपृच्छ-दाश्चर्यं ब्रूहि किञ्चन ॥ १७ ॥ युग्मम्॥
सोऽप्याह कुरुदेशेऽस्मि-न्नस्ति हस्तिपुरं पुरम् । पुरप्रधानस्तत्रासी-न्महेभ्यो रत्नसञ्चयः ॥ १८ ॥

सुमङ्गला प्रिया तस्य, तयोः पुत्रोऽभवद् वरः । तस्मिन् गर्भस्थिते माता, स्वप्ने क्षीरार्णवं पपौ ॥ १९ ॥
गुणसागर इत्याख्या, पृथिव्यां पप्रथेऽस्य तत् । क्रमेण वर्द्धमानोऽसौ, प्रपेदे मध्यमं वयः ॥ २० ॥
परमाजन्म भोगेषु, विरतो गुणसागरः । चक्रे रमासु रामासु, न मनागपि मानसम् ॥ २१ ॥
अथ तत्र पुरेऽभूवन्, महेभ्या अष्ट विश्रुताः । तेषां पुत्र्योऽभवन्नष्टौ, तास्तारुण्यमगुः क्रमात् ॥ २२ ॥
अष्टापि ताः सुता वीक्ष्य, कुमारं गुणसागरम् । बद्धानुरागास्तत्रोच्चैः, प्रत्यज्ञासुश्च तं पतिम् ॥ २३ ॥
तासां तं निश्चयं ज्ञात्वा, पितरस्ते कनीर्निजाः । गुणसागरसंज्ञाय महेभ्याङ्गभुवे ददुः ॥ २४ ॥
वातायनगतोऽन्येद्युर्ददर्श गुणसागरः । मूर्त्तं धर्ममिव प्राप्त-शमं वाचंयमं जवात् ॥ २५
क्वाप्यपश्यमिदं रूप-मित्यूहापोहसङ्गतः । प्राग् जन्म निजमस्मार्षीत्-श्रामण्यं च पुराकृतम् ॥२६ ॥
ततो विशिष्टसंवेग-रङ्गसङ्गतमानसः । पितरौ स्माह न स्थातुं, क्षमेऽहं भवचारके ॥ २७ ॥
तत् प्रसद्य व्रतादानाऽनुमतिं मे प्रयच्छतम् । प्राहतुस्तौ वत्स ! किं ते, सांप्रतं यौवने व्रतम् ॥ २८ ॥
अथ चेद् वत्स निर्बन्धो, व्रते ते न निवर्त्तते । तदोद्वाह्य प्रियाः पश्चात्, कुर्यास्तूर्णं स्वमीप्सितम् ॥ २९ ॥
प्रतिपद्य वचः पित्रोः, कुमारो गुणसागरः । महामहेन ता अष्टा-वपि कन्या व्यवाहयत् ॥ ३० ॥
पाणीन् गृहीत्वा कन्याना-मसौ मातृगृहे स्थितः । प्रावर्त्तत पुरस्तत्र, नाटकं चित्रकृत् तदा ॥ ३१ ॥
गुणसागरस्तु नासास्ति-मिताक्षः संयतेन्द्रियग्रामः । दध्यावेकाग्रमना मुनि-र्भविष्याम्यहं प्रातः ॥ ३२ ॥
एवं तपः करिष्ये तथा विधास्यामि गुरुजनविनयम् । व्रतयोगेषु यतिष्ये स्थास्यामि ध्याननियमेषु ॥ ३३ ॥

एवं निभृतं ध्यायन् स्मरन् श्रुतं पूर्वजन्मनाभ्यस्तम् । प्रतिपद्य भावसंयम–मभङ्गसंवेगरससिक्तः ॥ ३४ ॥
उदितोदितविशदतरा–ध्यवसायवशोऽनुसमयमेष मुनिः । निर्दग्धघातिकर्मा, केवलममलं क्षणादापत् ॥ ३५ ॥
प्रणयिन्योऽपि नवास्ताअस्ता–खिलकर्मघर्मसन्तापाः । प्रतिपन्नभावचरणा, इह केवलसंविदमविन्दन् ॥ ३६ ॥
तत्केवलमहिमानं, कर्तुमथाजग्मुरनिमिषाधीशाः । नेदुर्दिवि दुन्दुभयो भेजुर्भव्या मुदममन्दाम् ॥ ३७ ॥
तद्वीक्ष्य श्वासश्वशुरयुगले अपि तथा सुतवधूनाम् । केवलविभवं ते अपि मुहुर्मुहुस्तदनुमोदनया ॥ ३८ ॥
सञ्जातकर्मलाघववशेन सुविशुद्धसंयमरसेन । प्रक्षालितकर्ममले, लेभाते केवलमनन्तम् ॥ ३९ ॥ [युग्मम्]
इत्येतत् तव नृपते !, विज्ञप्तं सांप्रतं महाश्चर्यम् । भूवल्लभोऽपि तदिदं, निशम्य सम्यग् विभावयति ॥ ४० ॥
गुणसागरः स सत्यं, गुणसागर एव येन निजकार्यम् । संसाधितं क्षणेन, क्षयेण दुष्कर्मजालस्य ॥ ४१ ॥
जानन्नप्येष कथं पतितो, राज्याख्यकूटयन्त्रेऽस्मिन् । गुरुजनदाक्षिण्यवशा–दुदास्तिमानात्मकार्येऽपि ॥ ४२॥
तदहं कदा प्रपत्स्ये भवमथनीं भगवतीं महादीक्षाम् । समशत्रुमित्रवृत्तिः, कदा चरिष्याम्यनिर्बन्धः ॥ ४३ ॥
इति भावनावशात्मा क्षिप्त्वा क्षणतोऽप्यशेषकर्माणि । पृथ्वीचन्द्रमहीन्द्रः प्रपेदिवान् केवलज्ञानम् ॥ ४४ ॥
श्रुत्वैतत् तच्चरितं षोडश पृथ्वीपतेः प्रिया अपि ताः । संवेगरङ्गसङ्गतमनसोऽवापुः परं ज्ञानम् ॥ ४५ ॥
हरिसिंहोऽपि महीभृत्, पद्मावत्या समन्वितोऽपि तदा । केवलिवचसा कृतकर्म–निर्जयः केवलमवापत् ॥ ४६ ॥
अथ सुधनसार्थवाहो, व्यजिज्ञपत् तं तदा महर्षीन्द्रम् । पृथ्वीचन्द्र भगवंस्तव गुणसागरमहर्षेश्च ॥ ४७ ॥
सोदरयोरिव साम्यं साम्यनिधे ! दृश्यते कथमिहेदृक् ? । केवल्यजलपदभवं कुसुमायुध इत्यहं पूर्वम् ॥ ४८ ॥

आसीद् गुणमणिसिन्धुर्बन्धुर्मे कुसुमकेतुरिति नाम्ना । स च गुणसागर इत्ययमभूद् यथार्थाभिधस्तत्र ॥ ४९ ॥
तदखिलमिहेति हेतोर्मम तस्य च दृश्यमस्ति सादृश्यम् । श्रुत्वेति साधुमधुनोऽप्युधुनोत् सुधनो वचः स्वशिरः ॥ ५० ॥
संप्राप्तपरमबोधः सोऽधःकृतदुष्कृतोऽथ गृहिधर्मम् । प्रतिपद्य हृद्यमभवदत्रामुत्रापि शर्मपदम् ॥ ५१ ॥
अनेकलक्षाण्यब्दानां कैवल्यं प्रतिपाल्य ते । पृथ्वीचन्द्रादयः सर्वे शिवश्रियमशिश्रयन् ॥ ५२ ॥

इति श्रीमुद्रित-पृथ्वीचन्द्रचरितादुद्धृता एकादशभवगता पृथ्वीचन्द्रकथा संपूर्णा.

४८ देवकीषट्पुत्रकथा

श्री वसुदेव-देवक्योः, कंसेनोपयमोत्सवः । सुहृद्-भगिन्योः स्नेहेन, प्रारब्धो मथुरापुरि ॥ १ ॥
तत्र कंसानुजः कंस-सद्माऽऽगादतिमुक्तकः । विहरन् पारणाहेतोः, पूर्वोपात्तव्रतो व्रती ॥ २ ॥
जरासन्धसुता जीव-यशा कंसप्रियाऽऽह तम् । साधो ! साधूत्सवाहेऽस्मिंस्त्वमागा देवरोऽसि मे ॥ ३ ॥
एहि सार्द्धं मया नृत्य, हस गाय पिबाऽऽसवम् । लगित्वोन्मत्तया कण्ठे, सोऽकदर्थि गृहस्थवत् ॥ ४ ॥
स मुनिर्ज्ञानवानूचे, मुग्धे ! माद्यसि किं मुधा ? । देवक्याः सप्तमाद् गर्भात्, पति-पित्रोस्तव क्षयः ॥ ५ ॥
वज्रपातमिवासह्यं, तत् श्रुत्वा कंसपत्न्यसौ । द्विधोत्तीर्णमदावस्था-ऽवस्थां पत्ये शशंस ताम् ॥ ६ ॥
कंसः साशङ्क आचख्यौ, प्रिये ! प्रकृतिभाषिणाम् । अपि मोघीभवेद् वज्रं, महर्षीणां वचो न च ॥ ७ ॥
परं वाच्यं न कस्यापि, यतिष्ये यावदस्मि न । अस्मिन् कार्ये यतो मन्त्रः, षट्कर्णो भिद्यते बहिः ॥ ८ ॥

इत्युक्त्वा मदिरावस्थां, नाटयन् निर्मदोऽपि सः । वसुदेवान्तिकं दूराद्, रचिताञ्जलिरागमत् ॥ ९ ॥
अभ्युत्थाय जगादैनं, वसुदेवः ससम्भ्रमम् । प्राणप्रियसुहृत् ! किञ्चिद्, वक्तुकाम इवेक्ष्यसे ॥ १० ॥
ब्रूहि यच्छामि किं तुभ्यं ?, ततः कंसोऽब्रवीत् प्रिय ! । कृतार्थोऽहं कृतो जीव–यशादापनतः पुरा ॥ ११ ॥
इदानीं देवकीजात–मात्रसप्तार्भकार्पणात् । कृतार्थयेति तेनोक्ते, प्रपेदे शौरिरप्यृजुः [प्यदः] ॥ १२ ॥
भावानभिज्ञा कंसस्य, देवक्यपि जगाद भोः ! । किं कथ्यं मेऽत्र पुत्राणा–मन्तरं त्वद्–दशार्हयोः ? ॥ १३ ॥
विधिना विधिनेवात्राऽऽवयोर्योगस्त्वया कृतः । सर्वकार्याधिकारी त्वं, किं ब्रूषेऽनधिकारिवत् ? ॥ १४ ॥
किं देवकि ! बहूक्तेना–ऽऽयत्ता गर्भास्तवास्य ते । सप्तेत्युक्ते दशार्हेण, पत्न्यपि प्रत्यपद्यत ॥ १५ ॥
महाप्रसाद इत्युक्त्वा, कंसः क्षीवा(बा)पदेशतः । दशार्हेण समं पीत्वा, सुरां स्वाश्रयमाश्रयत् ॥ १६ ॥
वाक्शूरः शौरिरश्रौपीदा–पँ वाक्यं दुरायति । दम्भिना च्छलितोऽस्मीति, सुतरां चान्वतप्यत ॥ १७ ॥
इतश्च भद्दिलपुरे, श्रेष्ठी नागाह्वयोऽभवत् । सुलसाऽनलसा धर्मे, तत्पत्नी तौ महाऽऽस्तिकौ ॥ १८ ॥
शैशवे सुलसाश्राद्धया आचख्यावतिमुक्तकः । चारणर्षिरसौ बाला, भवित्री निन्दुरेव यत् ॥ १९ ॥
तपसाऽऽराधितो नैगमेष्याख्यः परिणीतया । तया पुत्रार्थमित्यूचे, तां ज्ञात्वाऽवधिना सुरः ॥ २० ॥
अहं धार्मिके(कि) ! देवक्या, गर्भान् कंसेन याचितान् । मार्यमाणान् परावृत्य, निन्दोर्दास्यामि तांस्तव ॥२१ ॥
इत्युक्त्वा पुष्पवत्यौ ते, देवकी–सुलसे समम् । स्वशक्त्या स सुरश्चक्रे, गुर्विण्यौ च तथा समम् ॥ २२ ॥
सुषुवाते समं दिव्य–प्रभावादमरः पुनः । सुलसायै ददौ गर्भान्, देवक्याः षडपि क्रमात् ॥ २३ ॥

देवक्यै सौलसान् (सुलासा-) गर्भान्, मृतानर्पितवान् सुरः। द्दषद्यास्फालयत् कंसो, निस्तृंशो(शैः) भिन्नवस्त्रवत् ॥२४॥
षडेवं देवकीगर्भाः, सुलसाया गृहे सुखम् । तस्या एव ववृधिरे, स्तनन्धयाः स्तनन्धयाः ॥ २५ ॥
नाम्नाऽनीकयशोऽनन्तसेनावजितसेनकः । निहतारिर्देवयशाः, शत्रुसेनश्च ते त्वमी ॥ २६ ॥
क्रमादुद्यौवनाः कन्याः पितृभ्यां परिणायिताः । द्वात्रिंशतं ते प्रत्येकं, भोगान् बुभुजिरे चिरम् ॥ २७ ॥
इतश्च पावयन् पादैः, श्रीनेमिरवनीतलम् । ईयिवान् भद्दिलपुरं, सेव्यस्त्रिदशकोटिभिः ॥ २८ ॥
श्रुत्वाऽन्ते तेऽर्हतो धर्मं, जगृहुः षडपि व्रतम् । तपस्यन्तस्तपस्तीव्रं विजह्रुरर्हता समम् ॥ २९ ॥
विहरन् नेमिनाथोऽथ, द्वारकां पुनराययौ । तस्थौ सहस्राम्रवणोपवने देवसंस्कृते ॥ ३० ॥
षडपि भ्रातरः षष्ठपारणकं(क) चिकीर्षवः । त्रिधा युगलिनो भूत्वा, विविशुर्द्वारिकां पुरीम् ॥ ३१ ॥
आद्येऽनीकयशोऽनन्तसेनौ युगलके मुनी । आयातौ देवकीसद्म, तौ दृष्ट्वा साऽत्यमोदत ॥ ३२ ॥
प्रत्यलाभयदेतौ सा, मोदकैः सिंहकेसरैः। जग्मतुस्तौ ततश्चान्यौ, भ्रातरावागतौ मुनी ॥ ३३ ॥
अजितसेन—निहताख्यावपि च प्रतिलाभितौ । पुनर्मुमुक्षोस्तादृक्षं, तृतीयं युग्ममागतम् ॥ ३४ ॥
देवयशः—शत्रुसेनाभिधं पप्रच्छ देवकी । दिङ्मोहो भगवान् ! किं वो, यत् त एवाऽऽगताः पुनः ॥ ३५ ॥
किमेत एवेति मतिभ्रमो यूयं परे पुनः ? पुर्यां वा स्वर्गकल्पायां, भैक्ष्यं नार्पिभिराप्यते ॥ ३६ ॥
ऊचतुस्तौ न दिङ्मोहः (दिङ्मोह न), किन्तु षट् सोदरा वयम् । सुलसा—नागयोः पुत्रा, भद्दिलद्रङ्गवासिनोः ॥३७॥
प्राव्रजामो वयं धर्मं, श्रुत्वाऽन्ते नेमिनो हि षट् । भवद्गृहे त्रियुग्मेन, पारणार्थमिताः पृथक् ॥ ३८ ॥

देवक्यचिन्तयत् साम्यं, कृष्णस्यैष्वीक्ष्य(वेक्ष्य)ते कियत् । तिलस्यापि तिला नैवं, तत्किं नामी ममाऽऽत्मजाः? ॥३९॥
जीवदृष्टसुताऽऽख्याता, पुरा(रो)ऽतिमुक्तसाधुना । साऽधुना मे मनोभ्रान्तिरेषु पृच्छामि तद् विभुम् ॥ ४० ॥
ततः प्रातर्द्वितीयेऽह्नि, सन्देहापोहहेतवे । ननाम नेमिनं गत्वा, देवकी धर्मसद्मगम् ॥ ४१ ॥
तद्भावं भगवान् जानन्नूचे देवक्यमी सुताः । तवेति सुलसाया(यै) ये, प्राग् दत्ता नैगमेषिणा ॥ ४२ ॥
देवकी तान् षडप्यृषीन्, पश्यन्त्युत्प्रस्रव(त्प्रक्षर)स्तनी । ववन्दे चाऽऽह जीवन्तो, दिष्ट्या दृष्टाः स्वसूनवः ॥ ४३ ॥
राज्यं वा व्रतसाम्राज्यं, प्राज्यं मत्कुक्षिजन्मनाम् । मुदेऽदः किन्तु खेदाय, स्वयं(मया)नैकोऽपि लालितः ॥ ४४ ॥
प्रभुरप्यभ्यधादेवं, मुधा मा ताम्य (ताम्यसि) देवकि ! । स्वार्जितं भुज्यते कर्म, न परः कोऽपि कारणम् ॥ ४५ ॥
अहार्षीः सप्त रत्नानि, सपत्न्यास्त्वं(स्व) पुरा भवे । रुदन्त्या अर्पितं चैकं, तस्येदं कर्मणः फलम् ॥ ४६ ॥
प्राग्जन्मकर्म निन्दन्ती, नत्वेशं गृहमागता । दुस्थावस्थेव सा तस्थौ, पुत्रलालनलालसा ॥ ४७ ॥
विमना दृश्यसे मातः !, किमित्युक्ताऽच्युतेन सा । ऊचे किं जीवितव्येन ?, ममान्तर्गडुनाऽमुना ॥ ४८ ॥
वर्द्धितोनन्दगेहे त्वं, नागागारे(नागगेहे)तवाग्रजाः । पालितं न मयाऽपत्यं, किमपीवान्यपुष्ट्या ॥ ४९ ॥
तद् वत्स ! वत्सकं स्वी(स्वं)यं, धन्या गौरपि [प्रति] पालयेत् । दूयेऽहं नितरामात्मापत्यलालनबालिशा ॥ ५० ॥
पूरयाम्यम्ब ! ते वाञ्छामित्युक्त्वाऽगाद् गृहं हरिः । हरिराराधयामास, सोनान्यं नैगमेषिणम् ॥ ५१ ॥
सन्तुष्टः स्पष्टमाचष्टा–ष्टमो भ्राता हरे ! तव । भावी परं स तारुण्य, एवाऽऽशु प्रव्रजिष्यति ॥ ५२ ॥

तद्वचोऽनन्तरं कश्चित्, स्वर्गात् च्युत्वा सुरोत्तमः । उत्पेदे देवकीकुक्षौ, शुक्त्यामिव सुमौक्तिकम् ॥ ५३ ॥
क्रमाद् जज्ञेऽङ्गजो गज–सुकुमालाऽह्वयोऽद्भुतः । लालयन्ती स्वयं कृष्ण–कल्पं तं मुमुदे प्रसूः ॥ ५४ ॥
पित्रोर्नेत्रोत्सवो भ्रातृ–प्रीतिपात्रमसौ क्रमात् । उद्यौवन उपयेमे, द्रुमपुत्रीं प्रभावतीम् ॥ ५५ ॥
क्षत्रियाणीभवां सोमां, सोमशर्मद्विजात्मजाम् । मातृ–भ्रात्रुपरोधेनानिच्छन् गज उपायत ॥ ५६ ॥
तदैव समवासार्षीत्, श्रीनेमिस्तदुपान्तिके । धर्मं गजसुकुमालः, सभार्यो विधिना(ऽवहितो)ऽशृणोत् ॥ ५७ ॥
आमन्त्र्य माता–पित्रादि–वर्गं वैराग्यरङ्ग(ङ्गि)तः । गजः सभार्यः प्राव्राजीद्, वृजिनव्रजवर्जितः ॥ ५८ ॥
ततो रुरुदुरत्यन्तं, तद्वियोगासहिष्णवः । पितरौ भ्रातरो ज्येष्ठा, गजे प्रव्रजिते सति ॥ ५९ ॥
सायं पृष्ट्वा प्रभुं तस्थौ, गजः प्रतिमया निशि । स्मशानभूमौ दृष्टश्च, ब्रह्मणा सोमशर्मणा ॥ ६० ॥
स दध्यौ यदि पाखण्ड–चिकीरेष दुराशयः । उपयेमे कथङ्कारं, मम पुत्रीं तपस्विनीम् ? ॥ ६१ ॥
एवं विचिन्त्य चित्याया, ज्वलदङ्गारपूरितम् । अतिष्ठिपत् घटीखण्डं(कण्ठं), स तन्मूर्द्धनि विरुद्धधीः ॥ ६२ ॥
दह्यमानोऽग्निना तेन, सहमानः परीषहम् । दग्धकर्मेन्धनोत्पन्नकेवलोऽगाद् गजः शिवम् ॥ ६३ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृता देवकीषट्पुत्रकथा संपूर्णा

४९ समभावोपरि दमदन्तराजर्षिकथा

हस्तिशीर्षपुरे राजा, दमदन्ताभिधोऽभवत् ।सेवन्ते यत्प्रतापार्त्ता, गुहां घूका इवारयः ॥ १ ॥

जज्ञे वैरं परस्परम् ॥ २ ॥

इतो गजपुरे राज्यं, कुर्वते पाण्डुसूनवः । दमदन्त—पाण्डवानां, जज्ञे वैरं परस्परम् (तस्तराम्) ॥ ३ ॥
जरासन्धस्य सेवायै, दमदन्तो गतोऽन्यदा । पाण्डवैरेत्य तद्देशो, विध्वस्तो ज्वालितो भृशम् ॥ ४ ॥
सद्माऽऽगाद् दमदन्तोऽथ, वीक्ष्य देशं विनाशितम् । सैन्यावेशेन महता, रुरोध हस्तिनापुरम् ॥ ५ ॥
पुरान्तः पाण्डवा भीत्या, विविशुर्निर्ययुर्न हि । ग्रहाणां महिमा तावद्, यावन्नोदेति भास्करः ॥ ६ ॥
ज्ञापितं दमदन्तेन, दासेरा जम्बुका इव । क्रीडिता विषये शून्ये, निर्गच्छत यदीश्वराः ॥ ७ ॥
निर्ययुः पाण्डवा नैव—मुक्तेऽपि दमदन्तराट् । प्रत्यावृत्तः स्वराज्यर्द्धिं, बुभुजे भामिनीमिव ॥ ८ ॥
निर्विण्णकाम—भोगोऽथ, प्रव्रज्याऽन्ते गुरोः क्रमात् । प्रपन्नो दमदन्तर्षिरेकाकिप्रतिमां स्थिरः(तः) ॥ ८ ॥
प्रतिमामाददेऽन्येद्युर्मुनिर्गजपुराद् बहिः । अत्रान्तरे तु यात्रार्थं, निर्ययौ राड् युधिष्ठिरः ॥ ९ ॥
मार्गे निरीक्ष्य तमृषिं, ववन्दे मुदितो नृपः । भीमाद्यैरनुजैश्चैवं, वन्दितश्च स्तुतो भृशम् (तस्तराम्) ॥ १० ॥
ततो दुर्योधनोऽप्यागात्, तस्योक्तमनुजीविभिः । स्वामिन् ! स दमदन्तोऽयं, यूयं प्राग् येन ह्रेपिताः ॥ ११ ॥
आहतो मातुलिङ्गेन, राज्ञाऽन्यैश्चानुजीविभिः । क्षिप्त्वा दृषदमेकैकं, दृषद्राशीकृतो मुनिः ॥ १२ ॥
प्रत्यावृत्तः पुनर्धर्म—पुत्रोऽपृच्छत् स्वसेवकान् । स मुनिः क्वेक्षितो यः प्राग् ?, राज्ञे ते तमदर्शयन् ॥ १३ ॥
निर्मिताऽऽशातनाऽमुष्य, महर्षेः केन पापिना ? । पृष्टे युधिष्ठिरेणेति, शशंसुस्ते सुयोधनम् ॥ १४ ॥
कृत्वेर्ष्यां धर्मपुत्रेण, बाढं दुर्योधनोपरि । निष्कास्याभ्यञ्जितः साधुस्तैलेन क्षामितस्ततः ॥ १५ ॥

निर्विशेषमनोवृत्तिधर्मपुत्रे सुयोधने । भगवान् दमदन्तर्षिर्विजहार वसुन्धराम् ॥ १६ ॥

इति श्रीमुद्रित--ऋषिमण्डलप्रकरणवृत्तित उद्धृता समभावोपरि दमदन्तमहर्षिकथा सम्पूर्णा.

५० श्री केशीगौतमीय प्रबन्धः

प्रतापतपनोऽत्यन्तं, तपत्यद्यापि यत्प्रभोः । दोषाकरोदयध्वंसी, स श्रीपार्श्वः श्रियेऽस्तु वः ॥ १ ॥
तस्य शिष्यशिरोरत्नं, केशिनामा महामुनिः । अवधिज्ञानवान् ग्रामानुग्रामं विहरन्नगात् ॥ २ ॥
पुर्यां श्रावस्त्यामन्येद्युर्वृद्धः शिष्यपरीवृतः । शुद्धोर्व्यां समवासार्षीत्, चोद्याने तिन्दुकाभिधे ॥ ३ ॥ युग्मम्
इतश्च धर्मतीर्थस्य, कर्त्ता हर्त्ताऽखिलापदाम् । भगवान् वर्द्धमानोऽभूद्, जगन्नेत्रसुधाञ्जनम् ॥ ४ ॥
शिष्यमुख्योऽभवत् तस्य, गौतमो द्वादशाङ्गवित् । शिष्यसङ्घसमाकीर्णः, श्रावस्त्यां सोऽप्यथागमत् ॥ ५ ॥
उद्याने समवसृतः, कोष्ठके प्रासुकावनौ । द्वयोर्गणभृतोर्दैवादेवं तत्राऽऽगमोऽभवत् ॥ ६ ॥
तयोर्गोचरचर्यायां, शिष्याणां भ्रमतां द्वयोः । वीक्ष्यान्योन्यमियं चिन्ता, चेतस्याविरभूत् तदा ॥ ७ ॥
कीदृग् धर्मोऽयमस्माकं ' तेषां वा कीदृशस्त्वयम् ? आचारधर्मप्रणीधिरयं वा स नु(तु) कीदृशः ॥ ८ ॥
चातुर्यामश्च यो धर्मो, यश्चायं पञ्चशिक्षितः । देशितो वर्द्धमानेन, पार्श्वेन च महार्हता ॥ ९ ॥
अचेलकश्च यो धर्मो, यश्चायं सान्तरोत्तरः । कार्यमेकं प्रपन्नानां, विशेषे किं नु कारणम् ? ॥ १० ॥
अथ तौ तत्र शिष्याणां, विज्ञाय प्र(-याथ)वितर्कितम् । समागमे कृतमती, अभूतां केशि—गौतमौ ॥ ११ ॥

गौतमः प्रतिरूपज्ञः, शिष्यसम्पत्समन्वितः । कुलज्येष्ठतया केशि-संश्रितं शिश्रिये वनम् ॥ १२ ॥
कुमारश्रमणः केशिर्वीक्ष्य गौतममागतम् । प्रतिरूपां प्रतिपत्तिं, सम्यक् सम्प्रतिपद्यते ॥ १३ ॥
पलालं प्रासुकं शुष्कमदभ्रदर्भगर्भितम् । गौतमस्य निपद्यायै, क्षिप्रमर्पयति स्म सः ॥ १४ ॥
केशिः कुमारश्रमणो, गौतमश्च महायशाः । उभौ निषण्णौ शोभाते, चन्द्र-सूर्यसमश्रियौ ॥ १५ ॥
ईयुः पाखण्डिनस्तत्र, बहवः कौतुकार्थिनः । गृहस्थानामनेकाश्च, साहस्र्यः सहसाऽऽययुः ॥ १६ ॥
देव--दानव--गन्धर्व-यक्ष-किन्नर-रक्षसाम् । अदृश्यानां च भूतानामासीत् तत्र समागमः ॥ १७ ॥
पृच्छामि त्वां महाभाग !, केशिर्गौतममब्रवीत् । एवं तेनर्षिणा प्रोक्ते, गौतमोऽप्यब्रवीददः ॥ १८ ॥
यथेच्छं पृच्छ भोः स्वच्छ ! गौतमः केशिमब्रवीत् । एवं केशिरनुज्ञातः, पप्रच्छेदं च गौतमम् ॥ १९ ॥
च(चा) तुर्यामश्च यो धर्मो, यश्चायं पञ्चशिक्षितः । देशितो वर्द्धमानेन पार्श्वनाथेन चार्हता ॥ २० ॥
कार्यमेकं प्रपन्नानां, विशेषे किं नु कारणम् ? । मेधाविन् ! द्विविधे धर्मे, कथं विप्रत्ययो न ते ? ॥ २१ ॥
केशिमेवं ब्रुवाणं तु, तं चेदं प्राह गौतमः । प्रज्ञा समीक्षते धर्मतत्त्वं तत्त्वविनिश्चयम् ॥ २२ ॥
पूर्वर्षयस्त्वृजु-जडा, वक्र-जडाश्च, पश्चिमाः । मध्यमास्तु ऋजु-प्र(प्रा)ज्ञास्तेन धर्मो द्विधा कृतः ॥ २३ ॥
पूर्वर्षीणां दुर्विशोध्योऽन्त्यानां दुरनुपालकः । कल्पो मध्यमकानां तु, सुविशोध्यः सुपालकः ॥ २४ ॥
इत्युक्ते गौतमेनाऽऽख्यत्, केशिः छिन्नो भदन्त ! मे । संशयोऽन्यमपि ब्रूहि, तं महाप्राज्ञ ! गौतम ! ॥ २५ ॥
अचेलकश्च यो धर्मो, यश्चायं सान्तरोत्तरः । देशितो वर्द्धमानेन, पार्श्वेन च महात्मना ॥ २६ ॥

कार्यमेकं प्रपन्नानां, विशेषे किं नु कारणम् ? । मेधाविन् ! द्विविधे लिङ्गे, कथं विप्रत्ययो न ते ? ॥ २७ ॥
ब्रुवाणमेवं तं केशिमुवाचेदं च गौतमः । विज्ञानेन समागम्य(त्य), तदिष्टं धर्मसाधनम् ॥ २८ ॥
प्रत्ययार्थं च लोकानां नानाविधविकल्पनम् । यात्रार्थं ग्रहणार्थं च, लोके लिङ्गप्रयोजनम् ॥ २९ ॥
इत्युक्ते गौतमेनाऽऽख्यत्, केशिः छिन्नो भदन्त ! मे । संशयोऽन्यमपि ब्रूहि, तं महाप्राज्ञ ! गौतम ! ॥ ३० ॥
बहुशत्रुसहस्राणां, मध्ये तिष्ठसि गौतम !, जेतुं त्वां तेऽभिगच्छन्ति, कथं ते निर्जितास्त्वया ? ॥ ३१ ॥
पञ्चैकस्मिन् जिते शत्रौ, जितास्ते(स्तैः) पञ्चभिर्दश । दशप्रकारांस्तान् जित्वा, सर्वशत्रून् जयाम्यहम् ॥ ३२ ॥
केऽन्योक्ताः शत्रवश्चेति, केशिर्गौतम-मब्रवीत् । केशिना पृष्ट इत्याख्यद्, गौतमोऽपीदमुत्तरम् ॥ ३३ ॥
एक आत्माऽजितः शत्रुः, कषाया इन्द्रियाणि च । तान् जित्वाऽहं यथान्यायं, विहरामि महामुने ! ॥ ३४ ॥
इत्युक्ते गौतमेनाऽऽख्यत्, केशिः छिन्नो भदन्त ! मे । संशयोऽयं(ह्य) परमपि, तं ब्रूहि प्राज्ञ ! गौतम ! ॥३५॥
दृश्यन्ते बहवो लोके, पाशबद्धाः शरीरिणः । मुक्तपाशो लघू(घु)भूतः, कथं विहरसे मुने ! ? ॥ ३६ ॥
छित्वा सर्वांश्च तान् पाशा-नुपयातो निहत्य तान् । मुक्तपाशो लघू(घु)भूतो, विहरामि यथासुखम् ॥ ३७ ॥
पाशा अत्र च के उक्ताः ?, केशिर्गौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमाख्यत ॥ ३८ ॥
राग-द्वेषादयस्तीव्राः, स्नेहपाशा भयङ्कराः । तान् छित्वाऽहं यथान्यायं, विहरामि यथाक्रमम् ॥ ३९ ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । तमन्यमपि मत्सत्कं, संशयं वद गौतम ! ॥ ४० ॥
अन्तर्हृदयसम्भूता, लता तिष्ठति गौतम ! । फलानि विषभक्ष्याणि, सूते सा तूद्धृता कथम् ? ॥ ४१ ॥

लतां तां सर्वतश्छित्त्वा, समुद्धृत्य समूलिकाम् । विहरामि यथान्यायं, मुक्तोऽस्मि विषभक्षणात् ॥ ४२ ॥
का लतेह पुनः प्रोक्ता ?, केशिर्गौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमब्रवीत् ॥ ४३ ॥
भवतृष्णा लता प्रोक्ता, भीमा भीमफलोदया । तामुद्धृत्य यथान्यायं, विचरामि यथासुखम् ॥ ४४ ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । तमन्यमपि मत्सत्कं, संशयं वद गौतम ! ॥ ४५ ॥
सम्यक् प्रज्वलिता घोरास्तिष्ठन्ति गौतमाग्नयः । ये दहन्ति शरीरस्थाः, कथं विध्यापितास्त्वया ? ॥ ४६ ॥
स्रोतसो गुरुमेघोत्थाद्, गृहीत्वा जलमुत्तमम् । सिञ्चामि सततं तांस्तु, सिक्तास्ते न दहन्ति माम् ॥ ४७ ॥
अग्नयश्चेह के प्रोक्ताः ?, केशिर्गौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमब्रवीत् ॥ ४८ ॥
कषाया अग्नयः प्रोक्ताः, श्रुत–शील–तपोजलम् । श्रुतधाराभिहताः सन्तो, भिन्नास्ते न दहन्ति माम् ॥ ४९ ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । तमन्यमपि मत्सत्कं, संशयं:वद गौतम ! ॥ ५० ॥
अयं साहसिको भीमो, दुष्टाश्वः परिधावति । यस्मिंश्च गौतमाऽऽरूढस्त्वं नापह्रियसे कथम् ? ॥ ५१ ॥
प्रधावन्तं निगृह्णामि, श्रुतरश्मिसमाहितम् । न गच्छति ममोन्मार्गं, मार्गं च प्रतिपद्यते ॥ ५२ ॥
कश्चाश्वः पुनरत्रोक्तः ?, केशिर्गौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमब्रवीत् ॥ ५३ ॥
मनः साहसिको भीमो, दुष्टाश्वः परिधावति । तं निगृह्णाम्यहं सम्यक्, कविका[कन्थकं]धर्मशिक्षया ॥ ५४ ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । तमन्यमपि मत्सत्कं, संशयं वद गौतम ! ॥ ५५ ॥
कुपथा बहवो लोके, येभ्यो नश्यन्ति जन्तवः । वर्त्तमानोऽध्वनि कथं, त्वं न नश्यसि गौतम ! ? ॥ ५६ ॥

ये च मार्गेण गच्छन्ति, कुमार्गे प्रस्थिताश्च ये । विदिता मम ते सर्वे, तन्न नश्याम्यहं मुने ॥ ५७ ॥
इह मार्गश्च कः प्रोक्तः ?, केशिगौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमब्रवीत् ॥ ५८ ॥
पाखण्डिनोऽलीकवाचः, सर्वेऽप्युन्मार्गगामिनः । सन्मार्गस्तु जिनाख्यात, एप मार्गो ह्यनुत्तरः ५९ ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । तमन्यमपि मत्सत्कं, संशयं वद गौतम ! ॥ ६० ॥
प्राणिनां वाह्यमानानां, महावेगेन वारिणा[णः] । शरणं गतिं प्रतिष्ठां द्वीपं, कं [किं] मन्यसे मुने ! ? ॥ ६१ ॥
अस्ति चैको महाद्वीपो, वारिमध्ये महालयः । महावेगस्य पयसो, गतिस्तत्र न विद्यते ॥ ६२ ॥
इह द्वीपश्च कः प्रोक्तः ?, केशिगौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमब्रवीत् ॥ ६३ ॥
प्राणिनां वाह्यमानानां, जरा—मरणवेगतः । धर्मो द्वीपः प्रतिष्ठा च, गतिः शरणमुत्तमम् ॥ ६४ ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । तमन्यमपि मत्सत्कं, संशयं वद गौतम ! ॥ ६५ ॥
बृहत्प्रवाहे पाथोधौ, बेडा विपरिधावति । यस्यां त्वं गौतमाऽऽरूढः, कथं पारं गमिष्यसि ? ॥ ६६ ॥
आश्राविणी तु नौर्यत्र, न सा पारस्य गामिनी । या निराश्राविणी नौर्भोः ! सा पुनः पारगामिनी ॥ ६७ ॥
का प्रोक्ता नौरिह मुने ! ?, केशिगौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमब्रवीत् ॥ ६८ ॥
शरीरं नौरिति प्राहुर्नाविको जीव उच्यते । संसारो वारिधिः प्रोक्तो, यं तरन्ति महर्षयः ॥ ६९ ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । तमन्यमपि मत्सत्कं संशयं वद गौतम ! ॥ ७० ॥
अन्धकारे महारौद्रे, तिष्ठन्ति बहवोऽङ्गिनः । प्राणिनां सर्वलोकेऽस्मिन्नुद्योतं कः करिष्यति ? ॥ ७१ ॥

उद्गतो विमलो भानुः, सर्वलोकप्रभाकरः । प्राणिनां सर्वलोकेऽस्मिन्नुद्योतं स करिष्यति ॥ ७२ ॥
भानुश्च क इह प्रोक्तः ?, केशिर्गौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमब्रवीत् ॥ ७३ ॥
उद्गतः क्षीणसंसारः, सर्वज्ञो जिनभास्करः । प्राणिनां सर्वलोकेऽस्मिन्नुद्योतं स करिष्यति ॥ ७४ ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । तमन्यमपि मत्सत्कं, संशयं वद गौतम ! ॥ ७५ ॥
प्राणिनां बाध्यमानानां, दुःखैः शारीर-मानसैः । क्षेमं शिवमनाबाधं, स्थानं किं मन्यसे मुने ! ? ॥ ७६ ॥
लोकाग्रेऽस्ति दुरारोहं, स्थानमेकं ध्रुवं ध्रुवम् । यत्र नास्ति जरा-मृत्युर्व्याधयो वेदनास्तथा ॥ ७७ ॥
स्थानमत्र किमुक्तं भोः ?, केशिर्गौतममब्रवीत् । केशिमेवं ब्रुवाणं तु, गौतमोऽपीदमब्रवीत् ॥ ७८ ॥
निर्वाणमित्यनाबाधं सिद्धिर्लोकाग्रमेव च । क्षेमं शिवमनाबाधं, यच्चरन्ति महर्षयः ॥ ७९ ॥
लोकाग्रेऽस्मिन् दुरारोहं, तत् स्थानं शाश्वताश्रयम् । यत् सम्प्राप्ता न शोचन्ति, भवौघान्तकरर्षयः ॥ ८० ॥
साधु गौतम ! ते प्रज्ञा, छिन्नोऽयं संशयो मम । नमस्ते संशयातीत !, सर्वसूत्रमहोदधे ! ॥ ८१ ॥
एवं तु संशये छिन्ने, केशिर्घोरपराक्रमः । कृताञ्जलिपुटो नत्वा, गौतमं गणभृद्वरम् ॥ ८२ ॥
पञ्चमहाव्रत(तं) धर्मं भावतः प्रति(त्य)पद्यते(त) । पूर्वार्हतो मते मार्गे, तत्रासौ पश्चिमार्हतः ॥ ८३ ॥ युग्मम्
केशि-गौतमयोर्नित्यं, तस्मिन्नासीत् समागमे । श्रुत-शीलसमुत्कर्षौ, महार्थार्थविनिश्चयः ॥ ८४ ॥
तोषिता परिषत् सर्वा, सन्मार्गे समुपस्थिता । प्रसीदतां भगवन्तौ, संस्तुतौ केशि-गौतमौ ॥ ८५ ॥

इत्युत्तराध्ययनानुसारात् केशिगुरोरयम् । सम्बन्धो दर्शितोऽस्माभिर्भव्यानां भविकेन्दु(न्दु)भिः ॥८६॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृत केशीगौतमीय प्रबन्धः सम्पूर्णः.

५१ श्रीवीरप्रभुपूर्वमातृपितृसम्बन्धः

अन्येद्युर्भगवान् वीरो, विहरन् समवासरत् । ब्राह्मणकुण्डग्रामस्य बहुशालाभिधे वने ॥ १ ॥
देवाः समवसरणं, चक्रिरे पर्षदाययौ । देवानन्दर्षभदत्तावीयतुर्दम्पती च तौ ॥ २ ॥
प्रभुं नत्वर्षभदत्तो, यथास्थानमुपाविशत् । देवनन्दाऽप्युदानन्दा, पृष्ठस्थाऽस्थात् निजेशितुः ॥ ३ ॥
स्तनाभ्यां प्रक्षरत्स्तन्यां, देवीवानिमिषेक्षणा(ण)म् । पश्यन्तीं तां प्रभुं वीक्ष्य, गौतमोऽपृच्छदुत्सुकः ॥ ४ ॥
जगच्चकोरशीतांशो(शो!), त्वयि सर्वोऽपि सादरः । ब्राह्मणीयं विशेषेण, किमिति ब्रूहि कारणम् ? ॥ ५ ॥
गौतमं गौतमगुरु–रूचे भ्रशीत्यहान्यहम् । कुक्षावमुष्या उषितः, स्नेहोऽस्यास्तन्महान् मयि ॥ ६ ॥
तत् श्रुत्वा दम्पती हृष्टौ, चिन्तयामासतुर्हृदि । अहो ! क्व पितरावावां ?, क्वायं सूनुर्जगत्पिता ? ॥ ७ ॥
उत्थाय नेमतुर्वीरं, पितरौ हर्षनिर्भरौ । तौ ह्यत्र दुष्प्रतीकारौ, चक्रेऽर्हन्निति देशनाम् ॥ ८ ॥
असारसंसृतावत्र, पिताऽयं सूनुरेप वा । घटते विघटते च, सम्बन्धो बहुशोऽङ्गिनाम् ॥ ९ ॥
तद् वस्तु वस्तुतो युक्ति–युक्तं नात्रावभासते । विना दीक्षां तदुच्छित्तिः, सर्वथा नहि जायते ॥ १० ॥
तत् श्रुत्वा तौ पुनर्नत्वा, श्रीवीरमिदमूचतुः । निस्तारय भवादावां, दीक्षातर्याऽधुना विभो ! ॥ ११ ॥

एवमस्त्वर्हता प्रोक्ते, तौ गत्वेशानकूणके । पञ्चमुष्टिकचोत्पाटं, कृत्वा त्यक्त्वा त्वलङ्कृतीः ॥ १२ ॥
पुनर्नत्वोचतुर्नाथं, जन्म–मृत्यु–जराऽऽकुलात् । भवान्निस्तारय स्वामिन् !, दीक्षितौ तौ ततोऽर्हता ॥ १३ ॥ [युग्म
देवानन्दा चन्दनार्यै, स्थविरेभ्यस्तथर्षभम् । शिक्षाद्वैविध्यसिद्ध्यर्थं, ददौ दीक्षागुरुर्जयोः ॥ १४ ॥
पठित्वैकादशाङ्गानि, पालिताखण्डितव्रतौ । देवानन्दर्षभदत्तौ, जग्मतुः पदमव्ययम् ॥ १५ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृत श्री वीरप्रभुपूर्वमातृपितृसम्बन्धः संपूर्णः

५२ श्री प्रत्येकबुद्धकरकण्डुराजर्षिकथा

आसीत् चम्पामहापुर्यां, पार्थिवो दधिवाहनः । चेटकस्य सुता पद्मा–वती तस्य प्रियाऽभवत् ॥ १ ॥
गजाऽऽरूढा धृतच्छत्रा, राज्ञैतद्वेषभूषणा । भ्रमामि वनमित्यस्याः, सम्पन्नो दोहदोऽन्यदा ॥ २ ॥
तदपूर्त्यां कृशाङ्गा सा, पृष्टा राज्ञाऽऽशयं जगौ । ततो राज्ञा धृतच्छत्राऽऽरूढा पद्मावती गजे ॥ ३ ॥
गतोद्यानं['ने'] तदाऽऽद्योभूत्, प्रावृट्कालोऽथ कुञ्जरः । सुगन्धमृत्तिकागन्धा–भ्याहतो वनमस्मरत् ॥ ४ ॥
काननाभिमुखं हस्ती, प्रतस्थेऽवमताङ्कुशः । शक्तोऽनुगन्तुं तं, [न] कश्चित्, न सादी न पदातिकः ॥ ५ ॥
द्राक् नीतौ करिणा तेन, दम्पती तौ महाटवीम् । ऊर्ध्वं['दूराद्'] वटतरुं, दृष्ट्वा, राज्यै राजेदमब्रवीत् ॥ ६ ॥
प्रिये ! यास्यत्यधोऽस्यैष, ग्राह्या शाखा त्वया दृढम् । राज्ञा गृहीता दक्षेण, तस्थौ राज्ञी तथैव हि ॥ ७ ॥
किंकर्त्तव्यतया मूढः, सशोकोऽगाद् गृहं नृपः । निर्मानुषाटवीं नीता, तेनेभेन नृपप्रिया ॥ ८ ॥

तृषार्त्तः प्राविशद् दन्ती, सरश्चक्रेऽम्बुखेलनम् । उत्तीर्णा शनकै राज्ञी, सरसो निर्जगाम च ॥ ९ ॥
न वेत्त्याशां भयभ्रान्ता, पश्यन्ती सर्वतो वनम् । अहो ! कर्मपरीणामो, येनाऽऽसाऽस्मीदृशीं दशाम् ॥ १० ॥
तत् किं कुर्वे ? क्व गच्छामि ?, गतिर्मे केति रोदितुम् । प्रवृत्ता परतन्त्रा सा, क्षणात् चक्रे दृढं मनः ॥ ११ ॥
दध्यौ न ज्ञायते किञ्चिद्, दुष्टश्वापदसङ्कुले । वनेऽस्मिन् भावि मे तस्माद्–प्रमत्ता भवाम्यलम् ॥ १२ ॥
क्षामिताः सर्वसत्त्वौघा(त्त्वाश्च), चतुःशरणमाश्रितम् । सागारं स्वीकृतं प्रायं, दुष्कृतं गर्हितं स्वकम् ॥ १३ ॥
कान्दिशीका दिशां(शं) काञ्चित्, ततः पञ्चनमस्कृतिम् । स्मरन्ती चलितैक्षिष्ट, तापसं सैकमग्रतः ॥ १४ ॥
गत्वाऽभिवादितो राज्ञ्या, तापसः पृष्टवानिमाम् । कुतः पुत्र्यागताऽसीहाग्र्यैपश्येव वीक्ष्यसे ॥ १५ ॥
सा स्माह यावदानीता, गजेनात्रास्मि कानने । सोऽपि चेटकसम्बन्धी, मा भैषीरिति तां जगौ ॥ १६ ॥
ऊचे च मा स्मा शोचीस्त्वमीदृश्येव भवस्थितिः । हेतुर्योग–वियोगानां, रुक्-शोकादिनिबन्धिनी ॥ १७ ॥
उक्त्वा वनफलैः प्राणा–जीविका कारिता बलात् । नीत्वा वासभुवं काञ्चित्, तामित्याह स तापसः ॥ १८ ॥
हलाकृष्टोर्वरा भद्रे !, नोचिताऽतः परं हि नः । देशो दन्तपुरस्यायं, दन्तवक्रोऽत्र पार्थिवः ॥ १९ ॥
निर्भयाऽत्राधुनागच्छ, यायाश्चम्पापुरीमनु । इत्युक्त्वा तापसः पश्चात्, निवृत्तोऽगादियं पुरम् ॥ २० ॥
पृच्छन्त्युपाश्रयं साध्व्या, गत्वा(ता) नत्वा प्रवर्त्तिनीम् । रुरोद स्थापिता प्रोच्य, तयाऽसद्यां भवस्थितिम् ॥ २१ ॥
ततः संवेगतस्तासां, मूले सा व्रतमग्रहीत् । दीक्षाऽदानभयाद् गर्भः, साध्वीनां नोदितस्तया ॥ २२ ॥
वर्द्धितेऽस्मिन् प्रवर्तिन्याः, सद्भावः कथितः स्वयम् । शासनोड्डाहरक्षार्थं, सा तया स्थापिता रहः ॥ २३ ॥

समं कम्बलरत्नेन, नाममुद्राङ्कितं सुतम्। जातमात्रं स्मशानोर्व्यां, साध्वी पद्मावती जहौ ॥ २४ ॥
ततः स्मशानपालेन, लात्वा पत्न्यै स चार्पितः। अवकर्णिक इत्याख्यां, पितरौ तस्य चक्रतुः ॥ २५ ॥
सा मातङ्ग्या समं प्रीतिं, चक्रेऽपृच्छन्नथाऽऽर्यकाः। साध्वि। क्व गर्भस्ते ? साऽऽख्यत्, मृतो जातोऽत्र उज्झितः॥२६
स क्रीडति समं बालैस्तान् स्माहास्मि नृपो नु वः। करं यच्छन्तु मे कण्डूयनलक्षणमर्भकाः ॥ २७ ॥
रूक्षकच्छूगृहीतत्वात्, करकण्डुरिति व्यधुः। तस्याऽऽख्यां बालकाः सोऽपि, संयत्यामनुरागवान् ॥ २८ ॥
साऽप्यासान् मोदकांश्चारुभिक्षां चास्मै प्रयच्छति। स्मशानं वर्द्धमानोऽसौ(स्कौ) ररक्ष पितुराज्ञया ॥ २९ ॥
कुतश्चित् कारणात् साधु--द्वयं तत्रान्यदाऽऽगतम्। ददर्श वंशजाल्यन्तर्दण्डरत्नं सुलक्षणम् ॥ ३० ॥
मुनिरेकोऽब्रवीदेनं, "यो ग्रहीष्यति पार्थिवः। स भावीति(तः] परं योग्यश्चतुरङ्गुलवर्द्धितः ॥ ३१ ॥
तत् साध्वीसूनुनाऽश्रावि, तथैकेन द्विजन्मना। सोऽग्रहीत् तं रहोऽधस्तात्, खनित्वा चतुरङ्गुलम् ॥ ३२ ॥
विलग्नः करकण्डुस्तं, दण्डो मद्भूभवो ह्ययम्। न दास्यामीति ते तौ तु, गतौ कारणिकान्तिके ॥ ३३ ॥
तैरुक्तं देहि भो बाल !, द्विजायास्मु परं भवान्। गृह्णातु सोऽवदत् कार्यं, केनाप्यन्येन मे नहि ॥ ३४ ॥
ग्रहीष्याम्येनमेवाहं, दण्डमुद्दण्डराज्यदम्। स्मित्वोचुस्ते द्विजायैको, ग्रामो देयस्ततस्त्वया ॥ ३५ ॥
आमि[मे]त्युक्तेऽथ बालेन, नापितोऽस्मै द्विजात् स तैः। बालग्रहो दुर्ग्रहो हि, ब्रुवद्भिरिति तत्पुरः ॥ ३६ ॥
द्विजास्तेन द्विजेनान्ये, प्रोक्ताहत्वाऽमुमर्भकम्। हरामो दण्डकमिति, तत्पित्रा तत् श्रुतं वचः ॥ ३७ ॥
पितृ-पुत्रास्त्रयो(स्ततो) नष्टाः, काञ्चनाख्यं पुरं ययुः। तत्रापुत्रो मृतो राजाऽमात्यैरश्वोऽधिवासितः ॥ ३८ ॥

बहिः सुप्तस्य तस्यान्ते, गत्वा दत्त्वा प्रदक्षिणाम् । स्थितोऽश्वो ददृशुः पौरास्तं सल्लक्षणमादरात् ॥ ३९ ॥
जयशब्दं व्यधुर्नन्दी–तूर्यवादनपूर्वकम् । जृम्भां कुर्वन् स उत्तस्था–वारूढो दिव्यवाजिनम् ॥ ४० ॥
प्रवेशं न ददुर्विप्रा–स्तस्य मातङ्गसूरिति । गृहीतो दण्डकस्तेनाऽऽरब्धो ज्वालितुमग्निवत् ॥ ४१ ॥
भीता विप्राः स्थिताः सर्वे, ततो धिग्जातयः कृताः । वाटधानकवास्तव्याश्च[चा]ण्डालाः करकण्डुना ॥ ४२ ॥
उक्तं च—"दधिवाहनपुत्रेण, राज्ञा नु [तु] करकण्डुना । वाटधानकवास्तव्याश्चाण्डाला ब्राह्मणीकृताः ॥४३॥"
हृत्वाऽवकर्णिकाभिख्यां, पितृभ्यां तस्य सज्जनः । चक्रे बालकृतं नाम, करकण्डुरिति स्फुटम् ॥ ४४ ॥
स समागा[ख्य]द् द्विजो मद्यं, स्वोक्तं ग्रामं नृपा[गमा]र्पय । गृहाणाभिमतं स्वस्य, वाक्शूरः पार्थिवोऽवदत् ॥४५॥
मद्गृहं देव ! चम्पायां, तदासन्नं तम[मा]र्पय । चम्पेशाय ततो लेखः प्रेषितः करकण्डुना ॥ ४६ ॥
स्वदेशे देहि मे ग्राम–मेकं यद् रोचते हि ते । पुरं वा ग्राममुख्यं वा, विषये तद् गृहाण मे ॥ ४७ ॥
दण्डस्पृष्टाहिवद् रुष्टस्तत् श्रुत्वा दधिवाहनः । मातङ्गो वेत्ति नाऽऽत्मानमाज्ञापयति यत् स माम् ॥ ४८ ॥
दूतेनेत्योक्तमस्यैतत्, चम्पा रुद्धाऽऽहवोऽभवत् । साध्वी विज्ञाय तल्लोक–क्षयो मा भूत् कृपां दधौ ॥४९॥
पृष्ट्वा प्रवर्तिनीं चम्पा[पां]पुरीमेत्य तपस्विनी । पिताऽयं वत्स ! ते पूज्य, इत्याख्यत् करकण्डवे ॥ ५० ॥
तेन तौ पितरौ पृष्टौ, ताभ्यामुक्तं यथास्थितम् । तथाऽप्यहङ्कारवशात्, पितुरन्ते न याति सः ॥ ५१ ॥
ततोऽन्तःपुरमार्याऽगात्, नम्रा दास्योऽरुदंस्तराम् । श्रुत्वाऽऽगत्य नृपो नत्वाऽपृच्छत् तं गर्भमार्यिकाम् ॥ ५२ ॥
साऽऽहैष येन ते रुद्धं, पुरं हृष्टः स निर्ययौ । मिलितौ पितृ–पुत्रौ तौ, हर्षाद्वैतात्मतां गतौ (तौ श्रीज्यङ्गजौ) ॥५३॥

शासको द्विषाम् ॥ ५४ ॥

दत्त्वा राज्यद्वयं सूनोः, प्राव्राजीद् दधिवाहनः । करकण्डुरभूदुग्र-शासनः शासको द्विषाम् ॥ ५५ ॥

स गोकुलप्रियस्तस्य, तान्यनेकानि जज्ञिरे । शरत्कालेऽन्यदाऽद्राक्षीद्, वत्समेकं नृपोऽद्भुतम् ॥५६ ॥

कुकु(कु)द्यण्डमिव श्वेत-मुच्छलत्पुच्छपिच्छलम्। स्थूल (लं)गात्रं प्रीतिपात्रं, तं वीक्ष्य मुमुदे नृपः ॥ ५७ ॥

स गोपान् प्राह मा कुर्युरस्याम्मादोहनक्रियाम् । वर्द्धमानोऽन्यधेनूनां, पायितव्यः पयः पुनः ॥ ५८ ॥

प्रतिपन्नं वचो राज्ञो, गोपैर्गोपुत्रकः पुनः । जज्ञे तीक्ष्णविषाणाग्रोऽतिस्थूलगलकम्बलः ॥ ५९॥

अर्दयन् निर्दयं(भिन्दयन्)शृङ्गैर्बलीवर्दान् विमर्दनात् । कूर्दमानोऽन्यदा राज्ञा, जातस्थामेक्षितः स तु (स्वयम्] ॥ ६० ॥

पुना राजाऽऽगतोऽद्राक्षीत्, पतितं तं जरद्द्रवम् । पङ्कड्[ङ्क]कैर्घट्टितं दीनं, हीनं चङ्क्रमणाक्षमम् ॥ ६१ ॥

गोपान् पप्रच्छ गोपालः, कुत्र रा वृषभः ? स तैः [तु] । दर्शितस्तादृशो[शं] भूयस्तं वीक्ष्येदमचिन्तयत् ॥ ६२ ॥

अहो ! भूत्वाऽयं तादृक्षोऽधुना प्राप्तो दशामिमाम् । तदस्यां संसृतौ सर्वेऽनित्या भावा धनादयः ॥ ६३ ॥

जातः प्रत्येकबुद्धोऽसौ, चित्तान्तश्चिन्तयन्निति । लोचं कृत्वाऽग्रहीद् दीक्षां, देवतादत्तलिङ्गभृत् ॥ ६४ ॥

निष्क्रम्य सिंहवृत्यैवाऽ प्रतिबद्धसमीरवत् । करकंडवाख्यराजर्षि-र्विजहार वसुन्धराम् ॥ ६५ ॥

उक्तं च—"सेयं सुजायं सुविभत्तसिंगं, जो पासिया वसभं गोट्ठमज्झे ।
रिद्धिं अरिद्धिं समुपेहियाणं, कलिंगराया वि समिक्ख धम्मं ॥ ६५ ॥

इति श्रीमुद्रित-ऋषिमण्डलवृत्तितः उद्धृता श्रीकरकण्डुराजर्षिकथा संपूर्णा.

५३ श्री द्विमुखराजर्षिकथा

अस्तीह भरतक्षेत्रे, पुरे काम्पील्यनामनि । श्रीमद्हरिकुलोद्भूतो, यथार्थः पार्थिवो जयः ॥ १ ॥
गुणमालाप्रिया तस्य, गुणमाला प्रियाऽभवत् । निनाय वासरान् राज्यं, भुञ्जानो राट् तया समम् ॥ २ ॥
दूतं स्वाकूतमन्येद्युर्नृपोऽपृच्छत् किमस्ति न । यदस्ति राज्ञामन्येषां ! सोऽवक् चित्रसभा न ते ॥ ३ ॥
ततोऽधिकारिणो राज्ञाऽऽदिष्टास्तां कारयन्तु भोः ! । तदैव तैरथाऽऽरब्धा, राज्ञां कार्यं वचोऽनुगम् ॥ ४ ॥
क्षमायां खन्यमानायां, दृष्टः पञ्चमवासरे । मुकुटः सर्वरत्नाढ्यः, प्रभाभर्त्सितभास्करः ॥ ५ ॥
शिष्टः कर्मकरै राज्ञे, तूर्यवादनपूर्वकम् । उद्धृतोऽसौ ततो भूमे--र्भूभुजा पूजिताश्च ते ॥ ६ ॥
निष्पन्नाऽभ्रंलिहा स्तोक--कालात् चित्रसभा नृपः । सुमुहूर्ते प्रविष्टोऽन्त--र्मङ्गलध्वनिपूर्वकम् ॥ ७ ॥
स दिव्यमुकुटो मूर्द्धिन, धृतः श्रीजयभूभुजा । तस्याऽऽस्यस्यात्र सङ्क्रान्त्या, द्विमुखाऽऽख्यां जनोऽतनोत् ॥८॥
तस्याऽऽसंस्तनयाः सप्त, गुणमाला ममाऽऽत्मजा । नेति चक्रेऽधृति स्त्रीणां, पुत्री प्रायोऽतिवल्लभा ॥ ९ ॥
उपयाचितकं मेने, कामयक्षस्य राड्यथ । कल्पद्रुमञ्जरीस्वप्न--सूचिताऽस्याः सुताऽभवत् ॥ १० ॥
सवर्द्धापनकं नाम, दत्तं मदनमञ्जरी । वर्द्धमानेन्दुलेखेव, साऽभूद्यौवनोन्मुखी ॥ ११ ॥
इतश्चोज्जयनीपुर्यां, प्रद्योतश्चण्डशासनः । पार्थिवो बुभुजे राज्यं, दूतोऽग्रेऽस्येदमब्रवीत् ॥ १२ ॥
देव ! दिव्यकिरीटानुभावेन द्विमुखाभिधाम् । जयो राजाऽऽप तत् श्रुत्वा, राज्ञोऽस्योपर्यभूत् स्पृहा ॥ १३ ॥

प्रद्योतः प्राहिणोद् दूतं, स्वाकूतमिव भूभुजे । सोऽप्यागत्याऽऽह ते राजन् !, किरीटं देहि मत्प्रभोः ॥ १४ ॥
मत्प्रभोरेव योग्यं तद्, युद्धसज्जो न चेद् भव । श्रुत्वेति द्विमुखोऽवोचदस्तु तद्वस्तु मे प्रियम् ॥ १५ ॥
गजोऽनलगिरिश्चाग्निभीरू रथः शिवा प्रिया । लोहजङ्घो लेखवाहो, दद्यादेतत् तव प्रभुः ॥ १६ ॥
तद्राज्यसारभुतं तद्, दूतो गत्वाऽऽह तत्समम् । सैन्याटोपेन कोपेन, प्रद्योतः प्राचलत् ततः ॥ १७ ॥
लक्षद्वयं गजेन्द्राणां, रथानामपि तद् द्वयम् । सप्तकोटयः पदातीनां, पञ्चायुतानि वाजिनाम् ॥ १८ ॥
प्रयाणैः सोऽनवच्छिन्नै–रेतावत्सेनयाऽन्वितः । तस्थौ सागरव्यूहेन, सीम्नि पञ्चालनिवृतः ॥१९॥
द्विमुखः सन्मुखं तस्य, प्रतस्थे सर्वसेनया । विस्तार्य गरुडव्यूहं, तस्थौ सीम्नि स्वनीवृतः ॥ २० ॥
लग्नमायोधनं तत्र, सैन्ययोरुभयोरपि । अजय्यो द्विमुखो राजा, तत्किरीटानुभावतः ॥ २१ ॥
भग्नं द्विमुखसैन्येन, प्रद्योतस्याखिलं बद्ध्वा । बद्ध्वा पुरान्तरानीतः, प्रद्योतो द्विमुखेन तु ॥ २२ ॥
पादयोर्निगडो दत्तो, धिक् कष्टं परतन्त्रता । पुरान्तर्भ्रमताऽनेन, दृष्टा मदनमञ्जरी ॥ २३ ॥
पञ्चबाणेन बाणेन, विद्धस्तद्दर्शनादसौ । नष्टवि(चि)त्त इव दृष्टः, पृष्टो द्विमुखभूभुजा ॥ २४ ॥
साबाध इव किं राजन् !, वीक्ष्यसे ब्रूहि कारणम् ! । निःश्वस्य दीर्घं प्रद्योतः, कथञ्चिदिदमूचिवान् ॥ २५ ॥
"मयणवसगस्स नरवर !, वाहिविघत्थस्स तह य मत्तस्य । कुवियस्य मरंतस्स य, लज्जा दूरुज्झिया होइ ॥ २६ ॥
तद् यदीच्छसि मे क्षेमं, तदा मदनमञ्जरीम् । राजन् ! देहि न चेदेवं, विशामि ज्वलितानले ॥ २७ ॥
ततस्तन्निर्णयं ज्ञात्वा, द्विमुखोऽदात् निजां कनीम् । प्रद्योतनाय सन्तो हि, प्रार्थनाभङ्गभीरवः ॥ २८ ॥

तं जामातरमाह्वय, सन्मान्य बहुभक्तिभिः । प्रजिघाय यथास्थानं स्वस्येव द्विमुखो यशः ॥ २९ ॥
राज्यं पालयतोऽन्येद्युस्तस्यागादुत्सवो हरेः । आदिष्टा नागरा राज्ञा, भोः ! कुर्वन्तु तदुत्सवम् ॥ ३० ॥
क्लृप्तध्वजपटाटोपस्तै रणत्किङ्किणीगणः । चित्रैश्च(विचित्र) चित्रितोऽनेकैरूर्ध्वीचक्रे हरिध्वजः ॥ ३१ ॥
ददुर्दानानि दातारो, जगुर्गीतानि गायनाः । वादका वाद्यामासुर्वाद्यानि मधुरस्वरम् ॥ ३२ ॥
उल्लेसुरिन्द्रजालानि, चक्रुर्नृत्यानि नर्त्तकाः । जज्ञे सप्तदिनीमेवं, पुरान्तः प्रवरोत्सवः ॥ ३३ ॥
पौर्णमास्यागता यावद्, राज्ञा विच्छर्दितो[विच्छित्तितो]ऽर्चितः । फल-प्रसून-वस्त्राद्यैरुद्यद्वाद्यपुरस्सरम् ॥ ३४ ॥
अमेध्य-मूत्रदुर्गन्धं[न्धे], निःश्रीकं पतितं ध्वजम् । मर्द्यमानं जनैः पादैस्तं वीक्ष्याचिन्तयत् नृपः ॥ ३५ ॥
अहो ! सर्वेऽप्यमी भावा, ईदृशा एव संसृतौ । धिगस्तु वस्तुतः काम-भोगांस्तान् दुःखदायिनः ॥ ३६ ॥
प्रत्येकबुद्धः शुद्धात्मा, सम्पन्नश्चिन्तयन्निति । प्राव्राजीद् देवतादत्त-लिङ्गो लोचं विधाय च ॥ ३७ ॥

इति श्रीमुद्रित-ऋषीमण्डलवृत्तितः उद्धृता श्री द्विमुखराजर्षिकथा सम्पूर्णः

५४ श्री क्षुल्लकमुनिकथा

श्रीसाकेतपुरे क्षोणीवेणीचूडामणीनिभे । राजाऽभूत् पुण्डरीकाक्षः, पुण्डरीकदलेक्षणः ॥ १ ॥
तद्भ्राता कण्डरीकाक्षो, युवराजोऽस्य पत्न्यभूत् । यशोभद्रा यशोभद्रा, सुधाकृतसुधा गिरा ॥ २ ॥
पुण्डरीको नृपोऽद्राक्षीदन्येद्युस्तां रहःस्थिताम् । अनावृताङ्गीं तन्वङ्गीं, रागग्रस्तो बभूव च ॥ ३ ॥

प्रसादनार्थमेतस्याः, प्राहिणोत् प्राभृतं नृपः । ज्येष्ठप्रसाद इत्येषा, निर्विकारा तदाददे ॥ ४ ॥
अन्येद्युः प्रार्थयामास, तां निरस्य त्रपां नृपः । यशोभद्राऽऽह तं राजन् !, न भ्रातुरपि ते त्रपा ? ॥ ५ ॥
ततोऽसौ दुरभिप्रायो, जघान भ्रातरं नृपः । प्रतस्थे सार्थसार्थेन, शीलरक्षाकृते सती ॥ ६ ॥
श्रावस्त्यां पुर्यगादजितसेनाचार्यसद्गुरोः । महत्तराकीर्त्तिमत्याः, पार्श्वे साऽशिश्रियद् व्रतम् ॥ ७ ॥
तदैवोत्पन्नगर्भाशा. व्रतानादानशङ्कया । महत्तराया नाख्याता, चारित्रोत्सुकया तया ॥ ८ ॥
वर्द्धमाने ततो गर्भे, सोपालम्भनपूर्वकम् । सा महत्तरया पृष्टा, पूर्वोत्पन्नं तमाह च ॥ ९ ॥
शासनोड्डाहरक्षार्थं, रक्षिता सा सती रहः । क्षुल्लकुमारनामानं, प्रासूत समये सुतम् ॥ १० ॥
स क्रमाद् यौवनावस्थो, दध्यौ पालयितुं व्रतम् । नैव क्षमोऽस्मि पृच्छामि, भोगार्थी मातरं निजाम् ॥ ११ ॥
मात्राऽनुशासितः सम्यक्, क्षुल्लः स्थातुमनीश्वरः । देहि मे द्वादशाब्दानि, स तया प्रार्थितो ददौ ॥ १२ ॥
ततो द्वादशवर्षान्ते, पुनः पप्रच्छ मातरम् । साऽप्याख्य[वोच]दार्यिकां पृच्छ, तदधीनाऽस्मि यत् सुत ! ॥ १३ ॥
भोगाभिलाषी याम्यस्मि, तेनापृच्छि महत्तरा । ममापि द्वादशाब्दानि, देहीति तान्यसावदात् ॥ १४ ॥
द्वादशद्वादशाब्दान्याचार्योपाध्याययोरपि । वाचैवं तस्थिवानष्टचत्वारिंशत् स वत्सरान् ॥ १५ ॥
गच्छंस्तदन्ते मात्रोक्तो, मा याहीतस्ततः सुत ! । पुण्डरीकः पितृव्यस्ते, साकेते तत्र च व्रजेः ॥ १६ ॥
नाममुद्रां पितुः सत्कां, रत्नकम्बलमद्भुतम् । तस्मै ददौ यशोभद्रा, पुत्रप्रेम्णाऽऽर्यिका तदा ॥ १७ ॥
… द्वयं सोऽपि, पितृव्यपुरमागमत् । स्थितस्तदुद्यानशालायां, प्रातर्द्रक्ष्यामि पार्थिवम् ॥ १८ ॥

तदाऽभ्यन्तरपर्षद्यासीत् नाट्यं नाटिकाकृतम् । नटी पश्चिमयामिन्यामीपन्निद्रार्दिताऽभवत् ॥ १९ ॥
निद्रायमाणां तां वीक्ष्य, दध्यौ धैारिकिनी हृदि । तोषिता परिषत् सर्वा, लब्धं बहुतरं धनम् ॥ २० ॥
निद्रातीयं यदीदानीं, भवामो धर्षिता इति । सा सुष्ठु गीतमित्यादि गीतिकामुच्चकैर्जगौ ॥ २१ ॥
तद्यथा—"सुट्ठु गाइयं सुट्ठु वाइयं सुट्ठु णच्चियं सामसुंदरी ! ।
अणुपालिय दीहराइ[ति]या उ सुमिणंतए मा पमायए ॥ १ ॥"
अत्रान्तरेऽर्पितः क्षुल्ल–साधुना रत्नकम्बलः । कुण्डलं युवराजेन, यशोभद्रेण चार्पितम् ॥ २२ ॥
कटको मन्त्रिणाऽदायि, नर्त्तक्यै यतिसन्धिना । हारः श्रीकान्तया सार्थवाह–पत्न्याऽर्पितोऽद्भुतः ॥ २३ ॥
वितीर्णः कर्णपालेन, महामात्रेण चाङ्कुशः । पञ्चकं कम्बलाद्येतत्, लक्षमूल्यं पृथक् पृथक् ॥ २४ ॥
लिख्यते वहिकायां यस्तत्र तुष्यति रुष्यति । स्याद् दानादानयोर्ज्ञानेऽनुग्रहो निग्रहोऽन्यथा ॥ २५ ॥
सर्वेऽपि प्रातराहूताः, किं त्वया रत्नकम्बलः । दत्तः ! क्षुल्लकुमारेति, राज्ञा पृष्टः ससम्भ्रमम् ॥ २६ ॥
स यथा मारितस्तातो, माता नंष्ट्वाऽऽर्यिकाऽभवत् । यावद्यौवनोऽत्रागां, भोगार्थीत्यवदत् समम् ॥ २७ ॥
गृहाण पुत्र ! तद् राज्यमित्यूचे पुण्डरीकराट् । सोऽप्यरख्यत् तात ! राज्येन सृतं दुर्गतिहेतुना ॥ २८ ॥
मरिष्याम्यचिरादेव, प्रमादोऽल्पकृते हि कः ? । संयमोऽपि पुराऽऽचीर्णो नश्यत्येवर्षिसङ्गजः ॥ २९ ॥
किं कुमार ! त्वया दत्तं, कुण्डलं ? सोऽप्यदोऽवदत् । मारयामि जरद्भूपं, राज्यं दास्यत्यसौ न मे ॥ ३० ॥
तन्निशम्याह भूभर्त्ताऽऽदत्स्व राज्यं ममाऽऽत्मज ! । न कार्यमार्य ! राज्येन, नरकान्तेन सोऽप्यवक् ॥ ३१ ॥

कथं दत्तस्त्वया मन्त्रिन् !, कटकः ? सोऽप्यदोऽवदत् । त्वां मुक्त्वाऽन्यनृपं सेवे, पुराऽऽसीदिति चिन्तितम् ॥३२॥
किं श्रीकान्तेऽर्पितो हारस्त्वयेति साऽऽह मत्पतेः । द्वादशाब्दा गतस्याऽऽसन्नानयमि परं नरम् ॥ ३३ ॥
कथं दत्तः [किमदायि] त्वया सादिन्नङ्कुशः ? सोऽप्यथाब्रवीत् । मारयाऽऽनय वात्रेभं, ज्ञापितं यत् पुरा परैः ॥३४॥
सर्वेऽपि स्वार्थसिद्ध्यर्थं, राज्ञाऽऽदिष्टाः सुतादयः । व्यधुर्निषेधमुद्बुद्धास्तत्सत्यागाभिलाषतः ॥ ३५ ॥
युवराजादयः सर्वे, वैराग्यादस्तकल्मषाः । क्षुल्लकुमारमार्गेण, तदैवाऽऽददिरे व्रतम् ॥ ३६ ॥
इत्थं क्षुल्लकुमारस्य, निशम्य चरितं हितम् । शुभं भजन्तु भावेन, भो भव्या ! भावमाभनम् ॥ ३७ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृता क्षुल्लकमुनिकथा संपूर्णा.

५५ श्री सुव्रतमहर्षिकथा

सुदर्शनपुरे पूर्वं, शिशुनागो महाधनी । बभूव सुयशानाम्नी, तत्प्रिया प्रेमशालिनी ॥ १ ॥
पितृभ्यां परमप्रीत्या, लाल्यमानः प्रसूनवत् । ज्ञान–विज्ञानवान् जज्ञे, तत्सुतः सुव्रताह्वयः ॥ २ ॥
यौवनं पावनं प्राप, स स्त्रैणगणमोहनम् । क्रमेण कर्मयोगेन, वैराग्यं च महत्तरम् ॥ ३ ॥
सम्बोध्य पितरौ कृच्छ्राद्, जगृहे सुव्रतो व्रतम् । बहुश्रुतस्तथैकत्वविहारप्रतिमामपि ॥ ४ ॥
प्रशशंसान्यदा शक्रस्तं वीक्ष्य प्रतिमास्थितम् । सुरावश्रद्दधानौ द्वौ, पुंरूपावीयतुर्भुवम् ॥ ५ ॥
कुमारब्रह्मचार्येष, धन्य[धर्मी] एकोऽवदत् सुरः । परश्च कुलसन्तान––च्छेदकः पापवानयम् ॥ ६ ॥

तपोर्द्वयोर्वचः श्रुत्वा, नारुषत् नातुषत् मुनिः । तुल्यवृत्तिस्तुलाकोटि-रिवाभूत् किन्तु चेतसा ॥ ७ ॥
तपोर्द्वयोर्वचः श्रुत्वा, नारुपत् नातुपत् मुनिः । अत्यन्तविषयासक्तौ, तन्मनःक्षोभहेतवे ॥ ८ ॥
ततश्च पितरौ ताभ्यां, दर्शितौ देवमायया । अत्यन्तविषयासक्तौ, तन्मनःक्षोभहेतवे ॥ ९ ॥
दर्शितौ मार्यमाणौ तौ, क्रन्दन्तौ करुणस्वरम् । तथापि सुव्रतमुनिश्चुक्षोभाम्भोधिवन्न च ॥ ९ ॥
वैक्रियनिकृतस्त्रीभिः, सविभ्रमविलोकनम् । दिव्याभिर्दीर्घनिःश्वास-पूर्वमालिङ्गितो भृशम् ॥ १० ॥
इत्याद्यैरुपसर्गैर्घैरनुकूलैरसौ मुनिः । ताभ्यां न चालितो ध्यानात्, सुमेरुरिव वात्यया ॥ ११ ॥
किन्तु स्थिरतरोऽत्यर्थं, संयमे सुव्रतोऽभवत् । तदैव केवलज्ञानं, निष्पापः प्राप चामृतम् ॥ १२ ॥

इति श्रीमुद्रित-ऋषिमण्डलप्रकरण वृत्तितः उद्धृता सुव्रतमहर्षिकथा संपूर्णा.

५६ कुरगडुमहर्षिप्रबन्धः

कश्चिदुग्रतपाः कस्मिन्, गच्छेऽभूत् क्षपकः पुरा । स क्षुल्लेन सहान्येद्युर्भिक्षार्थमगमत् पुरे ॥ १ ॥
गच्छता तेन मण्डूकी, मार्गे व्यापादिता पदा । तद्वधं क्षुल्लकः प्राह, न मेने क्षपकस्तदा ॥ २ ॥
आलोचयति नाऽऽलोचनावेलायां मुनिस्तु तम् । क्षुल्लकश्चाह तत्पाप-मालोचय शुभाशय ! ॥ ३ ॥
तत् श्रुत्वा क्षपको रुष्टः, क्षुल्लं हन्मीत्यधावत । क्षुल्लोऽपि लब्धलक्षत्वात्, नष्ट्वा दूरं गतो जवात् ॥ ४ ॥
स्तम्भभग्नशिरा मृत्वो-त्पेदे क्रोधान्धविग्रहः । विराधितव्रत-कुले, स फण्येकत्र दृग्विषः ॥ ५ ॥
जानन्ति तेऽहयोऽन्योऽन्यं, जातिस्मृतिवशात् ततः । प्रासुकाहारिणो रात्रि-चारिणो जज्ञिरेऽखिलाः ॥ ६ ॥

इतश्च कस्यचित् राज्ञः, पुत्रो दष्टोऽहिना मृतः । रुष्ट आदिष्टवान् भूपः, सर्पव्यापादनं(ने) जनान् ॥ ७ ॥
तस्मै यच्छामि दीनारं, यो हतं दर्शयत्यहिम् । ततो बहुजनो लग्नस्तद्वधे लोभलीलया ॥ ८ ॥
केनचिद् भ्रमताऽन्येद्यू–रेखास्तेषामिहेक्षिताः । ओ(औ)षधीभिस्ततो दध्मौ, तस्याहेर्निर्दयो बिलम् ॥ ९ ॥
निर्यात्यभिमुखं नाहि–र्मा भूत् मे भस्मसाद् दशा । निर्गतं निर्गतं छित्त्वा, तं राज्ञेऽदर्शयच्च सः ॥ १० ॥
नागदेवतया भूपो, बोधितो यत् तवाऽऽत्मजः । नागदत्ताह्वयो भावी, देह्यहीनामतोऽभयम् ॥ ११ ॥
मृत्वा क्षपकजीवोऽहि–र्महिष्यास्तस्य भूभुजः । नागदत्ताभिधो जज्ञे, सूनुरन्यूनविग्रहः ॥ १२ ॥
नागदत्तो गवाक्षस्थोऽन्यदाऽतिक्रान्तशैशवः । साधूनालोक्य सस्मार, जातिं ह्यःकृतकार्यवत् ॥ १३ ॥
प्रवव्राज गुरूपान्ते, बुभुक्षावानसौ भृशम् । जग्राहाभिग्रहं रोषो, न कार्योऽत्र मया क्वचित् ॥ १४ ॥
सन्त्याचार्यगणे तस्मिंश्चत्वारः क्षपकर्षयः । एक-द्वि-त्रि-चतुर्मासोपवासतपसः क्रमात् ॥ १५ ॥
रजन्यां देवताऽऽयाता, त्यक्त्वा तानखिलान् मुनीन् । ववन्दे क्षुल्लकमुनिं, तमद्वैतक्षमानिधिम् ॥ १६ ॥
निर्गच्छन्ती करे धृत्वा, सोक्तैकेन तपस्विना । रे कटपूतने ! ग्राम्ये !, विवेकविकलाऽसि किम् ? ॥ १७ ॥
महातपस्विनो याऽस्मान्, मुक्त्वा त्रिकालभोजिनम् । वन्दसे पूर्वमेवैनं, सर्वसाध्वव(ध)मं मुनिम् ॥ १८ ॥
देव्युवाच मुने ! भाव–क्षपकं प्रणमाम्यहम् । न द्रव्यसाधुमित्युक्त्वा, सा स्वाश्रयमशिश्रियत् ॥ १९ ॥
क्षुल्लोऽपि कल्यवर्त्तस्य, पात्रं दत्त्वा न्यमन्त्रयत् । मुनीनैकेन निष्ठ्यूतं, तदन्तर्न्यस्तमीर्ष्यया ॥ २० ॥
मिथ्या मे दुष्कृतं खेलमात्रं वो नार्पितं द्रुतम् । तेनेत्युक्तेऽपि(च) निष्ठ्युतं, न्यस्तं तत्राखिलर्षिभिः ॥ २१ ॥

अद्विष्टो भुक्तवान् भक्तं, मुनिभिर्वारितोऽप्यसौ, । अद्वैतक्षान्तिमाहात्म्यात्, केवलज्ञानमाप च ॥ २२ ॥
चत्वारः क्षपकाः सानुतापाः केवलमुज्ज्वलम् । सम्प्रापुरेवं पश्चापि, शिश्रियुस्ते शिवश्रियम् ॥ २३ ॥

इति श्रीमुद्रित--ऋषिमण्डलप्रकरणवृत्तित उद्धृतः कुरगडुमहर्षिप्रबन्धः संपूर्णः

५७ श्रीमेतार्यमहर्षिकथा

श्रीसाकेतपुरे चन्द्रावतंसकनृपोऽभवत् । प्रिया सुदर्शना तस्य, तथाऽन्या प्रियदर्शना ॥ १ ॥
सागरचन्द्र–मुनिचन्द्राख्यौ पुत्रौ तथाऽपरौ । गुणचन्द्र–बालचन्द्रौ, जज्ञिरे क्रमशस्तयोः ॥ २ ॥
राजा सागरचन्द्राय, यौवराज्यपदं ददौ । कुमारभुक्तये मुनिचन्द्रायोज्जयिनीं पुरीम् ॥ ३ ॥
कायोत्सर्गेऽन्यदा तस्थौ, माघे राड् वासवेश्मनि । यावद् ज्वलति दीपोऽयं, हृदा कृत्वेत्यभिग्रहम् ॥ ४ ॥
प्राग्यामान्ते प्रभुर्दुःखं, ध्वान्ते स्थातेति भक्तितः । हीयमाने प्रदीपेऽस्मिश्चेटी तैलं न्यधात् पुनः ॥ ५ ॥
यावन्निशीथं जज्वाल, शय्यारक्षाकरी पुनः । निर्वाणाभिमुखे दीपे, तैलं चिक्षेप पूर्ववत् ॥ ६ ॥
एवं यामे तृतीयेऽपि, यावद् रुधिरपूरितः । प्रातः पतित्वा पञ्चत्वं, प्राप चन्द्रावतंसकः ॥ ७ ॥
राजा सागरचन्द्रोऽभूदन्यदाऽसौ विमातरम् । प्रोचे सून्वोः कृते राज्यं, गृहाण प्रव्रजाम्यहम् ॥ ८ ॥
अनेन राज्यमाक्रान्तं, क्षमौ नाद्यापि मत्सुतौ । बालत्वादित्यसौ दीयमानं नेच्छति तत् तदा ॥ ९ ॥
ततो राज्यश्रियाऽत्यन्तं दीप्यमानं निरीक्ष्य तम् । सा दध्यौ न मुधाऽनेन, दीयमानं तदाऽऽदृतम् ॥१० ॥

श्रियाऽभविष्यतामेवं, शोभमानौ सुतौ मम । तदिदानीममुं हन्मि, येन स्यादीप्सितं मम ॥ ११ ॥
गवेषयति छिद्राणि, प्रत्यहं प्रियदर्शना । राज्ञः सागरचन्द्रस्य, वधैककृतनिश्चया ॥ १२ ॥
प्रैषीत् सदाय सन्देशं, बुभुक्षावान् नृपोऽन्यदा । कल्यवर्त्तौ मम कृते, प्रेष्यः प्रेष्यादिपाणिना ॥ १३ ॥
चेटीहस्तेऽर्पितस्तेन, मोदकः सिंहकेसरः । किमेतदिति पप्रच्छ, सम्भ्रान्ता प्रियदर्शना ॥ १४ ॥
साऽऽह पूर्वाह्निकं राज्ञः, तया(तः) पस्पर्श पाणिना । प्राग् विपाक्तेन तेनासौ, वासितो मोदकोऽभवत् ॥ १५ ॥
अहो ! सुगन्ध इत्युक्त्वा, सा तं चेटीकरे ददौ । तच्चेष्टितमजानाना ढुढौके साऽपि भूभुजे ॥ १६ ॥
विमातृ-तनयौ पार्श्वेऽभूतां दध्यौ ततो नृपः । बुभुक्षिताभ्यामेताभ्यां, कुर्वे पूर्वाह्निकं किमु ? ॥ १७ ॥
द्विधाकृत्य तयोस्तस्यैकैकं खण्डं ददौ नृपः । तदास्वादाद् विषावेगघूर्णितौ तौ बभूवतुः ॥ १८ ॥
सम्भ्रमाद् बहवो(निपुणा) वैद्या, आहूता भूभुजाऽऽययुः । सुवर्णपानयोगेन, सज्जीजातावुभौ क्षणात् ॥ १९ ॥
आहूता पृष्ठा सा चेटी, भूभुजा विस्मितात्मना । तयोर्मातृकरस्पर्शं, विचाले प्राह केवलम् ॥ २० ॥
तामाकार्यावदद् देवः, सखेदं प्रियदर्शनाम् । पापेऽनाचीर्णपुण्योऽहं, क्षिप्तोऽभूवमधस्त्वया ॥ २१ ॥
दीयमानं तदा राज्यं, भवत्याऽङ्गीकृतं न किम् ? । तद् गृहाणाधुनेत्युक्त्वा, दत्त्वा प्रव्रजितः स्वयम् ॥ २२ ॥
साधुसङ्घाटकस्तत्रावन्तीतः कश्चिदाययौ । निरुपद्रवतां पृष्टो, मुनीनामिदमभ्यधात् ॥ २३ ॥
साधून् पाखण्डिनश्चापि, पुरोधो-राजनन्दनौ । वाचाटावुच्चाटयतः, केवलं केलिलोलुपौ ॥ २४ ॥
श्रुत्वा सागरचन्द्रर्षिः, सामर्षस्तामगात् पुरीम् । साम्भोगिकानां साधूनामुपाश्रयमशिश्रयत् ॥ २५ ॥

मध्याह्ने तैरसौ पृष्ट–आनयामो भवत्कृते । भक्तमेपोऽब्रवीदात्मलब्धिलब्धोपजीव्यहम् ॥ २६ ॥
दर्शयन्तु परं स्थापनाकुलानि ममर्पयः । ततस्तैः क्षुल्लकस्तस्मै, तद्दर्शनकृतेऽर्पितः ॥ २७ ॥
दर्शयित्वाऽऽस्पदं क्षुल्लो, ववलेऽस्मै पुरोधसः । प्रविश्यान्तरदादुच्चै–र्धर्मलाभमसौ मुनिः ॥ २८ ॥
हाहाकारं वितन्वन्त्योऽन्तःपुर्यो निर्ययुर्बहिः । किमेतत् ? श्राविकाश्चेति, बभाषे मुनिरुच्चकैः ॥ २९ ॥
कुमारावियतुस्तरयोच्चैःस्वराकर्णनादुभौ । कपाटसम्पुटं दत्त्वा, महर्षिरेवमूचतुः ॥ ३० ॥
विधेहि नृत्यं रे मुण्ड !, मुक्त्वा पात्राण्यसावपि । ननर्त्त तौ तु वादित्रवादकौ केवलं जडौ ॥ ३१ ॥
युध्यावहे मुनेऽन्योन्यं, ततो युगपदागतौ । गृहीत्वैकत्र मुनिना, कृतान्यस्थीनि दूरतः ॥ ३२ ॥
मर्मस्थाने भृशं हत्वा, मृतप्रायौ विधाय तौ । ययौ कपाटमुद्घाट्य, वनान्तर्मुनिपुङ्गवः ॥ ३३ ॥
ज्ञातव्यतिकरो राजाऽपृच्छत् तत्र स्थितान् मुनीन् । तेऽवोचन्नतिथिः साधुरेकोऽभूदागतः परम् ॥ ३४ ॥
गवेषयद्भिर्ध्यानस्थो, वनान्तर्मुनिरीक्षितः । राज्ञोपलक्ष्य तं नत्वा, ययाचे सज्जतां तयोः ॥ ३५ ॥
पापावतंस ! रे चन्द्रावतंसकसुतो भवान् । भूत्वाऽपीत्थं मुनीन् बाध्यमानान् स्वैरप्युपेक्षसे ॥ ३६ ॥
वचोभिः कर्कशैः शीतैर्निर्भर्त्स्यैवमनेकधा । मुनिरूचे विना दीक्षां, मोक्षो नैवानयोर्नृप ! ॥ ३७॥
पृष्टौ प्रतिश्रुता दीक्षा, गृहीत्वैकत्र चालिताः । कयाचित् कलया तस्थुः, स्वस्थाने सन्धयस्तयोः ॥ ३८ ॥
बलात् प्रव्राजितौ लोचं, कृत्वा तौ तेन साधुना । पितृव्योऽयं ममेत्येकः, सम्यक् पालयति व्रतम् ॥ ३९ ॥
अहो ! प्रव्राजितौ वाचां, छलेन मुनिनाऽमुना । पुरोहितसुतश्चैवं, सदा हृदि जुगुप्सते ॥ ४० ॥

प्रान्ते सानशनं मृत्वा, देवलोकं गतावुभौ । महाविदेहेष्वर्हन्तं, गतौ तौ पृच्छतोऽन्यदा ॥ ४१ ॥
स्वामिन् ! सुखेन दुःखेन, धर्मं प्राप्स्यति को द्वयोः ? । पुरोहितसुतः स्वामी, प्राह दुर्लभबोधिकः ॥ ४२ ॥
पाश्चात्येन च्युतः पूर्वं, प्रतिबोध्यो यथा तथा । इति तौ सुहृदौ देवौ, प्रतिज्ञां चक्रतुर्मिथः ॥ ४३॥
जीवः पुरोधसः सूनोस्ततश्च्युत्वा स्वकर्मतः । मेत्याः कुक्षौ समुत्पेदे, पुरे राजगृहाह्वये ॥ ४४ ॥
प्रीतिरासीत् समं मेत्या, श्रेष्ठिन्याः साऽभवत् कथम् ? । विक्रीणात्यामिषं निन्द्या, गृह्णाति श्रेष्ठिनी पुनः ॥ ४५ ।
श्रेष्ठिन्या सोदिता मेती, मांसमन्यत्र मा नय । भवत्याः सर्वमप्येतदादास्ये चाहमन्वहम् ॥ ४६॥
सदैवं व्यवहारेण, दृषद्रेखेव निश्चला । अप्यासन्नाऽऽस्पदत्वेन, प्रीतिरासीत् तयोर्मिथः ॥ ४७ ॥
स्वभावात् श्रेष्ठिनी निन्दुर्मेत्या जातः सुतस्ततः । दत्तस्तस्यै मृता तस्याः । सुताऽऽत्मनाऽददे तया ॥ ४८ ॥
श्रेष्ठिनी पादयोर्मेत्यास्तं पातयति नन्दनम् । भवत्या जीवितः(त्वतु) शिशुः, प्रसादेनेति वादिनी ॥४९ ॥
श्रेष्ठिन्या लालितोऽत्यन्तं, मेतार्य इति नामतः । ववृधेऽसौ सुधासेकात्, मन्दार इव मन्दरे ॥ ५० ॥
सोऽग्रहीदल्पकालेन, कलाचार्यान्तिके कलाः । बोध्यमानोऽपि देवेन, तेन नैवैष बुध्यते ॥ ५१ ॥
तदर्थमर्थिताः पित्राऽथेभ्यानामष्ट कन्यकाः । सोऽभ्रमत् शिबिकारूढो, जातपाणिग्रहोत्सवः ॥ ५२ ॥
तेन देवेन मातङ्गोऽधिष्ठितोऽरुददुच्चकैः । चेत् सुता मे मृता नाभूदकरिष्यं तदुत्सवम् ॥ ५३ ॥
ततो व्यतिकरो मेत्या, मेतस्य' कथितोऽखिलः । यथाऽयमावयोः सूनुर्विज्ञेयो भवता प्रिय ! ॥ ५४ ॥

करोष्यसदृशं रे रे ! त्वं सम्बन्धं ब्रुवन्निति । चिक्षेपोत्पाट्य मातङ्ग(ङ्गो) गर्त्तायां सहसा स तम् [तकम्] ॥५५॥
आविर्भूयावदद् देवो, बोध्यमानो न बुध्यसे । किमिदानीमिवैपोऽपि, बभाषे दीनवागिदम् ॥ ५६ ॥
वयस्यावर्णवादो मे, हीनजात्युद्भवः पुनः । निवारय परिव्रज्यामादास्येऽल्पदिनैस्ततः ॥ ५७ ॥
स कथं यात्यनेनोक्ते, मेतार्यो भाषते सुहृत् । राजकन्याविवाहेन, यात्यसौ नान्यथा पुनः ॥ ५८ ॥
ततश्छगलकस्तस्मै, दत्तो रत्नपुरीषकृत् । तत्पितोपायनीचक्रे, तानि रत्नानि भूभुजे ॥ ५९ ॥
पृष्टः श्रेणिकराज्ञाऽसावुपायनप्रयोजनम् । प्राह राजन् ! निजां कन्यां, प्रदेहि मम सूनवे ॥ ६० ॥
निषिद्धोऽपि पुनस्तानि, रत्नानि नृपतेरदात् । रत्नाप्तिस्ते कुतस्त्येति, पृष्टो मेतोऽब्रवीदजम् ॥ ६१ ॥
बद्धो राजगृहे छागो, दुर्गन्धममुचत् शकृत् । ततो दिव्यानुभावोऽयमिति प्रत्यर्पितोऽस्य सः ॥ ६२ ॥
कुर्वत्युपायनं तस्मिन्, पुनर्मन्त्र्यभयोऽवदत् । भो ! दुःखं याति वैभार–गिरौ नन्तुं प्रभुं नृपः ॥ ६३ ॥
निष्पादय रथारोह–पद्यां सद्यः स्वसिद्धये । देवेन तत्क्षणादेव, सा कृताऽचिन्त्यशक्तिना ॥ ६४ ॥
साऽद्यापि दृश्यते शालः, सौवर्णः कारितः पुरे । मन्त्रिणोक्तः पुनर्मेतो, भो ! अत्रानय वारिधिम् ॥ ६५ ॥
तत्र स्नातस्य शुद्धस्य, यच्छामस्ते कनीं निजाम् । आनीतोऽम्भोनिधिरसौ, वेलायां स्नापितः शुचिः ॥ ६६ ॥
विवाहं कारितो याप्ययानारूढोऽभ्रमत् पुरम् । आनीतास्ताः स्त्रियो भोगान्, भुङ्क्तेऽसौ नवभिः सह ॥ ६७ ॥
समेत्य द्वादशाब्दान्ते, सुरो मेतार्यमब्रवीत् । व्रतार्थं प्रार्थितः स्त्रीभिर्द्वादशाब्दान्यदात् पुनः ॥ ६८ ॥
चतुर्विंशतिवर्षान्ते, सर्वेऽपि प्राव्रजंस्ततः । नवपूर्वविदेकत्वप्रतिमामाददे मुनिः ॥ ६९ ॥

पुरेऽस्मिन् विहरन् सोऽगात्, स्वर्णकृद्गृहमन्यदा । स श्रेणिकजिनार्चार्थं, कुरुते काञ्चनान् यवान् ॥ ७० ॥
त्रिसन्ध्यं परिपाट्याऽर्चत्यर्हन्तं राट् यवैर्नवैः । अष्टोत्तरशतैस्ते तु, तेन निष्पादितास्तदा ॥ ७१ ॥
भिक्षा तदर्थं नानीतोदिते स्वर्णकृताऽपि हि । तदर्थं प्राविशद् वेश्माभ्यन्तरं स्वर्णकृत् स्वयम् ॥ ७२ ॥
गलितास्ते यवभ्रान्त्या, काञ्चनाः क्रौञ्चपक्षिणा । पप्रच्छ बहिरायातस्तत्सम्बन्धमसौ मुनिम् ॥ ७३ ॥
त्वया परेण वा केन, वदर्षे ! मे यवा हृताः ? । स तत्करुणया जानन्नप्याचष्टे न किञ्चन ॥ ७४ ॥
राज्ञोऽर्चावसरो जज्ञेऽद्यास्थिखण्डान्यहं क्रिये । इति भीत्या स पप्रच्छ, मुनिरूचे न तत् पुनः ॥ ७५ ॥
ततो रुपाऽऽर्द्रवार्ध्रेण, शीर्षावेष्टोऽर्पितो मुनेः । तथा यथा दृशोर्गोलौ, निर्गत्य पतितौ भुवि ॥ ७६ ॥
निश्चलात्मा महात्माऽसौ, ध्यानात् नाप्यचलत् तथा । अन्तकृत्केवली भूत्वा, सिद्धिसौधाग्रमाप च ॥ ७७ ॥
स्फोटयमानादथो काष्ठादेकं खण्डं गलेऽलगत् । क्रौञ्चस्योत्पत्य ते तेनाखिला वान्ता यवा भिया ॥ ७८ ॥
हाहाकारपराः पौरा, मृतं तं वीक्ष्य चाक्षतान् । यवानाचुक्रुशुः पाप्मन् !, स्वर्णकृत् ! किं कृतं त्वया ? ॥ ७९ ॥
दधाविरे वधायास्य, ज्ञातव्यतिकरा नराः । उपाददे सतन्त्रोऽसावनन्योपायतो व्रतम् ॥ ८० ॥
धर्मलाभं कलादोऽदाद्, राज्ञे स्मित्वा नृपोऽवदत् । क्वथिष्यसे कटाहे रे !, चेत् त्यक्ष्यसि व्रतं क्वचित् ॥८१॥
इत्थं मेतार्यवत् कार्यमार्यैर्ध्यानस्थिरं मनः । शश्वदानन्दगाकन्दकन्दलोद्भेदसिद्धये ॥ ८२ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृता श्रीमेतार्यमहर्षिकथा संपूर्णा

५८ श्री इलापुत्रकथा

कस्मिंश्चिदेको ग्रामेऽभूद्, द्विजो धर्मं निशम्य सः । चारित्रं सद्गुरोरन्ते, सकलत्रोऽप्युपाददे ॥ १ ॥
तेपाते तौ तपस्तीव्रं, परं प्रेम मिथो महत् । विचिकित्सां ब्राह्मणीति, चक्रे स्त्रीशूद्रसद्धजाम् ॥ २ ॥
मृत्वोत्पन्नावुभौ देवौ, तदनालोचितागसौ । इतश्च भारतेऽत्रैवाभूदिलावर्द्धनं पुरम् ॥ ३ ॥
तत्रेलानामतः साति-शया देव्यस्ति विश्रुता । तां सेवतेतरामेका, सार्थवाही सुतार्थिनी ॥ ४ ॥
कुक्षौ तस्यास्ततश्च्युत्वोत्पेदे जीवो द्विजन्मनः । इलापुत्र इति नाम, कृतमुत्सवपूर्वकम् ॥ ५ ॥
ब्राह्मण्यभूद् विचिकित्सा-वशात् लङ्खकुले सुता । द्वावप्युद्यौवनं प्राप्तौ, मन्मथद्रुमदोहदम् ॥ ६ ॥
लङ्खपुत्रीमिलापुत्रो, नृत्यन्तीमन्यदैक्षत । प्राग्भवप्रेमतस्तस्यां, भृशं रागार्दितोऽभवत् ॥ ७ ॥
सुहृद्भिः प्रार्थिता साऽस्य, लङ्खमुख्यास्ततोऽवदन् । यच्छामः कथमप्येनां, नाक्षयो निधिरेव नः ॥ ८ ॥
चेद् विद्यां शिक्ष्य(क्ष)तेऽस्माकं, साकं भ्रमति चैप नः । तदैनां लभते स्वर्ण-तोलितामपि नान्यथा ॥ ९ ॥
ततः कर्मवशाद् रागात्, स्वीचक्रे तदिलासुतः । श्रेष्ठं श्रेष्ठिकुलं त्यक्त्वा, तन्निषेवेऽधमं कुलम् ॥ १० ॥
तद्विद्यां शिक्षितः सम्यग्, विवाहायार्जितुं धनम् । वेन्नातटपुरं प्राप्तो, ययाचेऽवसरं नृपात् ॥ ११ ॥
दत्त्वावसरमेतस्मै, स्वान्तःपुरपरीवृतः । राजा सनागरोऽद्राक्षीत्, तत्कृतं नाट्यमीदृशम् ॥ १२ ॥
पूर्वमूर्ध्वीकृतस्तत्र, महान् वंशोऽस्य चोपरि । फलकं प्रान्तयोस्तस्य, द्वौ द्वौ स्तो लोहकीलकौ ॥ १३ ॥

फलकान्तरसौ स्थित्वा, हस्तोपात्तासि–खेटकः । मूलच्छिद्रयुतोपानद्द्वयं परिदधात्यथ ॥ १४ ॥
ससाग्रतोमुखान्युच्चैः, सप्त पश्चान्मुखान्यपि । उत्पत्योत्पत्य गगनेऽप्रमत्तः किरणान्यदात् ॥ १५ ॥
पादुकाच्छिद्रयोरन्तः प्रवेशयति कीलकौ । कथञ्चित् पतति ततश्चेद् याति शतखण्डताम् ॥ १६ ॥
सर्वे दानोन्मुखास्तस्य, रञ्जिताः कलयाऽभवन् । अदातरि परं राज्ञि, पूर्वं नो कश्चिदप्यदात् ॥ १७ ॥
सा गीतं गाथकीवृन्दधृता गायति सुस्वरम् । अद्भुतरूपां तां वीक्ष्य, नृपो रागार्दितोऽभवत् ॥ १८ ॥
राजाऽऽहोत्पतनं नैव, दृष्टं भोः ! कुरु तत् पुनः । एवं द्वि–त्रि–चतुर्वारं, कृतं तेन कलावता ॥ १९ ॥
परं लङ्खसुतारक्तो, म्रियते चेत् पतत्ययम् । पश्चात् परिणयाम्येनामिति दध्यौ नृपो हृदि ॥ २० ॥
साधुकारः कृतो लोकैरदातरि नृपे ततः । दध्यौ नटो मां कन्यार्थं, मृतमिच्छति राड् ध्रुवम् ॥ २१ ॥
इतश्चेलासुतोऽद्राक्षीद्, वंशस्थो धनिनां गृहे । स्त्रीभिरद्भुतरूपाभिर्दीयमानोदनान् मुनीन् ॥ २२ ॥
तद्रूपादौ परं तेषां, न मनः किन्तु भक्तगम् । तद्वीक्ष्याचिन्तयदसौ, दुष्कर्मावरणक्षयात् ॥ २३ ॥
अहो ! निःस्पृहताऽमीषां, नीरागाणां महात्मनाम् । धिङ् मां केयमवस्था मे, कुलीनस्याकुले स्थितिः ॥ २४ ॥
शुभध्यानवशादेवं, वंशाग्रस्थोऽपि केवलम् । लेभे ज्ञानमिलापुत्रो, योगस्याहो ! विशिष्टता ॥ २५ ॥
लङ्खपुत्री नृपो राज्ञी, त्रयोऽप्येवं विरागतः । लेभिरे केवलज्ञानं, लिङ्गं च देवतार्पितम् ॥ २६ ॥
स्वर्णाम्बुजीभूतवंशोपरि तिष्ठन्निलासुतः । भविकान् बोधयामास, तत्रस्थान् धर्मदेशनात् ॥ २७ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृता श्री इलापुत्रकथा संपूर्णा.

५९ श्री चिलातीपुत्रकथा

क्षितिप्रतिष्ठिते द्रङ्गे, यज्ञदेवाभिधो द्विजः । एकोऽभूत् पण्डितंमन्यो, जिनशासननिन्दकः ॥ १ ॥
सोऽन्यदा निर्जितो वादे, गुरुभिर्व्रतमग्रहीत् । देवताबोधितस्यास्य, सम्यक् परिणतं च तत् ॥ २ ॥
परं त्यजेद् जुगुप्सां नोपशान्तः स्वजनोऽखिलः । प्रियाऽदात् कार्मणं(णां)प्रेम्णा, तस्मै वश्यो ममास्त्विति ॥ ३ ॥
ततो मृत्वा सुरो जज्ञे, साऽपि निर्वेदतो व्रतम् । लात्वाऽनालोचिता चैव, मृत्वोत्पन्ना सुरालये ॥ ४ ॥
इतश्च धननामाऽऽसीत् श्रेष्ठी राजगृहे पुरे । चिलात्याख्या मुख्यचेटी, चेटीकोटीपु विश्रुता ॥ ५ ॥
तस्याः कुक्षौ ततश्च्युत्वोत्पेदे जीवो द्विजस्य सः । जुगुप्सातोऽभिधा तस्य, चिलातीपुत्र इत्यभूत् ॥ ६ ॥
तत्रैव श्रेष्ठिनः पञ्चपुत्रोपरि दिवश्च्युता । स एव ब्राह्मणीजीवः सुंसुमाख्याऽभवत् कनी ॥ ७ ॥
चेटीसुतः स एवास्याः, कल्पितो बालधारकः । कुचेष्टां श्रेष्ठिना दृष्टः, कुर्वाणोऽस्या भगादिपु ॥ ८ ॥
निर्वासितो ह्ययोग्यत्वात् पल्लीं सिंहगुहां गतः । सुभगत्वात् निजोपान्ते, पल्लीनाथेन रक्षितः ॥ ९ ॥
पल्लीशोऽभूत् मृते तस्मिन् निस्त्रिंशोऽग्रप्रहार्यसौ । प्रोक्तास्तेनाऽऽत्मनश्चौरा, यामो राजगृहं पुरम् ॥ १० ॥
धनश्रेष्ठिश्रियस्तत्र, युष्माकं मम सुंसुमा । ततो पतन्नकस्मात् ते, रात्रौ तच्छ्रेष्ठिनो गृहे ॥ ११ ॥
दत्त्वाऽपस्वापिनीं तेषां, तद्धनं सुंसुमां च ते । आदाय कथयित्वा स्वं, प्रति पल्लीं प्रतस्थिरे ॥ १२ ॥
आरक्षकान् धनोऽवोचद्, युष्माकं वालितं धनम् । कन्या ममेति तत्पृष्टे, सपुत्रस्तैरधावत ॥ १३ ॥

भयाश्चौरा धनं मुक्तं, तज्ज्ञात्वा वलिताः परे । सपुत्रोऽप्यन्वगात् श्रेष्ठी, पल्लीशं सुंसुमान्वितम् ॥ १४ ॥
नासौ शक्नोति तां वोढुमासन्नोऽभूद् धनस्ततः । छित्वा कन्याशिरो रागात्, तदादायाग्रतोऽचलत् ॥ १५ ॥
निराशो वलले श्रेष्ठी, मध्याह्ने तान् क्षुधाऽर्दितान् । तनयानाह हत्वा मां, कुर्वन्त्वाहारमात्मनः ॥ १६ ॥
न कुर्मोऽकृत्यमीदृक्षं, ज्येष्ठोऽवग् घ्नन्तु मां परम् । एवं यावत् कनिष्ठोऽपि प्राहै(ह)ते मेनिरे न तत् ॥ १७ ॥
ततो धनोऽब्रवीदग्रः, सर्वे त्यक्त्वा सुतापलम् । तत् तैराहारितं भोगभुजोऽभवन् गता गृहम् ॥ १८ ॥
एवं मुनिभिराहार, आहार्यो गाढकारणैः(णे) । तन्मांसवदनिर्वाहे, मोक्षौकः प्रापकः क्रमात् ॥ १९॥
दिङ्मूढः पल्लीनाथोऽभूद्, गच्छन् कन्याशिरःकरः । मूर्तं धर्ममिवाद्राक्षीत्, मुनिमातापनापरम् ॥ २० ॥
ब्रूहि धर्मं न चेत् छेत्स्ये, तवाऽऽकृष्टासिना शिरः । उपशम-विवेक-संवर इत्यब्रवीत् मुनिः ॥ २१ ॥
तत् श्रुत्वाऽचिन्तयत् चौरः, सत्यवाचो महर्षयः । कस्तत्रोपशमादीनां, भावार्थो ? ज्ञातवान् स्वयम् ॥ २२ ॥
क्रोधत्यागो भवेत् तत्रो-पशमश्च विवेकता । स्वस्वादिवर्जनं त्यक्तस्तेनासिश्च कनीशिरः ॥ २३ ॥
इन्द्रिय-नोइन्द्रिययोर्गुप्तिः स्यात् संवरः पुनः । एतत् पदत्रयं ध्यायंस्तस्थौ मतिमया स्थिरः ॥ २४ ॥
ईयुः शोणितगन्धेन, वज्रतुण्डाः पिपीलिकाः । भक्षयन्ति स्म तस्याङ्गं, ध्यानस्थस्य महात्मनः ॥ २५ ॥
प्रविश्य पादयोर्देहं, भित्त्वा शिरसि निर्ययुः । चालनीव लसच्छिद्रं, तस्य ताभिः कृतं वपुः ॥ २६ ॥
कर्मक्षयोपकारिण्यो, ममैता इत्यसौ स्मरन् । न द्वेषमीषदप्यन्तर्बबन्धैतासु तत्त्ववित् ॥ २७ ॥

विषह्यार्द्धतृतीयाहमुपसर्गं तदुद्भवम् । शुभध्यानादसौ मृत्वोत्पेदे त्रिविष्टपेऽष्टमे ॥ २८ ॥

इति श्रीमुद्रित–ऋषीमण्डलवृत्तितः उद्धृता श्री चिलातीपुत्रकथा

६० श्री मृगापुत्रकथा

सुग्रीवाख्य[ख्ये]पुरे राजा, बलभद्राभिधोऽभवत् । तत्प्रेमकन्दलोद्भेदाम्भोदाऽग्रमहिषी मृगा ॥ १ ॥
तस्याः सूनुर्मृगापुत्रो, यौवराज्यश्रियं श्रयन् । स्त्रीभिः क्रीडति दिव्याभिर्दोगुन्दुक इवान्वहम् ॥ २ ॥
अन्येद्युर्नन्दनावासगवाक्षस्थो मृगात्मजः । पुरमालोकयत्युच्चैश्चतुष्क–त्रिक–चत्वरम् ॥ ३ ॥
भ्रमन्तं मुनिमद्राक्षीत्, तत्रैकं सद्गुणाकरम् । स दध्यावीदृशं रूपं, प्राक् किं क्वाप्यस्मि दृष्टवान् ? ॥ ४ ॥
निर्निमेषं तदालोकात्, मृगासूर्जातिमस्मरत् । देवलोकाद् यथा च्युत्वा, मानुष्यं भवमागतः ॥ ५ ॥
विषयेष्वरजन् सम्यग्, वैराग्यात् संयमे रजन् । माता–पितृनुपेत्यैवं, बलभद्रात्मजोऽवदत् ॥ ६ ॥
मया स्मृतानि पश्चापि, व्रतानि नरके व्यथाः । यच्छतं मे व्रतानुज्ञां, निर्विण्णोऽस्म्यमुतो भवात् ॥ ७ ॥
तात ! मातर्मया भोगा, भुक्ता विषफलोपमाः । प्रान्ते कटुविपाकास्तेऽनुबन्धा दुःखदायिनः ॥ ८ ॥
तथाऽनित्यमिदं देहमशुच्यशुचिसम्भवम् । न फेनबुद्बुदौपम्ये, प्राप्नोम्यस्मिन् भवे रतिम् ॥ ९ ॥
असारेऽस्मिन् मनुष्यत्वे, ग्रस्ते मृत्युजराऽऽदिभिः । बहुव्याधिजरा(रुजाऽऽ)कीर्णे, न लभेयं रतिं ततः ॥ १० ॥
क्षेत्रं वास्तु हिरण्यं च, पुत्रान् दारांश्च बान्धवान् । त्यक्त्वाऽवश्यमवशेन, गन्तव्यमखिलं मया ॥ ११ ॥

तथा महान्तमध्वानं, योऽपाथेयः प्रपद्यते । दुःखी भवत्यसौ गच्छन्, क्षुधा–तृष्णाऽभिपीडितः ॥ १२ ॥
यस्तु महान्तमध्वानं, सपाथेयः प्रपद्यते । सुखी भवत्यसौ गच्छन्, क्षुधा–तृष्णाविवर्जितः ॥ १३ ॥
याति धर्ममकृत्वैवं, योऽमुत्र सोऽसुखी भवेत् । कृत्वा धर्मं पुनर्याति, सोऽल्पकर्मा सुखी भवेत् ॥ १४ ॥
स्यात् प्रदीप्ते[प्तं]यथा गेहे, तस्य यस्तु पतिर्भवेत् [भवेत्पतिः] । उद्धरेत् सारभाण्डानि, निस्सारं सर्वमुज्झति ॥१५॥
एवं लोके प्रदीप्तेऽस्मिन्, जरया मरणेन च । आत्मानं तारयिष्यामि, संसाराद् युष्मदाज्ञया ॥ १६ ॥
तं माता–पितरोऽवोचन्, श्रामण्यं पुत्र ! दुश्चरम् । गुणानां तु सहस्राणि, धार्याणि स्युर्महर्षिभिः ॥ १७ ॥
समता सर्वभूतेषु, तत्र मित्रेषु शत्रुषु । प्राणातिपातविरतिः, कर्त्तव्याऽत्यर्थमाभवम् ॥ १८ ॥
सर्वदाऽप्यप्रमत्तेन, मृषावादविवर्जनम् । सत्यं वाच्यं न चादत्तमुपादेयं तृणाद्यपि ॥ १९ ॥
ब्रह्मचर्यं त्रिधा धार्यं, स्मार्या नार्या न सङ्गमाः । धन–धान्य–हिरण्यादिर्वर्जनीयः परिग्रहः ॥ २० ॥
रात्रौ चतुर्विधाहारस्त्याज्यो धार्यो न सन्निधिः । सर्वारम्भपरित्यागो, ममताऽत्र न कुत्रचित् ॥ २१ ॥
क्षुत्–तृष्णा–दंश–मशक–शीतोष्णाद्याः परीषहाः । दुश्चरा याचनावृत्तिलब्धशुद्धान्नभोजनम् ॥ २२ ॥
कापोतीया पुनर्वृत्तिः, कचलोचोऽति दुश्चरः । यावज्जीवमविश्रामो, धार्यो गुणभरोऽन्वहम् ॥ २३ ॥
व्योमगङ्गाप्रतीपोग्रस्रोतोवद् दुस्तरो भृशम् । बाहुभ्यां सागर इव, तरितव्यो गुणोदधिः ॥ २४ ॥
बालुकाकवलाहारनिरास्वादेऽत्र संयमे । एकान्तदृष्टयाऽहिरिवासिधारागमनं भवेत् ॥ २५ ॥
चर्वयितव्या मदनदन्तैर्लोहमया यवाः । यथा चाग्निशिखा दीप्ता, पातुं भवति दुष्करा ॥ २६ ॥

यथा तोलयितुं मेरुस्तुलया दुष्करो भवेत् । श्रामण्यं खलु तारुण्ये, कर्तुं स्याद् दुष्करं तथा ॥ २७ ॥ युग्मम् ॥
भुङ्क्ष्व मानुष्यकान् भोगान्, शब्दादीन् पञ्चधा चिरम् । भुक्तभोगस्ततो जाताऽवसरे त्वं चरेर्व्रतम् ॥ २८ ॥
स माता-पितरावूचे, सत्यमेतद् यथोदितम् । इहलोके निष्पिपासस्य, किञ्चिदस्ति न दुष्करम् ॥ २९ ॥
मनोजा देहजाः सोढा, अनन्ता वेदना मया । दुःखखानौ भवेऽमुष्मिन्, जन्म-मृत्यु-जराऽऽकुले ॥ ३० ॥
यथेह महदुष्णत्वं, स्फीतं शीतं तथाऽत्र नु । ततोऽनन्तगुणं तातानुभूतं नरकेषु तत् ॥ ३१ ॥
पक्तोऽस्मि कु[क]न्दुकुम्भ्यग्नावूर्ध्वपादस्त्वधःशिराः । दग्धो दवाग्नितुल्यासु कदम्बवालुकास्वहम् ॥ ३२ ॥
उर्ध्वं बद्ध्वाऽधमैश्छिन्नोऽनेकधा क्रकचादिभिः । खिन्नस्तीक्ष्णाग्रसम्बलिद्रोः(द्रौ) कर्षणापकर्षणैः ॥ ३३ ॥
इक्षुवत् पीडितोऽत्यर्थं, महायन्त्रेषु चाऽऽरटन् । पातितः पाटितश्छिन्नः, कूजन् कोल-श्वभिः सुरैः ॥ ३४ ॥
नियोज्य ज्वलदग्न्याभे तोत्रैर्लोहरथेऽर्दितः । असिभिश्चातसीवर्णैश्छिन्नो भिन्नश्च पट्टिशैः ॥ ३५ ॥
ज्वलज्ज्वलनचित्यासु, दग्धो महिषवद् भृशम् । विलुप्तो ढङ्क-गृध्राद्यैर्लोहतीक्ष्णाननैर्विभिः ॥ ३६ ॥
तृषार्त्तः क्षुरधाराभिर्गतो वैतरणीं हतः । प्राप्तोऽसिपत्रं[यन्त्र] तापार्त्तः, पतद्भिः खण्डितो दलैः ॥ ३७ ॥
मुद्गरैर्मुशलैः शूलैर्भग्नाङ्गोऽनेकधाऽभवम् । उत्कृत्तः कल्पितस्तीक्ष्णधाराग्रैः कल्पनी[कर्त्तरी]क्षुरैः ॥ ३८ ॥
पाशैर्जालैर्मृग इव, बद्धो रुद्धश्च बाधितः । मकरैर्बडिशैर्जालैर्मत्स्यवत् पाटितो हतः ॥ ३९ ॥
व्याधाभैर्वज्रलेपाद्यैर्गृहीतपक्षिवद् ह(धृ)तः । कुठाराद्यैर्द्रुम इव, छिन्न-पाटित-कुट्टितः ॥ ४० ॥
ढ्ढैश्चपेटा-मुष्ट्याद्यैश्चूर्णितो लोहवद् घनैः । तप्तायस्त्रपु-ताम्राणि, तृषार्त्तः पायितो बलात् ॥ ४१ ॥

मांसं तेऽभूत् प्रियं पूर्वं, स्वमांसमिति खादितः । स्मारयित्वा सुरां चैव, वसा-रक्तानि पायितः ॥ ४२ ॥
एवं नानाविधास्तीव्राः, परमाधार्मिकैः कृताः । सोढा मयाऽतिभीतेन, वेदना नरकेऽन्वहम् ॥ ४३ ॥
मनुष्यलोके यादृक्षा, दृश्यन्ते तीव्रवेदनाः । ताभ्योऽनन्तगुणास्तातानुभूता नरके तु (तु) ताः ॥ ४४ ॥
एवं भवेषु सर्वेष्वनुभूता वेदना मया । सुखोचितत्वं किं तस्य, प्रव्रज्या दुष्कराऽथवा ॥ ४५ ॥
पितरावूचतुस्तं तु, प्रव्रज स्वेच्छयाऽऽत्मज ! । निष्प्रतिकर्मता तत्र, श्रामण्यं दुष्करं परम् ॥ ४६ ॥
सोऽवोचदेवमेवैतत्, पितृभ्यां यदिहोदितम् । प्रतिकर्म परं कोऽत्र, कुरुते मृग-पक्षिणाम् ? ॥ ४७ ॥
एकभूतो यथाऽरण्ये, चरति स्वेच्छया मृगः । तथा धर्मं चरिष्यामि, तपसा संयमेन च ॥ ४८ ॥
स्यात् मृगस्य यदातङ्को, महारण्ये प्रजायते । तिष्ठन्तं तरुमूलेषु, कश्चैनं हि चिकित्सति ? ॥ ४९ ॥
को वा तस्यौषधं दत्ते ?, सुखं पृच्छति चा(वाऽ)स्य कः ? । भक्तं वा कोऽस्य पानं वा, समानीय समर्पयेत् ?॥५०॥
यदा सुखी भवत्येष, तदा गच्छति गोचरम् । स्वेच्छया भक्तपानार्थं, वल्लरेषु सरस्सु च ॥ ५१ ॥
पीत्वाऽम्भो भक्ष्यमास्वाद्य, सरस्सु वल्लरेषु च । मृगचर्यां चरित्वा च, याति स्वाश्रयभूमिकाम् ॥ ५२ ॥
एवं समुत्थितो भिक्षुरूर्ध्वं गच्छत्यनेकगः । मृगवत् मुनिरप्येवं, निन्देद् भक्ष्यं न कर्हिचित् ॥ ५३ ॥
मृगचर्यां चरिष्यामि, पुत्रैवं ते यथासुखम् । पितृभ्यामित्यनुज्ञातस्त्यक्तवानुपधिं ततः ॥ ५४ ॥
स माता-पितरावेवमनुज्ञाप्य महाग्रहात् । तत्याज ममतां तावत्, महाहिरिव कञ्चुकम् ॥ ५५ ॥
ऋद्धिं वित्तं सुतान् दारान्, ज्ञातीन् मित्राणि सद्म च । स रजोवत् पटे लग्नं, निर्धूयोपाददे व्रतम् ॥ ५६ ॥

त्रिगुप्तः पञ्चसमितः, पञ्चमहाव्रतान्वितः । बाह्यान्तरभेदभिन्ने, तपःकर्मणि चोद्यतः ॥ ५७ ॥
निर्ममो निरहङ्कारो, निस्सङ्गस्त्यक्तगा[गौ]रवः । समश्च सर्वभूतेषु, त्रसेषु स्थावरेषु च ॥ ५८ ॥
लाभालाभे सुखे दुखे, जीविते मरणे तथा । समो निन्दा-प्रशंसासु, तथा मानापमानयोः ॥ ५९ ॥
गा(गौ)रवेषु कषायेषु, दण्ड-शल्य-भयेषु च । निवृत्तो हास(स्य)-शोकाभ्यामनिदानोऽप्यबन्धनः ॥ ६
इह लोके परलोके, विरागत्वादनिश्रितः । वासी-चन्दनकल्पश्चानशनेऽप्यशने तथा ॥ ६१ ॥
ज्ञानेन चरणेनैवं, तपसा दर्शनेन च । सद्भावनाभिरात्मानं, वासयित्वा समं ततः ॥ ६२ ॥
ततो बहूनि वर्षाण्याराध्य श्रामण्यमुत्तमम् । अर्द्धमासोपवासेन, मृगापुत्रो ययौ शिवम् ॥ ६३ ॥
उत्तराध्ययनैकोनविंशत्यध्ययनानुगः । सम्बन्धोऽयं मृगासूनोः, सङ्क्षेपाद् दर्शितो मया ॥ ६४ ॥

इति श्रीमुद्रित-ऋषिमण्डलवृत्तितः उद्धृता **श्रीमृगापुत्रकथा संपूर्णा.**

६१ श्री जिनदेवर्षिकथा

अर्हन्मित्रोऽभवत् श्रेष्ठी, द्वारवत्यामुपासकः । अनुद्धरीति तत्पत्नी, जिनदेवाह्वयः सुतः ॥ १ ॥
अन्येद्युरुग्ररोगेण, ग्रस्तोऽभूद् जिनदेवकः । वैद्यैर्विनाऽऽमिषं व्याधेर्न शान्तिरिति भाषितः ॥ २ ॥
पितृभ्यामपि रागेण, तदर्थमुदितस्तु सः । चक्रे नियमभङ्गं नो, प्रत्युतैवं व्यचिन्तयत् ॥ ३ ॥
"वरं प्रवेष्टुं ज्वलितं हुताशनं, न चापि भग्नं चिरसञ्चितं व्रतम् ।

न चापि शीलस्खलितस्य जीवितम् ॥ ४ ॥"
वरं हि मृत्युः सुविशुद्धकर्मणो, सावद्यं श्रेष्ठिनन्दनः ॥ ५ ॥
म्रियेऽहमिति सञ्चिन्त्य, दुस्साध्यव्याधिबाधया । प्रत्याचख्यौ स्वयं सर्वं, सावद्यं श्रेष्ठिनन्दनः ॥ ५ ॥
कदश्चित् प्रगुणः कर्मक्षयोपशमतोऽभवत् । पुण्यमेकं महत्तेजो, जागर्त्ति जगति स्फुटम् ॥ ६ ॥
प्रत्याख्यातं तथाप्येवं, परिव्रज्यां चकार सः । शुभध्यानवशात् प्राप, केवलं च क्रमात् शिवम् ॥ ७ ॥

इति श्रीमुद्रित-ऋषिमण्डलवृत्तितः उद्धृता श्री जिनदेवर्षिकथा संपूर्णाः

६२ श्री षण्मित्रर्षिकथा

श्रीसाकेतपुरे चन्द्रावतंसकनृपोऽभवत् । तत्सुतो मुनिचन्द्राख्यस्तद्दत्तं राज्यमन्वशात् ॥ १ ॥
निर्विण्णः काम-भोगेभ्यो, मुनिचन्द्रो नृपोऽन्यदा । भ्रातुः सागरचन्द्रस्योपान्ते व्रतमशिश्रयत् ॥ २ ॥
चचाल गुरुभिः सार्द्धमसौ देशान्तरं प्रति । ग्रामं प्रविष्टो भिक्षार्थं, सार्थभ्रष्टो बभूव च ॥ ३ ॥
अटव्यां क्षुत्-तृषाऽऽक्रान्तं, चत्वारो गोपदारकाः । सिषेविरे महर्षिं तं, पयोदानाच्चदर्शनैः ॥ ४ ॥
तस्य देशनया बुद्धाश्चत्वारो जगृहुर्व्रतम् । जुगुप्सां चक्रतुर्द्वौ तु, चत्वारोऽपि ययुर्दिवम् ॥ ५ ॥
चित्र—सम्भूतिजीवौ तौ, जुगुप्सावशतो भवान् । भ्रेमतुश्चाधमान् दास-मृग-मातङ्गसङ्कुलान् ॥ ६ ॥
द्वावप्यन्यौ दिवश्च्युत्वा, क्षितिप्रतिष्ठिते पुरे । सुताविभ्यकुलेऽभूतां, जाग्रत्पुण्योदयोन्मुखौ ॥ ७ ॥
चत्वारः सुहृदश्चान्येऽमिलन्निभ्यसुतास्तयोः । भुक्त्वा भोगान् षडप्यन्ते, धर्मं श्रुत्वा ललुर्व्रतम् ॥ ८ ॥

चिरमाराध्य चारित्रं, ते प्रान्ते प्रायपूर्वकम् । मृत्वाऽनतेरुः सौधर्मे, विमाने पद्मगुल्मके ॥ ९ ॥
चतुःपल्योपमान्यायुर्भुक्त्वा तत्रेभ्यसूनवः । कुरुदेशे चेषुकारपुरे चत्वार एव ते ॥ १० ॥
इषुकाराभिधो राजा, तत्प्रिया कमलावती । भृगुः पुरोधास्तत्पत्नी, यशेति क्रमतोऽभवन् ॥ ११ ॥ युग्मम्
नित्यं खिद्यतेऽपत्यार्थमत्यर्थं स पुरोहितः । देवोपयाचितं चक्रे, निमित्तज्ञान् स्म पृच्छति ॥ १२ ॥
ज्ञातवन्ताववधिना, तौ गोपदारकामरौ । यथोत्पत्स्यावहे ह्यावां, गृहे भृगुपुरोधसः ॥ १३ ॥
साधुवेषं ततः कृत्वा, पुरोधोगृहमीयतुः । ततो तेन सभार्येणोपविष्टौ नार्पितासने ॥ १४ ॥
भृगोरग्रे सभार्यस्य, धर्ममूचतुरार्हतम् । प्रबुद्धौ दम्पती श्राद्ध–धर्मं जगृहतुस्ततः ॥ १५ ॥
भृगुः पप्रच्छ चिन्ताऽऽर्त्तो, भक्त्या तौ श्रमणोत्तमौ । निर्ग्रन्थौ ! भविताऽपत्य–योगः स्यादावयोरपि ? ॥ १६ ॥
वाचं वाचंयमावेतावूचतुश्चतुरोचिताम् । भवतोर्भविता भद्रौ ! (विप्रौ !), पुत्रयुग्मं गृहेऽनिरात् ॥ १७ ॥
केवलं बालकालेऽपि, प्रव्रजिष्यति तद् द्वयम् । कार्यो नाऽऽर्यैस्तस्य विघ्नो, बोधयिष्यति तद् बहून् ॥ १८ ॥
इत्युक्त्वा तौ गतौ देवौ, ततश्च्युत्वा पुरोधसः । पत्न्याः कुक्षाववतीर्णौ, तौ पुत्रत्वेन तत्क्षणात् ॥
(गृहे पुत्रौ समुत्पन्नौ, सुस्वप्नसूचितौ क्रमात्) ॥ १९ ॥
ततः पुराद् भृगुस्तस्थौ, प्रत्यन्तग्राममेत्य सः । प्रसूता युगपत् तत्र, भृगुपत्नी सुतद्वयम् ॥ २० ॥
व्युद्ग्राहितौ पितृभ्यां तौ, गृह्णीत इति मा व्रतम् । गृह्णन्ति डिम्भरूपाणि, यथा प्रव्रजिता अमी ॥ २१ ॥
भक्षयन्ति च तन्मासं, भूयारतां तेषु माऽन्तिकम् । ततोऽन्यदा तौ क्रीडन्तौ, ग्रामाद् बहिरुपेयतुः ॥ २२ ॥

इतश्च दैवात् तत्रैयुरध्वखिन्ना महर्षयः । तान् निरीक्ष्य भयभ्रान्तौ, भृगुपुत्रौ पलायितौ ॥ २३ ॥
एकं वटद्रुमारूढौ, मध्याह्ने मुनयोऽपि हि । गृहीतशुद्धपानान्नास्तत्रैवैयुर्विधेर्वशात् ॥ २४ ॥
विश्रम्य क्षणमेकान्ते, विधिवद् भोजनं व्यधुः । आरूढौ पश्यतस्तौ तु, शुद्धं भक्तं न चाऽऽमिषम् ॥ २५ ॥
ततस्तौ चक्रतूरूहापोहं क्वापीदृशा दृशा । दृष्टा आसन्नथोत्पेदे, प्राग्जातिस्मृतिरेतयोः ॥ २६ ॥
प्रबुद्धौ तान् मुनीन् नत्वाऽऽयातौ पित्रोरुपान्तिकम् । प्रबोध्य पितरौ ताभ्यां, सार्द्धं जगृहतुर्व्रतम् ॥ २७ ॥
महिष्या बोधितो भूभृदेवं ते सुहृदोऽपि षट् । प्रव्रज्य केवलज्ञानं, प्राप्य प्रापुः क्रमात् शिवम् ॥ २८ ॥
उत्तराध्ययनचतुर्दशाध्ययनतस्तयोः । प्रबोध(ध्य)वाक्यविस्तारो, ज्ञेयो नोक्तोऽत्र गौरवात् ॥ २९ ॥

इति श्रीमुद्रित—ऋषिमण्डलवृत्तितः उद्धृता श्री षणमित्रर्षिकथा सम्पूर्णा

६३ श्री संयतराजर्षिकथा

श्रीकाम्पील्यपुराधीशः, संयताख्यो नृपोऽभवत् । प्रतापतपनाऽऽक्रान्तपृथुप्रत्यर्थिपार्थिवः ॥ १ ॥
मृगव्यां स गतोऽन्येद्युर्गजाश्व—रथपत्तिभिः । परीवृतश्चतुर्दिक्षु, नृत्यद्वाजिगतः स्वयम् ॥ २ ॥
हयारूढोऽवधीद् भूपः, केसरोद्यानगान् मृगान् । मन्यमानः कृतार्थं स्वं, भयत्रस्तांस्तपस्विनः ॥ ३ ॥
अथ तत्र नृपोऽद्राक्षीद्, धर्मलीनं तपोधनम् । द्रुमाकीर्णमण्डपस्थं, स्वाध्याय—ध्यानबन्धुरम् ॥ ४ ॥
अश्वारूढोऽवधीत् तत्र, मुनिपार्श्वगतान् मृगान् । हतांस्तत्राऽऽगतोऽद्राक्षीत्, मुनीन्द्रं च महीपतिः ॥ ५ ॥

दध्यौ हृदि स सम्भ्रान्तो, हा ! मनागा(ग) हतो मुनिः । मन्दभाग्येन मयका, रसगार्द्धया(गृद्ध्याऽ-)र्दितेन च ॥६॥
मुक्त्वाऽश्वं चरणान् साधोर्ववन्दे विनयात् नृपः । कृताञ्जलिपुटश्चोचे, क्षमस्वाऽऽगोऽत्र मे मुने ! ॥ ७ ॥
अथासौ भगवान् मौनमालम्ब्य ध्यानतः स्थितः । न प्रतिवक्ति राजानं, ततः सोऽभूद् भयद्रुतः ॥ ८ ॥
नृपोऽवक् संयतोऽस्म्यस्मि, भूपो व्याहर मां मुने ! । नरकोटीर्दहेत् क्रुद्धो, यत् मुनिस्तेजसा ज्वलन् ॥ ९ ॥
राज्ञेत्युक्ते मुनिरूचेऽभयं तेऽभयदो भव[वेः] । अनित्ये जीवलोकेऽस्मिन्, हिंसायां रमसे कथम् ? ॥ १० ॥
राजन् ! सर्वं परित्यज्य, गन्तव्यमवशस्य ते । अनित्ये जीवलोकेऽस्मिन्, किं राज्ये प्रसजस्यहो ! ? ॥ ११ ॥
जीवितं चैव रूपं च, विद्युत्सम्पातचञ्चलम् । राजन् ! मुह्यसि यत्र त्वं, प्रेत्यार्थं नावबुध्यसे ॥ १२ ॥
दाराः सुताः सुहृद्वर्गो, बन्धवश्च सहोदराः । जीवन्तमनुजीवन्ति, मृतान्[तं] नानुव्रजन्त्यपि ॥ १३ ॥
निष्कासयन्ति पितरं, दुःखिता मृतमात्मजाः । तथा तेऽपि मृतं पुत्रमतो राजन् ! तपश्चरेः ॥ १४ ॥
ततस्तेनार्जितैर्द्रव्यैः, कलत्रैः परिरक्षितैः । क्रीडन्त्यन्ये नरा राजन् ! हृष्ट–तुष्टाः स्व(-स्त्व)लङ्कृताः ॥ १५ ॥
तेनापि यत् कृतं कर्म, शुभं वाऽप्यथवाऽशुभम् । कर्मणा तेन संयुक्तोऽवशो याति भवान्तरे ॥ १६ ॥
इति वैराग्यकृद्धर्मं, श्रुत्वा तस्यान्तिके मुनेः । भृशं संवेग-निर्वेदं, समापन्नो नराधिपः ॥ १७ ॥
ततो राज्यमसौ त्यक्त्वा, निष्क्रान्तो जिनशासने । गर्दभालेर्भगवतोऽनगारस्यान्तिके नृपः ॥ १८ ॥
सामाचारीं ततोऽभ्यस्यन्, मुनेराचारगोचराम् । संयतो विहरन्नागात्, सन्निवेशं तथाविधम् [तदाधिपम्] ॥१९॥
इतश्च कश्चिद् देवत्वं, प्राप्योत्पद्यामले कुले । कुतश्चिद् हेतुतो ज्ञातप्राग्जन्मोपाददे व्रतम् ॥ २० ॥

विहरन् संयतं तत्र, वीक्ष्यर्षिरिदमुक्तवान् । यथा ते दृश्यते रूपं, प्रसन्नं च मनस्तथा ॥ २१ ॥
पुनः प्रपच्छ किंनामा ?, को गोत्रोऽर्थाय कस्य वा ? । माहनः(न !) सेवसे बुद्धान् ?, विनीतो वोच्यसे कथम् ? ॥
सोऽप्यूचे संयताख्योऽहं, तथा गोत्रेण गौतमः । विद्याचरणयुक्ता मे, गुरवो गर्दभालयः ॥ २३ ॥
सोऽपृष्टोऽप्याख्यदज्ञानं, विनयं चा(वा)क्रियां क्रियाम् । चतुर्भिः स्थानकैरेभिर्मे यज्ञाः किं ब्रुवन्ति भोः ! ॥२४॥
इत्याविरकरोद् बुद्धो, ज्ञातकः परिनिर्वृतः । विद्या–चरणसम्पन्नः, सत्यः सत्यपराक्रमः ॥ २५ ॥
पतन्ति नरके घोरे, येऽसत्प्ररूपका नराः [ये चासत्यप्ररूपकाः]। निषेव्याऽऽर्या धर्ममार्ये[-र्यं !], दिव्यां गच्छन्ति सद्गतिम्॥
म[मा]योक्तं सर्वमेतत् तु, मृषाभाषा निरर्थका । संयच्छन्नेव तिष्ठाम्युपाश्रये यामि गोचरे ॥ २७ ॥
सर्वेऽमी विदितास्ते मेऽनार्या मिथ्यादृशो यथा । जानामि सम्यगात्मानं, विद्यमाने भवान्तरे ॥ २८ ॥
पुनस्तं संयतोऽपृच्छत्, प्रेत्य जानासि तत् कथम् ? । उत्कृष्टायुर्महाप्राणे, स ऊचे प्राग्भवेऽभवम् ॥ २९ ॥
विमानाद् ब्रह्मलोकाख्यात्, च्युत्वाऽहं मनुजोऽभवम् । यथा तथाऽऽत्मनोऽन्येषां, जानाम्येवायुरादिकम् ॥३०॥
नानारुचिं च छन्दं च, संयतः परिवर्जयेत् । अनर्थांश्चापि व्यापारान्, विद्यामित्यनुसञ्चरेः[रे] ॥ ३१ ॥
निवर्त्तेः[र्त्तें]परमन्त्रेभ्यः, प्रश्नादिभ्यस्तथा पुनः । उच्छ्रितोऽहो ! अहोरात्रं, विद्वानिति तपश्चरेः ॥ ३२ ॥
क्षत्रियस्तेन पृष्टोऽवगायुः पृच्छसि यच्च माम् । तत् प्रादुष्कृतवान् बुद्धस्तज्ज्ञानं जिनशासने ॥ ३३ ॥
सत्क्रियां रोचयेद् धीरो, वर्जयेच्चाप्यसत्क्रियाम् । सद्दृष्ट्या दृष्टिसम्पन्नो, धर्मं सेवस्व दुश्चरम् ॥ ३४ ॥
उपदिश्यैतदखिलं, क्षत्रियः संयतं मुनिम् । स्थिरीकर्त्तुं पुनः पूर्वनरोदाहरणान्यवक् ॥ ३५ ॥

तान्युत्तराध्ययनाष्टादशाध्ययनतो बुधैः । ज्ञेयानि ग्रन्थबाहुल्यात्, नोक्तान्यत्र मया पुनः ॥ ३६ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तित उद्धृता श्री संयतराजर्षिकथा संपूर्णः

६४ श्री अनाथीमुनिकथा

सिद्धान् साधून् नमस्कृत्यानुशिष्टिमर्थ(-र्घ्य)धर्मगाम् । कथ्यमानां मया तथ्यां, शृणुतोत्तमदेहिनः ! ॥ १ ॥
श्रेयःश्रेणिर्नृपः श्रेणिकाख्योऽन्येद्युर्बहिर्ययौ । अश्ववाहनिकाक्रीडार्थं चैत्ये मण्डिकुक्षिके ॥ २ ॥
तस्मिन् नानाद्रुमाकीर्णे, कानने नन्दनोपमे । साक्षाद् धर्ममिवाद्राक्षीत्, मुनीन्द्रं द्रुतले नृपः ॥ ३ ॥
रूपं वीक्ष्यास्य भूजानिस्तेजोऽतिक्रान्तभास्करम् । स विस्मयमना जज्ञे, तुष्टाव स्पष्टयन् वचः ॥ ४ ॥
अहो ! रूपमहो ! वर्णोऽहो ! आर्यस्यास्य सोमता । अहो ! क्षान्तिरहो ! मुक्तिरहो ! भोगेष्वसङ्गता ॥ ५ ॥
नृपस्तस्य क्रमान् नत्वा, कृत्वा तिस्रः प्रदक्षिणाः । नाऽऽसन्ने नातिदूरे(र)स्थः, पप्रच्छेदं कृताञ्जलिः ॥ ६ ॥
तारुण्ये भोगकाले त्वं, प्राव्राजीश्चोत्थितो व्रते । एनमर्थमहं तावत्, शृणोम्यनु तवोदितम् ॥ ७ ॥
मुनिराख्यदनाथोऽस्मीश ! नाथो मे न विद्यते । न कञ्चिदपि पश्यामि, सुहृदं चानुकम्पकम् ॥ ८ ॥
ततः प्रहसितो राजा, श्रेणिको मगधाधिपः । एवमृद्धिमतस्तेऽत्र, कथं नाथो न विद्यते ? ॥ ९ ॥
भुङ्क्ष्व भोगान् मुने ! नाथो, भयत्राणं भवामि ते । मित्र-ज्ञातिपरिवृतो, मानुष्यं हि सुदुर्लभम् ॥ १० ॥
मुनिराहाऽऽत्मनैव त्वमनाथः श्रेणिकाऽसि भोः ! । आत्मनैव ह्यनाथः सन्, कस्य नाथो भविष्यसि ? ॥ ११ ॥

स एवं मुनिना प्रोक्तः, सुसम्भ्रान्तः सुविस्मितः । श्रुत्वेत्यश्रुतपूर्वं तद्, वचश्चोवाच पार्थिवः ॥ १२ ॥
हस्तिनोऽश्वा मनुष्या मे, पुरमन्तःपुरं च मे । भुञ्जे मानुष्यकान् भोगाना–ज्ञैश्वर्यं च मेऽधिकम् ॥ १३ ॥
सम्पत्प्रकर्ष ईदृक्षे, सर्वकामा(कर्मा)र्पणक्षमे । कथं भवाम्यनाथोऽहं १, मा भदन्त ! मृषा वद ॥ १४ ॥
मुनिराह नार्थं पृच्छां(प्रोच्छां,-प्रोत्थां वा), वेत्स्यनाथस्य पार्थिव ! । यथा ह्यनाथो भवसि, सनाथस्य(श्च)नराधिप! (:) ।
राजन् ! कथयतः शृण्वव्याक्षिप्तेन हृदा मम । यथा नाथो भवेत् प्राणी, यथा प्रवर्त्तितं मया ॥ १६ ॥
अत्र पूरस्ति कौशाम्बी, पुराणपुरभेदिनी । ममाऽऽसीद् जनकस्तत्र, प्रभूतधनसञ्चयः ॥ १७ ॥
वयसि प्रथमे राजंस्तदानीं वेदनाऽतुला । बभूव सर्वगात्रेषु, दाघः(हः) स्वाघोद्भवो मम ॥ १८ ॥
शस्त्रं यथा (यथात्रास्त्रं) महातीक्ष्णं, शरीरविवरान्तरे । आपीडयेदरिः क्रुद्ध इत्थं मे वेदनाऽभवत् ॥ १९ ॥
त्रिकं ममाऽऽन्तरेच्छा चोत्तमाङ्गं पीडयते भृशम् । इन्द्राशनिसमा घोरा वेदनाऽऽसीत् तदा मम ॥ २० ॥
उपस्थिता ममाचार्या, विद्या-मन्त्रचिकित्सकाः । अधीताः शास्त्रकुशला, मन्त्र-मूलविशारदाः ॥ २१ ॥
ते मे चिकित्सां कुर्वन्ति, चतुष्पादां यथाहितम् । मोचयन्ति च नो दुःखात्, तदेषाऽनाथता मम ॥ २२ ॥
सर्वसारमपि पिता, मदर्थं दत्तवान् परम् । न मोचयति दुःखाच्च, तदेषाऽनाथता मम ॥ २३ ॥
माताऽपि मे महाराज !, पुत्रशोकार्दिता परम् । न मोचयति दुःखाच्च(मे दुखं,-खात्), तदेषाऽनाथता मम ॥२४॥
ज्येष्ठाः कनिष्ठाश्चैकोदरोद्भवा मे सहोदराः । न(वि)मोचयन्ति(नो)दुःखाच्च(त्), तदेषाऽनाथता मम ॥ २५ ॥
ज्येष्ठाः कनिष्ठा मे राजन् !, भगिन्यश्चैकमातृकाः । विमोचयन्ति नो दुःखात्, तदेषाऽनाथता मम ॥ २६ ॥

भार्याऽपि मे महाराज ! साऽनुरक्ता त्वनुव्रता । नेत्राभ्यामश्रुपूर्णाभ्यामुरः सिञ्चति मेऽधिकम् ॥ २७ ॥
अन्यदन्नं च पानं च, स्नानं माल्य–विलेपनम् । अज्ञातं वा मया ज्ञातं, सा भुङ्क्ते नैव कर्हिचित् ॥ २८ ॥
नापयाति क्षणमपि, सा बाला पार्श्वतो मम । विमोचयति नो दुःखात्, तदेपाऽनाथता मम ॥ २९ ॥
ततोऽहमुक्तवानेवं, दुस्सहा एव वेदनाः । सकृदाभ्यश्चेत् मुच्येयं, ततो गृह्णामि संयमम् ॥ ३० ॥
एवमुक्त्वा तथा ध्यात्वा, प्रसुप्तोऽस्मि नराधिप ! । रात्रौ ततोऽतिक्रामन्त्यां, वेदना मे क्षयं गता ॥ ३१ ॥
प्रभातेऽहं ततः कल्यः, सर्वानापृच्छ्य बान्धवान् । क्षान्तो दान्तो निरारम्भः, प्रापद्ये चानगारताम् ॥ ३२ ॥
ततोऽभवमहं नाथ आत्मनश्च परस्य च । त्रसाणां(नां) स्थावराणां च, सर्वेषां प्राणिनामपि ॥ ३३ ॥
आत्मा नदी वैतरणी, ममात्मा कूटशाल्मली । आत्मा कामदुघा धेनुरात्मा मे नन्दनं वनम् ॥ ३४ ॥
कर्त्ता विकरि(कर,-किर)ता चात्मा, दुःखस्य च सुखस्य च । आत्मा मित्रममित्रं(त्रश्)च, दुष्प्रस्थितः सुप्रस्थितः ॥३५॥
नृपैपाऽनाथताऽन्याऽपि, शृणु तामेकचित्ततः । निर्ग्रन्थत्वं यदासाद्य, सीदन्त्येकेऽधमा नराः ॥ ३६ ॥
यः प्रव्रज्य व्रतान्युच्चैः, प्रमादात् स्पृशतीह न । रसगृध्रोऽगृहीतात्मा, न च्छिनत्ति स बन्धनम् ॥ ३७ ॥
काचित् नायुक्तता यस्यास्तीर्या-भाषैषणादिषु । जुगुप्सनी(ना)यां नो धीर !, जातं मार्गमनुव्रजेत् ॥ ३८ ॥
चिरं मुण्डरुचिर्भूत्वा, तपोभ्रष्टोऽस्थिरव्रतः । आत्मानं क्लेशयित्वाऽपि, भवस्य स्यात् न पारगः ॥ ३९ ॥
पोल्ला मुष्टिर्यथाऽसारा, तथा कार्षापणोऽनृतः । राढामणिर्वैडूर्याग्रे, महर्घ्योऽज्ञेषु वै भवेत् ॥ ४० ॥
बृंहयित्वाऽऽजीविकायै, मुनिचिह्नं कुलिङ्गकम् । धृत्वा संयतमात्मानं, लपन् याति [नम्रुपयाति] विघाततताम् ॥४१॥

कालकूटं यथा पीतं, हन्ति शस्त्रं च दुर्धृतम् एवं विपययुग् धर्मो, व्यापन्नो हन्ति भूतवत् ॥ ४२ ॥
इत्यादिशिक्षणं श्रुत्वा, ज्ञानोपेतं सुभाषितम् । हित्वा मार्गं कुशीलानां, महर्षीणां व्रजेः पथा ॥ ४३ ॥
व्रताचारगुणोपेतः, प्रपाल्यानुत्तरव्रतम् । निराश्रवः क्षयं नीत्वा, कर्माप्नैती पदं ध्रुवम् ॥ ४४ ॥
एवमूचे महानिर्ग्रन्थीयं निर्ग्रन्थराडिदम् । महायशा महाप्राज्ञो, विस्तरेण यथाश्रुतम् ॥ ४५ ॥
तुष्टश्च श्रेणिको राजा, कृताञ्जलिरदोऽवदत् । अनाथत्वं यथाभूतं, सुष्ठु मे दर्शितं त्वया ॥ ४६ ॥
साधो ! लाभाः सुलब्धास्ते, सुलब्धं च नृजन्म ते । सनाथाश्च भवन्तोऽत्र, स्थिता मार्गे यदर्हताम् ॥ ४७ ॥
नाथस्त्वमस्यनाथानां, महर्षेऽखिलदेहिनाम् । भव[वि]ताऽऽत्मानमिच्छाम्यत्रानुशासयितुं मुने ! ॥ ४८ ॥
आपृच्छ्य ध्यानविघ्नस्ते, यत् मया विहितो मुने ! । निमन्त्रितश्च यद् भोगैस्तत् क्षमस्वाखिलं मम ॥ ४९ ॥
एवं स्तुत्वा स राट्सिंहो, मुनिसिंहं महादरात् । सावरोधः सतन्त्रश्च शुद्धचित्तोपलक्षितः ॥ ५० ॥
उच्छ्वसितरोमकूपस्ततः कृत्वा प्रदक्षिणाम् । अभिवन्द्य च शीर्षेण, स्वस्थानमगमत् नृपः ॥ ५१ ॥ [युग्मम्]
गुणैः समृद्धश्चान्योऽपि, विप्रमुक्तो विहङ्गवत् । विजहारोर्वरापीठं, नष्टमोहस्तपोनिधिः ॥ ५२ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृता श्री अनाथिमुनिकथा संपूर्णा.

६५ श्री अन्निकापुत्रर्षिकथा.

अस्त्यत्र भरतक्षेत्रे, मथुरानंगरीद्वयम् । तत्रोत्तरस्यां दिश्येका, दक्षिणस्यां परा पुनः ॥ १ ॥

अथोत्तरमथुरातस्तां याम्यमथुरापुरीम् । आगादेको वणिक्पुत्रो, दिग्यात्रार्थं महार्थवान् ॥ २ ॥
तत्रत्यश्रेष्ठिनैकेनामुष्य सख्यमभूत् समम् । न्यमन्त्रि तेन भुक्त्यर्थं, तस्याङ्गं ह्येतदादिमम् ॥ ३ ॥
भोजनायोपविष्टेऽस्मिन्, श्रेष्ठिनोऽस्य स्वसाऽन्निका । तालवृन्तकरा वातोपचौरस्तमुपाचरत् ॥ ४ ॥
तस्याः स श्रेष्ठिम् रूपं, निर्वर्ण्य वर्णनातिगम् । पादादारभ्य शीर्षान्तं, रागग्रस्तोऽभवत्तराम् ॥ ५ ॥
साऽर्थिता स्वजनैरुक्तमेनां दद्मस्तदा वयम् । यद्याद्यापत्यसम्पत्तिं, यावत् त्वमिह तिष्ठसि ॥ ६ ॥
तथैव स्वीकृते तेन, जातोद्वाहोऽत्र तिष्ठति । समुखं साऽन्नि(न्न)काऽन्येद्युर्गुर्व्यभूद् गृह(हि) धर्मतः ॥ ७ ॥
इतश्च लेखस्तत्पित्रोरागात् तत्र लिपीकृतम् । यदश्रुभिर्दृशोः शोकाद्, वत्साऽऽन्ध्यं बाधतेऽधिकम् ॥ ८ ॥
जीवन्तौ प्रेक्षसे चेत् नौ, तदागच्छेर्द्रुतं सुत ! । मुञ्चन्नश्रूणि तं लेखं, वाचयामास दारकः ॥ ९ ॥
दृष्टः पृष्टस्तया नोचे, वाचयित्वा ततः स्वयम् । उक्तो मा खिद्यथा भर्त्तः !, सर्वं भव्यं भविष्यति ॥ १० ॥
ततस्तयोदितं पित्रोस्ताभ्यां प्रस्थापितोऽथ सः । सकलत्रोऽर्द्धमार्गेऽपि, प्रासूत सुतमन्निका ॥ ११ ॥
करिष्यतोऽभिधां सूनोः, पितराविति तेन न । मार्गे तस्यार्पितं नाम, पितृवक्त्रा हि सत्सुताः ॥ १२ ॥
उल्लापयन् परिजनोऽन्निकापुत्रस्तमित्यवक् । सम्प्रायातस्तदेवास्य, पितरौ नाम चक्रतुः ॥ १३ ॥
ववृधे चन्द्रलेखेवाऽन्निकापुत्रः पितुर्गृहे । ययौ च यौवनवनक्रोडं क्रोड इवोन्मदः ॥ १४ ॥
तदैव लघुकर्मत्वात्, त्यक्तभोगोऽग्रहीद् व्रतम् । विजहाराऽन्निकासूनुर्भूत्वाऽऽचार्यः क्रमात् महीम् ॥१५॥
पुष्पभद्रपुरेऽन्येद्युरागात् गङ्गातटस्थिते । पुष्पकेतुर्नृपस्तत्र, तत्प्रिया पुष्पवत्यभूत् ॥ १६ ॥

सा पुत्र–पुत्रिकारूपं, प्रासूत युगपद् युगम् । अन्योन्यं प्रेमसंयुक्तमपत्यमिव युग्मिनाम् ॥ १७ ॥
तद् वीक्ष्याचिन्तयद् भूपो, म्रियते हि वियोजितम् । तदेतद् गृहिधर्मत्वे, योजयामि परस्परम् ॥ १८ ॥
जनापवादरक्षार्थं, सदस्याहान्यदा नृपः । यदत्रोत्पद्यते रत्नं, सभ्याः ! स्यात् कस्य तद् वशे ? ॥ १९ ॥
सर्वे तेऽप्यूचिरे राज्ञे(ज्ञो), राजोचे तर्हि युग्मयोः। योजयामि विवाह भोः ! स्वर्ण–मण्योरिवैतयोः ॥ २० ॥
पुष्पचूल–पुष्पचूलयोर्द्वयोर्युग्मजन्मनोः । राजा राज्ञ्या निषिद्धोऽपि, चक्रे पाणिग्रहोत्सवम् ॥ २१ ॥
मिथस्तावभिरेमाते, श्राविका पुष्पवत्यपि । तस्मात् प्रव्रज्य निर्वेदाद्, देवोऽभूत् परमर्द्धिकः ॥ २२ ॥
पुरे तस्मिन् मृते ताते, पुष्पचूलो नृपोऽभवत् । प्रियेऽवधेरधिस्नेहां ददर्शाऽम्बासुरः स[सु]ताम् ॥ २३ ॥
मा नरकेऽव्रगात्सोऽपि स्वप्ने तानित्यदर्शयत् । रात्रौ रात्रौ ततो भीता, पुष्पचूलाऽऽह भूभुजम् ॥ २४ ॥
प्रातः पाखण्डिनः पृष्टा, राज्ञाऽऽहुस्ते यथा तथा । अनिकास्तनवस्तेषां, स्वरूपमिदमभ्यधुः ॥ २५ ॥
नित्यान्धकाराः बीभत्साः क्षुत्–तृड्–रोगाग्रनिग्रहैः । नारकैर्नित्यमाक्रान्ताः, स्मृता अपि भयावहाः ॥ २६ ।
तयोक्तं भगवन् ! स्वप्नः किमत्र ददृशे ? यतः । यथार्थं वित्थ तेऽप्युचुर्विज्ञोऽर्हद्वचनैर्वयम् ॥ २७ ॥
देवलोकाः पुनः कालान्तरेऽस्या दर्शितास्तया । पुनः पाखण्डिनः पृष्टा, वैपरीत्येन चाभ्यधुः ॥ २८ ॥
यथास्थानन्निकापुत्राचार्यां प्रोचुरथाऽऽह सा । देवलोकाः कथं लभ्याः ?, कथं न नरके गतिः ? ॥ २९ ॥
तैरुक्तः साधुधर्मोऽथ(-त्र), राज्ञी पप्रच्छ पार्थिवम् ।
व्रतार्थं सोऽवदद् भिक्षा, प्राह्या खलु (यद्यादत्से भिक्षां) [illegible] ॥ ३० ॥

प्रपद्य तत् तया दीक्षा, गृहीता सूरयोऽप्यथ । तस्थुर्जङ्घाबलक्षीणा, गणं प्रस्थाप्य तत्र तु[नु] ॥ ३१ ॥
पुष्पचूला नृपावासाद्, भक्तमानीय यच्छति । गुरुभ्यः शुभभावेनोत्पेदेऽस्याः केवलं क्रमात् ॥ ३२ ॥
प्राक्प्रवृत्तं न विनयं, भनक्ति किल केवली । कालोचितं मनश्चिन्त्यं, भक्तं तेभ्यः स्म यच्छति ॥ ३३ ॥
श्लेष्मघ्नं श्लेष्मणः काल इत्याद्यवसरोचितम् । भक्तं हृच्चिन्तितं वत्से !, वेत्सि किं ? सूरयोऽवदन् ॥ ३४ ॥
अन्ये त्वाहुर्घने वर्षत्यानीतेऽन्नेऽथ तेऽभ्यधुः । किमेतत् साध्वि ! साऽऽहाऽऽगां, प्रासुकाम्भसि सूरयः ! ॥३५॥
प्रासुकाप्रासुकविधिं, वेत्सि वत्से ! घने कथम् ? । साऽऽहातिशयतः कीदृग् ?, स तु केवललक्षणः ॥ ३६ ॥
केवल्याशातना चक्रे, हा ! चक्रुः सूरयोऽधृतिम् । सोचे चोत्तरतां गङ्गां, केवलं भावि वोऽपि हि ॥ ३७ ॥
उत्तस्थुर्द्रुतमाचार्याः, को लाभे ह्यलसायते ? । गङ्गायां नावमारूढाः, स्वयं सज्जीकृतां जनैः ॥ ३८ ॥
यत्राऽन्निकासुताऽऽचार्यास्तस्थुः कोणे तथान्तरा । तत्र मज्जति नौः क्षिप्ता, जनैश्चोत्पाट्य तेऽम्भसि ॥ ३९॥
सुरेणाम्भस्यधःशूलं, दध्रेऽस्य प्राग्भवारिणा । तेन विद्धः शुभध्यानात् , केवलज्ञानमाप सः ॥ ४० ॥
सिद्धश्च निर्मितो देवैर्महिमा तस्य वर्ष्मणः । प्रयागं नाम तत् तीर्थं, पप्रथे तत्र विश्रुतम् ॥ ४१ ॥
कलेवरं जलचरैः, खाद्यमानं तदम्भसि । गङ्गाकूले क्वचित् लग्नं, प्रेर्यमाणं जलोर्मिभिः ॥ ४२ ॥
दैवाद् दक्षिणदंष्ट्रायां, पाटलेर्बीजमाविशत् । भित्त्वा करोटिं तद् जज्ञे, शाड्वलः पाटलिद्रुमः ॥ ४३ ॥
तेनोपलक्षिते स्थाने, पाटलीपुत्रपत्तनम् । उदायिभूभुजा न्यस्तं, कूणिकस्य पितुः शुचा ॥ ४४ ॥

इत्यन्निकासूरीणां, सम्बन्धोऽधिकसम्पदाम् । आवश्यकानुसारेणाऽऽविष्कृतः कृतिनां मुदे ॥ ४९ ॥

इति श्रीमुद्रित--ऋषिमण्डलप्रकरणवृत्तित उद्धृता श्री अन्निकापुत्रर्षिकथा संपूर्णा

६६ श्री धर्मरुचिकथा

रोहीतके पुरे जी(जू)र्णगणिका रोहिणीत्यभूत् । अनन्यजीविकोपाया राप्नोति गोष्ठिकोदनम् ॥ १ ॥
संस्कृतं संस्कृतद्रव्यैः, कटुतुम्बं तयाऽन्यदा । स्वयं स्वादु[द]परीक्षार्थं, दत्तस्तद्विन्दुराननै ॥ २ ॥
अतीवकटुको लग्नस्तदेकत्रैव रक्षितम् । अन्यल्ललितगोष्ठयर्थं, पक्वं मा निन्दिताऽभवम् ॥ ३ ॥
गोष्ठयां गतायां भुक्त्वाऽन्नं, मासक्षपणपारणे । मुनिर्धर्मरुचिः प्राप्तो, भिक्षार्थं रोहिणीगृहम् ॥ ४ ॥
दत्तं तुम्बं तयाऽ[त]स्मै मा, मुधा याति[द्] धियेति तत् । अपूर्वलाभं मन्वानः, स गत्वाऽऽलोचयद् गुरोः ॥५॥
ज्ञातं[त्वा]विषोपमं तत् तैर्मुनिरुक्तो बहिस्त्यज । भक्षितं मृत्यवे ह्येतत्, तत् त्यक्तुं स गतोऽटवीम् ॥ ६ ॥
मुञ्चतः पात्रकं भूमौ, लिप्तस्तेन मुनेः करः । लुपितस्तत्र गन्धेनाऽऽयाता मङ्क्षु कीटिकाः ॥ ७ ॥
भूयसामङ्गिनां घातः, स्यात् ममैव मृतिर्वरम् । इति ध्यात्वा प्रतिलिख्य, मुमुक्षुर्मुखपोतिकाम् ॥ ८ ॥
एकत्र स्थण्डिले स्थित्वा, निन्दंस्तद् भुक्तवांस्ततः । तीव्राऽभूद् वेदना सम्यग्, विपह्याऽऽप शिवश्रियम् ॥ ९ ॥

इति श्रीमुद्रित--ऋषिमण्डलवृत्तितः उद्धृता श्री धर्मरुचिकथा संपूर्णा

६७ श्री चतुर्महर्षिकथा

चम्पायां कौशिकार्याख्य उपाध्यायोऽभवद् द्विजः । तस्याऽङ्गर्षिस्तथा रुद्रः, शिष्यावेतौ बभूवतुः ॥ १ ॥
अङ्को भद्रकस्तेनाऽङ्गर्षिस्तस्याभिधाऽभवत् । रुद्रको रौद्रहृद् ग्रन्थिच्छेदकस्तत्तथाऽस्य सा ॥ २ ॥
एधोऽर्थमन्यदा प्रेपिताबुभौ गुरुणा वने । सायमङ्गर्षिः काष्ठान्यादायाऽऽयाद् ऋजुवर्त्मना ॥ ३ ॥
रन्त्वा सर्वदिनं रमृत्वा, तमर्थं रुद्रकोऽचलत् । दध्यौ वीक्ष्य तमायान्तमद्य निस्सारितोऽस्मि हा! ॥ ४ ॥
इतश्च वत्सपालस्य, पन्थकस्य शिशोः प्रसूः । दत्त्वा ज्योतिर्यशा भक्तं, दारुभारार्दितैति च ॥ ५ ॥
तां हत्वैकत्र गर्त्तायां, लात्वाऽस्या दारुभारकम् । एत्यान्यवर्त्मना रुद्रो, धुन्वन् हस्तावदोऽवदत् ॥ ६ ॥
गुरो ! सुन्दरशिष्येण, तव ज्योतिर्यशा हता । स आगतो बहिर्निष्कासितः क्रोधाद् ययौ वनम् ॥ ७ ॥
चिन्तयंस्तत्र सद्ध्यानाद्, जातजातिस्मृतिर्व्रतम् । प्रपद्य केवलं लेभे, महिमाममरा व्यधुः ॥ ८ ॥
अभ्याख्यानं ददौ रुद्रोऽस्मै जनेभ्योऽभ्यधुः सुराः । निन्द्यमानो जनैर्दध्यौ, रुद्रोऽदः शुभकर्मतः ॥ ९ ॥
अभ्याख्यानं मयाऽसत्यं, प्रदत्तमिति चिन्तयन् । सम्बुद्धः सोऽभवत् प्रत्येकबुद्धश्चाग्रहीद् व्रतम् ॥ १० ॥
उपाध्यायः सभार्योऽपि, वैराग्याद् व्रतमग्रहीत् । उत्पाद्य केवलज्ञानं, चत्वारोऽपि ययुः शिवम् ॥ ११ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तित उद्धृताः श्री चतुर्महर्षिकथा सम्पूर्णा

६८ श्री देविलासुतर्षिकथा

उज्जयिन्यामभूत् पुर्यां, पार्थिवो देविलासुतः । अनुरक्तलोचनाऽऽख्या, प्रियाऽस्याऽऽरक्तलोचना ॥ १ ॥
नृपोऽन्यदाऽस्ति[ऽऽस्ते] शय्यायां, विवृणोति प्रिया कचान् । तदन्तः पलितं दृष्टं, जरालक्षणमक्ष[-लक्षि-]तम् ॥२॥
साऽऽह देवाऽऽगतो दूतः, सम्भ्रान्तो भूमिभृद् भृशम् । उत्थायेतस्ततः पश्यन्नापश्यत् तं तयोदितम् ॥ ३ ॥
क्वासौ प्रिये ! नृपोऽपृच्छत् ?, धर्मदूतस्तु साऽवदत् । तयाऽऽवेष्टय ततोऽङ्गुल्या, शनैः पलितमुद्धृतम् ॥ ४ ॥
आच्छाद्य क्षौमयुग्मेन, स्वर्णस्थाले पुरान्तरे । भ्रामयित्वा तमधृतिं, चक्रे भूपो भृशं हृदि ॥ ५ ॥
प्रापुर्मेऽनागतेऽप्यस्मिन् प्रव्रज्यां पूर्वजव्रजाः । ततः पद्मरथं राज्याधिष्ठातारं सुतं व्यधात् ॥ ६ ॥
स्वयं राज्ञ्या समं राजा, तापसव्रतमग्रहीत् । तथाऽनुमतिका दासी, दासः सङ्गतकोऽपि च ॥ ७ ॥
सर्वे सितगिरौ जग्मुस्तपोऽर्थं तापसाश्रमे । कालान्तरे व्रतं त्यक्त्वा, दासी दासश्च जग्मतुः ॥ ८ ॥
गर्भः पूर्वमनाख्यातो, महिष्या ववृधे तदा । अयशोभीरुणा राज्ञी, भूभुजा रक्षिता रहः ॥ ९ ॥
सौकुमार्यात् सुतां राज्ञी, प्रसुवाना व्यपद्यत । पिबन्ती स्तन्यमन्यासां, तापसीनां च सैधते ॥ १० ॥
कृतं नामार्द्धसंकाशा, तस्याः सा प्राप यौवनम् । अटव्या आगतं तातं, श्रान्तं विश्राम्यति स्म सा ॥ ११ ॥
सुकुमारकरस्पर्शात्, तस्यां रक्तोऽभवत् नृपः । गृह्णामि चाद्य कल्ये वा, चिन्तयन्निति तस्थिवान् ॥ १२ ॥
तामाश्लेष्टुमधाविष्टोटजकाष्ठे नृपोऽन्यदा । चस्खाल(स्खलनाद्-)चिन्तयत् चित्ते, धिङ् मां कामान्ध[न्ध्य]बाधितम्॥१३

प्रेत्य न ज्ञायते किं स्यादेतच्च फलमैहिकम् ? । सम्बुद्धश्चावधिज्ञानं, लेभे कर्मक्षयोद्भवम् ॥ १४ ॥
सर्वकामविरक्तेन, भाव्यं भोः ! खलु देहिना । त्रभाषेऽध्ययनं चेतद्, राजर्षिर्देविलासुतः ॥ १५ ॥
विरक्तां तां सुतां दत्त्वा, संयतीभ्यः स्वयं नृपः । उत्पाद्य केवलं सिद्धोऽर्द्धसङ्काशाऽपि निर्वृता ॥ १६ ॥
इति श्रीमुद्रित–ऋषिमण्डलप्रकरणवृत्तितः उद्धृता देविलासुतर्षिकथा संपूर्णा.

६९ श्री धन्यमहर्षिकथा

बभूव पुर्यां काकन्द्यां, जितशत्रुर्नृपाग्रणीः । सार्थवाहवधूस्तत्र, भद्रानाम्न्यस्ति विश्रुता ॥ १ ॥
धन्याख्योऽभूद् यथार्थोऽस्याः, सूनुरन्यूनदीप्तिमान् । कन्या द्वात्रिंशतं मात्रोद्यौवनः परिणायितः ॥ २ ॥
मात्रा द्वात्रिंशदावासा, द्वात्रिंशद्दायसंयुताः । तदर्थं कारिता भोगान्, भुङ्क्ते तदुपरि स्थितः ॥ ३ ॥
इतश्च समवासार्षीत्, श्रीवीरस्तत्पुरो बहिः । वन्दनाय(या)ययौ धन्य, उद्यद्रोमाञ्चकञ्चुकः ॥ ४ ॥
धर्मं श्रुत्वाऽऽप्तवैराग्योऽपृच्छद् व्रतकृते प्रसूम् । राजार्पितराज(ज्य)चिह्नस्फीत्या धन्योऽश्रयद् व्रतम् ॥ ५ ॥
व्रताहेऽपि प्रभुं नत्वा, जग्राहोग्रमभिग्रहम् । षष्ठपारणकं यावज्जीवमाचाम्लतोऽस्तु मे ॥ ६ ॥
ग्राह्या भिक्षा न संसृष्टाऽसंसृष्टाऽस्तु तथोज्झिता । इत्युग्रतपसाऽऽत्मानं, भावयन् विजहार सः ॥ ७ ॥
भक्तासिक्थेत् कथञ्चित् स्यात्, नाप्तिस्तस्याम्भसां पुनः । पठन्नेकादशाङ्गानि, सेहे क्षुत्–तृट्परीषहम् ॥ ८ ॥
इत्युग्रतपसाऽत्यर्थं, कृशीयान् सोऽभवत् मुनिः । न मनागपि दीनत्वं, तथापि क्वापि जग्मिवान् ॥ ९ ॥

एत्य राजगृहं वीरश्चैत्ये गुणशिले स्थितः । देशनान्ते प्रभुम् नत्वा, पप्रच्छ श्रेणिकस्त्विदम् ॥ १० ॥
स्वामिस्ते गौतमादीनां, शिष्याणां शीलशालिनाम् । चतुर्दशसहस्राणां, को दुष्करतपःक्रियः ॥ ११ ॥
स्वाम्याह राजन् ! धन्यर्षिः, सर्वेषूग्रतपा भृशम् । एतत् श्रुत्वा प्रभुम् नत्वाऽऽगत्य धन्यं नृपोऽनमत् ॥ १२ ॥
धन्यः सुलब्धजन्माऽसि, यत् त्वां वीरजिनः स्वयम् । एवं वर्णयतीत्युक्त्वा नत्वाऽगात् श्रेणिको गृहम् ॥ १३ ॥
वर्ण्यमानोऽप्यसावेवं, नैवोत्कर्षमगात् मनाक् । पालयामास चारित्रं, नवमासानखण्डितम् ॥ १४ ॥
मासिक्या संलेखनया, कालं कृत्वोदपाद्य(द)सौ । सर्वार्थसिद्धे चोद्धृत्य, विदेहे शिवमाप्स्यति ॥ १५ ॥

इति श्रीऋषिमण्डलप्रकरणवृत्तितः उद्धृता धन्यमहर्षिकथा संपूर्णा.

७० श्री शीतलाचार्यकथा

श्रीहास्तिनपुरे वज्रसिंहः सिंहवलो नृपः । सौभाग्यमञ्जरी तस्य, प्रिया पुत्रस्तु शीतलः ॥ १ ॥
त्रैलोक्यसुन्दरी पुत्री, सा काञ्चनपुरप्रभोः । कञ्चनप्रभराजस्य, यौवने परिणायिता ॥ २ ॥
निर्विण्णः काम-भोगेभ्यः, कुमारः शीतलोऽन्यदा । प्राव्राजीत् स्थविरोपान्ते, सूरिश्चासीद् बहुश्रुतः ॥ ३ ॥
आसंस्त्रैलोक्यसुन्दर्याश्चत्वारः सूनवः क्रमात् । तेषां कथान्तरे नित्यं, सा वर्णयति शीतलम् ॥ ४ ॥
यथा वो मातुलो राज्यनिःस्पृहः शिश्रिये व्रतम् । कालो यात्येवमन्येद्युस्तत्रेयुः स्थविर्षयः ॥ ५ ॥
निशम्य तदुपान्ते तेऽसारतां संसृतेर्भृशम् । प्रबुद्धा जगृहुर्दीक्षां, क्रमाद् जाता बहुश्रुताः ॥ ६ ॥

मातुलं शीतलाचार्यं, गुरुमापृच्छ्य वन्दितुम् । प्रचेलुस्तेऽन्यदा जग्मुस्तत्पावितपुरो बहिः ॥ ७ ॥
बहिर्विकाल इत्यस्थुस्ते देवकुलिकान्तरे । यान्तं पुरान्तः श्राद्धं तेऽवोचन् वाच्यं गुरोरदः ॥ ८ ॥
आत्तव्रतास्ते जामेया, वन्दितुं वो यदैयरुः । विकाल इति नाऽऽजग्मुरुक्तेऽहृष्यद् गुरुर्भृशम् ॥ ९ ॥
तत्र तेषां शुभध्यानादुत्पेदे केवलं निशि । प्रातस्ते तत्र नाऽऽयातास्ततो(दा) दध्यौ गुरुर्ध्रुवम् ॥ १० ॥
ते सूत्रपौरुषीं कृत्वैष्यन्ति तत्रापि नाऽऽययुः । अथाऽर्थ(-पार्धं) पौरुषीं तत्राप्यैयुर्नैते ततो गुरुः ॥ ११ ॥
स्वयमुत्कण्ठितोऽचालीत्, नाभ्युत्तस्थुर्न ते क्रमौ । प्रामार्जयन् वीतरागा, गुरोर्न्यस्य सदण्डकम् ॥ १२ ॥
प्रतिक्रम्याऽऽलोच्य सूरिस्तान् वन्दे कुत ? इत्यवक् । प्रतिभाति यतस्ते ते वन्दस्वेत्यवदन् गुरुम् ॥ १३ ॥
निस्त्रपत्वमहो ! धार्ष्ट्यमेषामित्येष रोषतः । ववन्दे तान् मुनीन् सूरिर्वन्दित्वा तस्थिवान् पुरः[रा] ॥ १४ ॥
प्राक्प्रवृत्तं न(-त्तम-)विनयं, भि(भ)नत्ति(क्ति) किल केवली । जीतकल्पोऽयमित्येषां, तेषां (गुरौ) तस्मिन् न चास्ति सः॥
तेऽवोचन् वन्दिता द्रव्यवन्दनेन पुरा पुनः । वन्दध्वं भाववन्दनविधिना विधिनाऽधुना ॥ १६ ॥
कषायदण्डकैर्वन्दमानं पश्यन्ति ते गुरुम् । पट्स्थानपतितं सोऽवग्, ज्ञायते किमदोऽपि हि ? ॥ १७ ॥
तेऽप्यूचुः सुतरां विद्मः, कथं ? नोऽतिशयोऽस्ति यत् । छाद्मस्थिकः कैवलिकः ?, प्रोचुः कैवलिकं च ते ॥ १८ ॥
हहा ! केवलिनो मन्दभाग्येनाऽऽशातिता मया । निनिन्द भृशमात्मानं, शीतलः शीतलाशयः ॥ १९ ॥
जातरोमोद्गमस्तोषात्, परं संवेगमागतः (-मत्) । ददानो वन्दनं सूरिः, दण्डकेभ्यो निवृत्तवान् ॥ २० ॥
क्रोधाद् यथा पुराऽवध्नात्, कर्माण्याच्छोटयत् तथा । प्रविष्टोऽपूर्वकरणं, शुभाभिप्रायसम्भवम् ॥ २१ ॥

चतुर्थंवन्दनस्यान्ते, शीतलः प्राप केवलम् । सैकैव कायिकी चेष्टाऽभूद् हेतुर्बन्ध–मोक्षयोः ॥ २२ ॥

इति श्रीमुद्रित–ऋषिमण्डलप्रकरणवृत्तितः उद्धृता शीतलाचार्यकथा संपूर्णा.

७१ श्री अवन्तिसुकमालर्षिकथा

सुहस्तिसूरिरन्यत्र, विहृत्योज्जयिनीं पुरीम् । जीवन्तस्वामिप्रतिमां, नमस्कर्तुमगात् पुनः ॥ १ ॥
स्थित्वा तद्बहिरुद्याने, सूरिः प्रैषीत् मुनिद्वयम् । उपाश्रयार्थं तद् भद्राश्रेष्ठिनीगृहमागमत् ॥ २ ॥
स्ववाहनकुटी तेभ्यो, भक्त्या नत्वाऽर्पिता तया । सगच्छाः सूरयस्तस्थुस्तत्र सन्तोषशालिनः ॥ ३ ॥
प्रदोषे नलिनीगुल्माख्याध्ययनं सुहस्तिभिः । परावर्तितुमारेभे, शुभभावाभिनर्दकम् ॥ ४ ॥
अवन्तिसुकुमालाख्यः, पुण्यवान् श्रेष्ठिनीसुतः । स्त्रीभिर्द्वात्रिंशता सप्तभूगृहस्थो ललत्यलम् ॥ ५ ॥
ददावध्ययने कर्णं, सम्यक् श्रोतुमनास्ततः । भद्रासूस्तत उत्तीर्य, वसतिद्वारमाययौ ॥ ६ ॥
मयाऽनुभूतं क्वापीदं, भद्रासूश्चिन्तयन्निति । नलिनीगुल्मविमाने, प्राक्स्वस्या(प्राक्तना-)वस्थानमस्मरत् ॥ ७ ॥
गन्तुं तत्रोत्सुकोऽत्यर्थं, गुरून् नत्वाऽथ सोऽवदत् । प्रभोऽहं प्रव्रजिष्यामि, प्रव्राजयत मां द्रुतम् ॥ ८ ॥
प्राहाऽऽर्यः सुकुमारोऽसि, भाद्रेयोऽभिदधे प्रभो ! । सामाचारीं चिरं पालयितुं नेशोऽस्मि दुश्चराम् ॥ ९ ॥
तेन सानशनां दीक्षामादास्येऽहं समुत्सुकः । सूरिणाऽभाणि बन्धून् स्वांस्तत् पृच्छ सुकृ(स्वव्र)तकृते ॥ १० ॥
वेश्मैत्य तेन ते पृष्टाः, सादरं नानुजज्ञिरे । स्वयं केशानिव क्लेशांस्ततोऽसावुदमूलयत् ॥ ११ ॥

प्रव्रज्यागाद् गुरूपान्तमात्तलिङ्गो भवेत् स्वयम् । इति प्रव्राजयामास, भद्रापुत्रं सुहस्त्यपि ॥ १२ ॥
व्रतकष्टं चिरं सोढुम–सहिष्णुः सुहस्तिनम् । आपृच्छ्यानशनचिकीर्षयौ पितृवनं मुनिः ॥ १३ ॥
कन्थारिकाकुडङ्गान्तस्तस्थावु(-रस्थादु-)त्सर्गयोगवान् । असृगास्त्रावविस्राणि, लिहाना तत्पदान्यथ ॥ १४ ॥
विवेश जम्बूकी काचित्, क्षुत्क्षामा सशिशुस्तदा । पादं खादितुमारेभे, सैकं तच्छिशवोऽपरम् ॥ १५ ॥
मेने तां पादखादित्रीं, पादसंवाहिकामिव, स मुनिर्निश्चलध्यानाधरीकृतसुराचलः ॥ १६ ॥
चटच्चटिति तच्चर्म, त्रटत्त्रटिति जाङ्गलम् । धगद्धगिति मेदश्च, कटत्कटिति कीकसम् ॥ १७ ॥
तत्पादं भक्षयन्ती साऽऽद्ये यामे निरशेषयत् । द्वितीयं डिम्भरूपाणि, न पुनः तन्मुनेर्मनः ॥ १८ ॥
यामे द्वितीये तस्योरू, तृतीये तुन्दमप्यथ । तुर्ये यामे विपद्यासौ, नलिनीगुल्ममासदत् ॥ १९ ॥
रञ्जितैर्निर्ममत्वेन, निर्ममे महिमाऽमरैः । तद्भार्यास्तमपश्यन्त्यः, पप्रच्छुर्गौरवाद् गुरुम् ॥ २० ॥
ज्ञात्वा ज्ञानेन वृत्तान्तं, तस्याऽऽख्यन् सूरयोऽखिलम् । पत्न्यो गत्वा शशंसुस्तद्, भद्रायै साऽप्यगाद् वनम् ॥२१॥
दृष्ट्वाऽऽकृष्टं च नैऋत्यां, भद्रा सूनोः कलेवरम् । रुरोद विललापोच्चैः, स्ववधूभिर्वृता प्रगे ॥ २२ ॥
वत्स ! नालङ्कृथा गेहमेकस्मिन्नपि वासरे । प्रव्रज्य पर्यहार्षीर्मां, निर्मोहत्वाद् गुरूंश्च किम् ? ॥ २३ ॥
रात्री भवित्री कल्याणी, काऽपि हा दैव ! कर्हिचित् । या स्वप्ने दर्शयित्वा त्वामस्मान् सञ्जीवयिष्यति ॥२४॥
एवं विलप्य बहुधा, भद्रा सिप्रानदीतटे । तस्योर्ध्वदेहिकं चक्रे, क्रन्दन्ती करुणस्वरम् ॥ २५ ॥
चक्रिरे शल्योद्धरणं, तत्प्रियाः क्लिन्नवाससः । मुक्त्वैकां गुर्विणीं भद्रा, प्राव्राजीत् स्ववधूवृता ॥ २६ ॥

गुर्विण्या जातपुत्रेण, पितृमृत्यूपलक्षिते । स्थाने चक्रे महादेव–कुलमुत्तुङ्गतोरणम् ॥ २७ ॥
तदद्यापि महाकालाख्यमवन्तिविभूषणम् । वर्त्तते कालदोषेण, मिथ्यादृग्भिरधिष्ठितम् ॥ २८ ॥
काले सुहस्त्यपि गुरुर्निजगच्छभारं, न्यस्यान्तिषद्यनुपमश्रुतवारिराशौ ।
प्रायं विधाय निजकायममयं विहाय, स्वर्लोकमस्तकमणिप्रभुतां प्रपेदे ॥ २९ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृता श्री अवन्तिसुकुमालकथा संपूर्णा

७२ श्री कार्तिकश्रेष्ठिकथा

जितशत्रुरभूद् भूपः, कुरुषु हस्तिनापुरे । सहस्राष्टवणिक् श्रेष्ठः, श्रेष्ठ्यासीत् तत्र कार्त्तिकः ॥ १ ॥
श्राद्धः श्रद्धाधरः श्राद्धप्रतिमानामसौ शतम् । चकाराद्वैतसम्यक्त्वो, जीवाजीवादितत्त्ववित् ॥ २ ॥
तत्राऽऽगादन्यदा मासोपवासी गैरिकाभिधः । गतानुगतिको लोकस्तं कार्त्तिकमृतेऽर्चति ॥ ३ ॥
मृगयत्यस्य छिद्राणि, सोऽनन्यगतिकोऽन्यदा । निमन्त्रितः पारणार्थं, राज्ञे वीक्ष्याह स क्षणम् ॥ ४ ॥
पारयामि तदा राजन्!, परिवेषयति कार्त्तिकः । यदा मां नान्यथाऽवश्यं, नृपोऽज्ञासीत् तदाग्रहम् ॥ ५ ॥
ततः समस्तसामन्तसमेतस्तद्गृहं गतः । ससम्भ्रमः समुत्थाय, तं श्रेष्ठीति व्यजिज्ञपत् ॥ ६ ॥
देवपादैः कथं पादैरद्य मत्सद्म पावितम् ? । समादिश ममादेशं, महानुग्रहसङ्ग्रहम् ॥ ७ ॥
पार्थिवः स्वार्थसिद्ध्यर्थमूचे श्रेष्ठिन्! पुरं मम । प्रकाश्यते त्वयैकेन, रविणेवाब्जमण्डलम् ॥ ८ ॥

परिवेषय मद्गेहे, भुञ्जानस्य तपस्विनः । गैरिकस्येति मे कृत्यं, परं त्वय्येव तिष्ठति ॥ ९ ॥
श्रेष्ठ्याहास्माकमाचारो, नायमाचारकोविद ! । परं त्वत्पुरवासित्वात्, करिष्येऽदो हृदो विना ॥ १० ॥
तपस्वी पारणायाऽऽगादुत्सुको नृपमन्दिरे । औत्सुक्यं पारणे हि स्याद्, विशेषे तादृशे किमु ? ॥ ११ ॥
घृष्टोऽऽसीति वदन् दुष्टश्चालयत्यङ्गुलिं निजाम् । ददत् राजाभियोगेन, चित्ते श्रेष्ठीत्यचिन्तयत् ॥ १२ ॥
प्रागेव प्राव्रजिष्यं चेन्नाभविष्यत् पराभवः । ममायमिति निर्वेदास्पदीचक्रे निजं मनः ॥ १३ ॥
सथैत्यात्यन्तसंवेगात्, श्रीमुनिसुव्रतान्तिके । नैगमाष्टसहस्रेण, सार्द्धं श्रेष्ठी श्रितो व्रतम् ॥ १४ ॥
पपाठ द्वादशाङ्गानि, द्वादशाब्दानि च व्रतम् । प्रपाल्य कल्पे प्रथमे (सौधर्मे), सौधर्मेन्द्रो बभूव सः ॥ १५ ॥
तपस्वी वाहनं जज्ञेऽस्याभियोगिककर्मणा । तं ज्ञात्वाऽवधिनाऽनश्यद्, बद्ध्वाऽऽनीतोऽङ्गरक्षकैः ॥ १६ ॥
तमारूढो हरिर्नागं, सोऽमर्षात् स्वं द्विधाऽकरोत् । चक्रे द्वैरूप्यमिन्द्रोऽपि द्वैरूप्येणाऽऽरुरोह च ॥ १७ ॥
चक्रे यावन्ति रूपाणि, तावन्त्येव हरिर्व्यधात् । आहतो मुष्टिनाऽनश्यद्, वज्रिणा वज्रपाणिना ॥ १८ ॥
स्वकर्म चिन्तयंस्तस्थौ, पश्चात् पश्वाकृतिं भजन् । तपस्वी वासवोऽपीत्थं(द्धं), भुञ्जानो स्तः सुखं दिवि ॥ १९ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृता श्री कार्तिकश्रेष्ठिकथा सम्पूर्णा.

७३ महेश्वरदत्तकथा

तथाहि तामलिप्त्याख्यपुर्यां श्रेष्ठ्यभवत् पुरा । नाम्ना महेश्वरदत्तः, समुद्र–बहुलाऽऽत्मजः ॥ १ ॥

लोभाभिभूतस्तत्तातः, प्रभूताऽऽरम्भ सम्भवः, । मृत्वा तत्रैव देशेऽभूत्, सैरिभो ही ! (हा !) भवो(वे)ऽद्भवः ॥ २ ॥
तदाऽऽर्त्तिबहुला मृत्वा, बहुलाऽप्यभवत् शुनी । गाङ्गिलाऽऽख्या महेश्वरदत्तस्याऽऽस्ते प्रिया प्रिया ॥ ३ ॥
गृह[रहः]स्थैकाकिनी रेमे, समं जारेण साऽसती । स्त्रीणामेकाकिनीनां हि, कामाग्निर्बा[-मोऽङ्के बा-]धतेऽधिकम् ॥
रममाणां प्रियां भर्त्ता, जारेण सममन्यदा । अन्यद्वारागतोऽकस्माद् ददर्शाहो हि पच्यते ॥ ५ ॥
तौ स्रस्तकुन्तलौ त्रस्तनेत्रौ, कम्प्रवपुर्लतौ । सोऽपश्यद् रतमीत्याऽऽत्तपरावर्त्तोत्तरीयकौ ॥ ६ ॥
धृत्वा केशेषु जारं स, भल्लूकं व्याधवत् क्रुधा । चपेटाभिरिवाविष्टं, मान्त्रिकस्तमकुट्टयत् ॥ ७ ॥
ममर्द निर्दयं पद्भ्यां, कुलाल इव मृत्तिकाम् । यष्टिभिः कुर्कुरमिव, सापराधमताडयत् ॥ ८ ॥
प्रणश्यार्द्धमृतो जारः, किञ्चिद् गत्वाऽपतद् भुवि । मूर्खोऽकार्षं मुमूर्षुः किं ?, कण्ठस्थासुरचिन्तयत् ॥ ९ ॥
मृत्वा स्वबीज एवासौ, पुत्रभूयमवाप्तवान् । कालेन गाङ्गिला सूनुं, सुषुवे सुखवेदनम् ॥ १० ॥
तमात्मजातं मन्वानः, श्रेष्ठी कुण्डमलालयत् । वर्द्धमानः कूर्चकचाऽऽकर्षकार्हो बभूव सः ॥ ११ ॥
ततश्च पुंश्चलीदोषं, पुत्रप्रेम्णा महेश्वरः । गाङ्गिलाया विसस्मार, प्रायः स्त्रीष्वार्द्रहृद् गृही ॥ १२ ॥
अथाऽऽयाते पितुर्मृत्युवासरावसरोत्सवे । सोऽक्रीणात् पितृजीवं तं, महिषं मूर्खशेखरः ॥ १३ ॥
तं हत्वा महिषं मांसं, क्रोडस्थकुण्डसूनवे । ददानोऽश्नाति श्रेष्ठी स्म, धिगज्ञानं हि देहिनाम् ॥ १४ ॥
कुर्कुरी बहुलाजीवः, समांसं पतिकीकसम् । कटकटिति कुर्वाणा, नृत्यत्पुच्छा चचर्व च ॥ १५ ॥
इतश्च कश्चिदायातस्तद्गेहे मासपारणे । भिक्षार्थं भिक्षुरद्राक्षीद्, ज्ञानेनैतद् विरूपकम् ॥ १६ ॥

अनात्तभिक्षो व्यावृत्तो, धावित्वाऽऽह महेश्वरः । हृष्टोऽस्मि न चाभक्तो, भिक्षाऽऽत्ता किं न मद्गृहात् ? ॥१७॥
मुनिराहेदृशे गेहे, भिक्षाऽऽदानं न साम्प्रतम् । एकं हि मांसमशुचि, परं तदपि वप्तृजम् ॥ १८ ॥
कथमेतदिति पृष्टे, श्रेष्ठिनाऽऽचष्ट साधुराट् । पुत्रः पित्रामिषैः शत्रुः, पोष्यते हा ! धिगज्ञताम् ॥ १९ ॥
कः प्रत्यय ? इति पृष्टे, सार्थेशेन मुनिर्जगौ । शुनीं पृच्छ निखातं प्राग्, न्यस्तं सोऽपि तथाऽकरोत् ॥२०॥
तत्राऽऽनीता शुनी जातिस्वभावाद् भुवमंघ्रिभिः । सा चखान खनित्राभैः, शिष्वार्थमिव तस्य तु [नु] ॥२१॥
जातप्रत्ययतस्तीव्रवैराग्याच्च महेश्वरः । उपादत्त मुदा दत्तपात्रवित्तो जिनव्रतम् ॥ २२ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तितः उद्धृता श्रीमहेश्वरदत्तकथा संपूर्णा.

७४ श्री नागदत्त श्रेष्ठिकथा

कस्मिंश्चिन्नगरे नाग–दत्तो नाम वणिक्पुरा । हर्म्यनिर्मापकं कारु–मित्थं गर्वात्समादिशत् ॥ १ ॥
तथा रञ्जय हर्म्यं मे, तद्यावत्सप्त पूरुषान् । तिष्ठेदेकेन रूपेण, मालिन्यं न भवेद्यथा ॥ २ ॥
कुतोऽपि सहसाऽऽयात–स्तत्समीपस्थितो मुनिः । श्रुत्वा तस्य तथा वाक्यं, चकार सहजं स्मितम् ॥ ३ ॥
अनन्तरं नागदत्तो, भोक्तुं स्वगृहमागमत् । क्रोडे कृत्वा सुतं भोक्तुं, पीठे समुपविष्टवान् ॥ ४ ॥
तस्मिन्नेव क्षणे पुत्रो, भक्तस्थाल्याममूत्रयत् । श्रेष्ठी मूत्रं पराकृत्य, भोक्तुमारभताऽघृणः ॥ ५ ॥
दैवात्तत्र समायातो, भिक्षार्थं स मुनिः सुधीः । मोहयुक्तां दशां नाग–दत्तस्य दृष्टवांस्तथा ॥ ६ ॥

तद्दृष्ट्वा स पुनः किञ्चि–ज्जहास मुनिपुङ्गवः । नीत्वा भिक्षां प्रतस्थौ च, शोचन् श्रेष्ठिधियं मुहुः ॥ ७ ॥
अथ श्रेष्ठी नागदत्तः, स्वापणे गतवान् पुनः । उद्घाट्य च कपाटं स, स्वासने समुपाविशत् ॥ ८ ॥
वधिकस्य करान्मुक्त्वा, छागलस्तत्क्षणो गृहे । श्रेष्ठिनः प्रविवेशाशु, प्राणरक्षणकाम्यया ॥ ९ ॥
तस्माद्याचितवान् पश्चा–द्वधिकश्छागलं निजम् । अथवा तस्य मूल्यं स, यल्लोकेषूचितं मतम् ॥ १० ॥
वधिकाय स निष्कास्य, प्रादाच्छ्रेष्ठी गृहादजम् । भूयो मुनिः स तत्रैव, गच्छन् प्राप्तो विधेर्वशात् ॥ ११ ॥
निर्दयत्वं विलोक्यास्य पुनरेव स्मितं मुनिः । चकार नागदत्तस्तद्, दृष्ट्वा सन्देहमाप्तवान् ॥ १२ ॥
उपाश्रये ततो गत्वा, मुनेः पार्श्वे जगाद च । वारत्रयं मुने ! कस्मा–ज्जहसे त्वयका वद ॥ १३ ॥
ततो ज्ञानी मुनिस्तस्य, कारणं सकलं जगौ । मोहग्रन्थिविभेदाय, नागदत्तस्य श्रेष्ठिनः ॥ १४ ॥
कारुस्त्वया पुराऽऽदिष्टो, हर्म्यस्य रञ्जनाय यत् । किन्तु सप्त दिनान्येव, तवायुरवशिष्यते ॥ १५ ॥
स्मितं कृतं मया तस्मात, यदल्पायुर्जनः स्वयम् । गृहरूपं चिरस्थायि, कर्तुं मोहात्समीहते ॥ १६ ॥
यत्पुत्रमूत्रितस्थाल्यां भोजनं कृतवानसि । स पुत्रस्तव भार्याया, जारः पूर्वभवेऽभवत् ॥ १७ ॥
तद्दृष्ट्वाऽपि स्मितं मेऽभूद्–यल्लोकः कीदृशः कुधीः । मूत्रं स्वभार्याजारस्य, पिबत्यादरतोऽघृणः ॥ १८ ॥
निष्कापितस्त्वया यश्च, छागलः स्वापणात्सहि । पूर्वजन्मपिता तेऽस्ति, विद्धि सर्वानृतं वचः ॥ १९ ॥
तद्दृष्ट्वा सहजं हासं, कृतवानहमञ्जसा । पितरं शरणाऽऽयातं, बलान्निःसारयत्यसौ ॥ २० ॥
तच्छ्रुत्वाऽनागदत्तोऽसौ, सहसोत्थाय विस्मितः । वधिकस्य गृहं गत्वा, ततश्छागमयाचत ॥ २२ ॥

जगाद वधिकः श्रेष्ठिन् ! छागोऽसौ पच्यते गृहे । चुल्लिकायामधिश्रित्य, जीवनास्त्यधुना तु सः ॥ २२ ॥
संसारासारतां बुध्वा, निर्वेदं प्राप्तवान् ततः । स्थिरधैर्यश्च हृदये भूयो, मुनीन्द्रशरणं ययौ ॥ २३ ॥
चारित्रं च ततः सद्यो, गृहीत्वा श्रेष्ठिपुङ्गवः आत्मकल्याणसिध्द्यै स, यत्नवानभवद्भृशम् ॥ २४ ॥
यावन्न मुनिवाक्येन, प्रत्यक्षेण विबोध्यते । उपदेशात्मकेनाथ, तावन्मोहस्य नो क्षयः ॥ २५ ॥
संसारमीदृशं ज्ञात्वा, तत्रैव निरता भृशम् । यतन्ते नात्मने लोका, हन्त मोहो दुरत्ययः ॥ २६ ॥
तन्नाशार्थं सदा लोकैः, श्रोतव्यस्तु सदागमः । येनान्तर्लोचनस्याशु, भवेदुद्घाटनं शुभम् ॥ २७ ॥

७५ निमित्तकथकमुनिकथा

अपृच्छन्मुनिमासाद्य, काचित्प्रोषितभर्तृका । कदामत्पतिरागन्ता, परदेशाद्द्रुतं वद ॥ १ ॥
ज्योतिर्ज्ञानेन मुनिराड्वाच तरुणीम्प्रति । पञ्चभिर्दिवसैर्भर्ता, तवाऽऽगन्ता वियोगिनि ! ॥ २ ॥
साऽतिहृष्टमना नारी, पत्युरागतिवासरे । कृत्वाऽथ निजशृङ्गारं, पाकं च सरसं तथा ॥ ३ ॥
पत्युः स्वागतसामग्रीं, नीत्वा तस्थौ निजाङ्गणे । मार्गं मुहुर्मुहुस्तस्य, प्रेक्षमाणा च तद्दिने ॥ ४ ॥
यथोक्तावसरे गेहे, पतिं दृष्ट्वा समागतम् । सत्कारं परया भक्त्या, चकार शुभमानसा ॥ ५ ॥
दशां दृष्ट्वा पतिस्तस्याः, कुलटात्वमशङ्कत । लोकानां हि मतिः पूर्वं, दुर्मार्गमनुधावति ॥ ६ ॥
किन्तु तस्याः परीक्षार्थं, तूष्णीं तस्थौ स दुर्मतिः । स्त्री प्रहृष्टा मुनेर्मार्गं, पश्यन्ती बहिरागमत् ॥ ७ ॥

आगते च मुनौ भक्त्या, सा सुभोज्यं ददौ सती । तद्दृष्ट्वा तत्पतिः क्रोधात्, तद्दोषे कृतनिश्चयः ॥ ८ ॥
कोशात् खड्गं समाकृष्य, जगाद तरुणीम्प्रति । कुलटे ! वद सत्यं मे, सम्बन्धः कोऽस्त्यनेन ते ॥ ९ ॥
तदा सा विस्मिता नारी, भविष्यत्कथनस्य तत् । वार्तां सर्वां मुनेस्तस्मै, कथयामास विस्तरात् ॥ १० ॥
किन्तु तस्य कुबुद्धेर्नो, विश्वासोऽभून्मनागपि । कर्पन्नेवासिमाचख्यौ, मुनिं न्यत्कारयन् क्रुधा ॥ ११ ॥
मुने ! वदाशु सत्यं मे वडवा प्रसविष्यते । किमियं तद्वचः श्रुत्वा, किशोरीं मुनिरुक्तवान् ॥ १२ ॥
निर्णयार्थं ततो दुष्टः, खड्गेनाश्वां व्यदारयत् । किशोरी च तदश्वा च, सीदन्त्यौ मृतिमापतुः ॥१३॥
मुनिश्च स्वकृतेनैतदनर्थं सकलं विदन् । प्रायश्चित्तार्थमाश्वेवानशनं कृतवान् शुचा ॥ १४ ॥
पूर्वं पश्चाच्च संवीक्ष्य, फलाफलमथो वदेत् । ज्ञानी मुनिः प्रियं सत्य,—मन्यथाऽनर्थ उद्भवेत् ॥ १५ ॥

७६ श्री मानपिण्डकथा

सर्वलब्धियुतोऽसि त्व-मित्येवमन्यसाधुभिः । स्तुतो गर्वेण लोकेभ्यो, मानपिण्डोऽभियाचनात् ॥ १ ॥
क्षुल्लको मुनिरेकोऽभूत्, सैकदा हासतापितः । संलापे मुनिभिर्गर्वा,—दुवाच चाचारमस्मरन् ॥ २ ॥
गुडमिश्रां घृतेनाक्तां, कल्ये सेवतिकामहम् । आनेष्यामि प्रभूतां चा,— वश्यं जानन्तु योगिनः ॥ ३ ॥
एवं कृतप्रतिज्ञोऽसौ, प्रातर्गत्वेभ्यसद्मनि । सेवतिकां ययाचेऽसौ, घृताक्तां गुडमिश्रिताम् ॥ ४ ॥
तस्यां सत्यामपि यावत्, कृपणा न ददाति सा । तदा गर्वाज्जगौ योगी, नेष्याम्यहमिमां ध्रुवम् ॥ ५ ॥

साऽपि मोहाज्जगौ नारी, यद्येवं स्यात्तदा मया । घर्षणीया तदानासा, तच्छ्रुत्वोत्तेजितो मुनिः ॥ ६ ॥
देवदत्ताभिधं तस्याः, पतिं प्राप्य जगाद सः। षड्भ्यो यदीतरोऽसि त्वं, सप्तमश्चेत्ब्रुवे वचः ॥ ७ ॥
के ते षडिति पृष्टोऽसौ, मुनिरूचे यथाक्रमम् । षण्णां स्वरूपं वाक्येन, विशदेन विबोधयन् ॥ ८ ॥
याचिते भोजने पत्न्या, समादिष्टो दिवानिशम् । चुल्लिभस्मापनीयाग्नि,—ज्वालनादि क्रियां कुरु ॥ ९ ॥
तेन श्वेताङ्गुलिः स्त्रैणः, स श्वेताङ्गुलिरादिमः । लोकेषु कथितो मूर्खः, सदा स्त्रीपरिचारकः ॥ १० ॥
तडागात्प्रत्यहं वारि त्वयाऽऽनेयमिति स्त्रियाः। आज्ञयाऽह्नि ह्रिया नैव, रात्रौ किन्तु प्रयाति यः ॥ ११ ॥
उड्डयन्ते वकास्तेन, तडागे लोकविश्रुतः । द्वितीयोऽसौ बकोड्डायी, योषिदर्थेन स ध्रुवम् ॥ १२ ॥
स्नानाय सलिलं देही,—त्येवं याचितया स्त्रिया । आदाय स्नानसामग्रीं, गच्छ स्नाहि सरोजले ॥ १३ ॥
ततश्च शीघ्रमागच्छे,—त्यादिष्टस्तत्र मज्जनात् । तीर्थस्नाता स्मृतो लोके, भार्याज्ञाया वशंवदः ॥ १४ ॥
किंकरोमीति पृष्टाया, भार्याया वचसोऽनिशम् । प्रेषणादिक्रियां कुर्वन्, किंकरोऽसौ स्त्रिया मतः ॥ १५ ॥
यो हि भार्यासमादेशा,—दपत्यानामहर्दिवम् । वस्त्रप्रक्षालनक्रीडा,—मूत्रोत्सर्गादि कारकः ॥ १६ ॥
तेन दुर्गन्धवस्त्रादि,—युतोऽसौ हदनः स्मृतः । स्त्रीत्वेऽवशिष्यते यस्य, केवलं गर्भधारणम् ॥१७ ॥
भोजनायोपविष्टो यो, व्यञ्जनादीनि याचते । गृहाणेति स्त्रियाऽऽहूतो, रिङ्खन् याति तदन्तिकम् ॥ १८ ॥
गृध्ररिङ्खी जने ख्यातः, स भार्याभयविह्वलः । भार्याधीनाः षडेते ते, तेषु त्वमसि वा नहि ॥ १९ ॥
जगाद तद्वयस्कोऽन्य,—स्तत्रस्थो हास्यपूर्वकम् । षण्णां कार्यं करोत्येक—मेवासौ विद्धि निश्चितम् ॥ २० ॥

देवदत्तो जगादेत्थं, हास्यमेप करोति मे । निजाभीष्टं मुने ! ब्रूहि, यथाशक्ति करोमि तत् ॥ २१ ॥
गुडमिश्रां घृतेनाक्तां, देहि सेवतिकां तदा । याचितो मुनिनेत्थं स, स्वीकृत्योत्थाय चाऽचलत् ॥ २२ ॥
अवस्थाप्य मुनिं द्वारे, भार्यां कार्यान्तरच्छलात् । प्रेपयित्वाऽन्यतः सर्वं, मुनये याचितं ददौ ॥ २३ ॥
प्रसन्नः क्षुल्लकः पश्चात्, स्वनासाघर्षणेन ताम् । नासिकाघर्षणाय स्त्रीं, संज्ञयाऽसूचयद्रुतम् ॥ २४ ॥
पराघृत्य ततो हृष्टो, गुणं लब्धि निजां भृशम् । मुनीनामग्रतो भूयो, भूयो गर्वादवर्णयत् ॥ २५ ॥
एकदाऽऽलोचनाकाले, पृष्टोऽसौ गुरुणा पुनः । मूलोत्तरगुणाः क्वापि, खण्डिताः किं त्वया वद ॥ २६
मया सेवतिकाहेतो,—महानाडम्बरः कृतः । क्षुल्लकः प्रत्युवाचेत्थं गुरोः सत्यं वचस्तदा ॥ २७ ॥
श्रुत्वा प्राह गुरुः शिष्य !, मानपिण्डः सुसाधुभिः । वर्जनीयः सदा सर्वै,—र्विषयाननुरागिभिः ॥ २८ ॥
आलोचनां ततो लात्वा मानपिण्डेऽसुको:मुनिः । सुश्रामण्ये सदा सक्तः चिरं विहृतवान् भुवि ॥ २९ ॥

७७ लोभपिण्डे सुव्रतमुनिकथा

चम्पापुरे मुनिः कश्चि,—दासीच्छ्रीसुव्रताभिधः । ययौ प्रथमपौरुष्यां, गौचरीं नेतुमाश्रमात् ॥ १ ॥
भ्रमन् ददर्श पुर्यन्तः, जायमानां प्रभावनाम् । स्वजनादौ तदा सिंह—केसरमोदकस्य सः ॥ २ ॥
दृष्ट्वा हृदि व्यचारयत्, सिंहकेसरमोदकाः । ग्राह्या मयेति निश्चित्य, भिक्षार्थं तत्र जग्मिवान् ॥ ३ ॥
प्राप्तो न मोदकस्तस्मा,—न्निर्विण्णस्याटतो मुनेः । मध्याह्नसमयो जातः, केसरानेव ध्यायतः ॥ ४ ॥

मोदकासक्तचित्तोऽसौ, नष्टसंज्ञो गृहे गृहे । धर्मलाभपदस्थाने, जगाद सिंहकेसराः ॥ ५ ॥
एवं सर्वं दिनं भ्रान्त्वा, रात्रौ च भ्रमति स्म सः । आचारं स्वं निसस्मार, मोदकानेव चिन्तयन् ॥ ६ ॥
भ्रमतोऽस्य व्यतीयाय, रजनीप्रहरद्वयम् । ततः श्राद्धगृहें गत्वा, प्रोवाच सिंहकेशराः ॥ ७ ॥
अभ्युत्थानादिकं कृत्वा, श्रावको ह्यचिन्तयत् । अतर्कितमकाले च, मुनेरागमनं कथम् ॥ ८ ॥
क्षपकोऽद्यैव दृष्टोऽसा,—वप्रमत्तो मया पुरा । धनादिपूरितं गेहं, त्यक्त्वा प्रव्रजितोऽतृपः ॥ ९ ॥
गीतार्थश्चाप्ययं साधु,—स्तदा रात्राविहागतो । को हेतुस्तन्न जानामि, सहसेत्थमभूत्कुतः ॥ १० ॥
दोपानस्य सतो वच्मि, श्राद्धत्वं स्याच्च्युतं तदा । किञ्चागम्यं चरित्रं मे, महतां योगिनां सदा ॥ ११ ॥
परीक्षा किन्तु कार्या मे, किमस्ति हृदये मुनेः । विचिन्त्यैवं पुनर्दध्यौ, श्रावको धर्ममानसः ॥ १२ ॥
विपयाभिमुखी नास्य, चेष्टा नेहा धनेष्वपि । वस्त्रेणाच्छादितास्योऽसौ, भाषते क्राम्यति क्रमात् ॥ १३ ॥
अतो मूलगुणस्यायं, घातको नैव दृश्यते । किन्त्वाहाराभिकाङ्क्षाऽस्ति, ज्ञायते चेष्टितैः ! स्फुटम् ॥ १४ ॥
एवं विचार्य सुस्वादु, मिष्टान्नं विविधं पुरः । मुनेर्ढौकितवान् भक्त्या, श्रावको मतिमान् द्रुतम् ॥ १५ ॥
नेदं मर्माहमित्येवं, निपिध्धे मुनिना पुनः । श्राद्धो दध्यावयं साधु,—र्नास्ति मार्गच्युतो मनाक् ॥ १६ ॥
किन्त्वस्याभिग्रहः कोऽस्ति, ज्ञायतां तत्कथं मया । प्रवेशसमयेऽनेन, गदितं सिंहकेसराः ॥ १७ ॥
प्रायोऽलाभेन तस्यास्या नष्टं चित्तमभूद्ध्रुवम् । इत्थं विचार्य चित्तेऽसौ, श्रावको मुनये द्रुतम् ॥ १८ ॥
भाजनं मोदकैः पूर्ण,—मुपढौक्यावदत्ततः । गृहीत्वाऽनुग्रहं साधो !, कुरु त्वं सिंहकेसरान् ॥ १९ ॥

जग्राह तन्मुनिः स्वेच्छं, स्वस्थीभूतश्च तन्मनः । श्रावको हृदये दध्यां,—वाहारेऽस्य भवेत्क्षतिः ॥ २० ॥
अनेकदोषदुष्टं हि, कथितं रात्रिभोजनम् । अतस्तथा प्रकुर्वेऽहं, येनाऽस्य स्याच्छुभा मतिः ॥ २१ ॥
ततोऽसौ श्रावको युक्त्या, जगाद मुनिपुङ्गवम् । स्वामिन्नद्य महद्भाग्यं, ममारित सकले जने ॥ २२ ॥
जङ्गमाः कल्प—तरवो, यतो यूयं समागताः । चरित्रं हि सुधातुल्यं, सन्तोषश्चापि ते तथा ॥ २३ ॥
भवदीयगुणग्रामं, नाहमेकमुखो मनाक् । समर्थो वदितुं वर्स, विषयासक्तमानसः ॥ २४ ॥
प्रश्नस्यैकस्य मे किन्तु, देहि ध्यात्वोत्तरं मुने ! । गीतार्थोऽस्ति:भवान् यस्मा—त्तथाऽऽचारस्य पालकः ॥२५॥
प्रत्यूषे प्रत्यहं द्वित्र,—तारके गगने सति । प्रत्याख्यानं प्रकुर्वेऽहं, नमस्कारादिकस्य हि ॥ २६ ॥
प्रत्याख्यातं मया चाद्य—पूर्णं पुरिमार्धं नवा । तच्छ्रुत्वा सावधानोऽसौ, चिन्तयामासिवान् हृदि ॥ २७॥
श्रुतदत्तोपयोगेन, दृष्टवानुडुमण्डलम् । ज्ञाता यामद्वयातीता, मध्या रात्रिश्च सम्प्रति ॥ २८ ॥
जातं ततोऽस्य संज्ञानं ततोऽसौ स्वमनिन्दयत् । हा मूढेन मया सर्वं, विरूपं चरितं भ्रमात् ॥ २९ ॥
धिङ् मे लोभाभिभूतस्य, जीवितं पापसङ्कुलम् । इत्थं निर्वेदमापन्नो, जगाद श्रावकम्प्रति ॥ ३० ॥
जैनशासनतत्त्वज्ञो, धन्योऽसि श्रावकोत्तम ! । यतोऽनेन प्रच्छन्नेन, पातकाद्रक्षितोऽस्म्यहम् ॥ ३१ ॥
मार्गभ्रष्टस्य मे सद्यो, गुरुस्त्वं मार्गदर्शनात् । चातुर्यं च तथा धैर्यं, वचसोऽगोचरं तव ॥ ३२ ॥
इत्येवमात्मनिन्दां स, स्तुतिं तस्य विधाय च । निशायां गमने मे स्या,—दनाचार इति स्मरन् ॥ ३३ ॥
अन्विष्य विजनं वेश्म, तस्थौ ध्यानपरो मुनिः । प्रभाते च तदाहार,—परित्यक्तुं गतस्तथा ॥ ३४ ॥

शुद्धस्थण्डिलभूमौ स, विधिना चूर्णयन् भृशम् । मोदकान् भावनां दध्यौ, स ढण्ढणमुनिर्यथा ॥ ३५ ॥
शुक्लध्यानानलेनाशु, कर्मदारु दहन्मुनिः । क्षणमात्रेण सम्प्राप्तः, केवलं ज्ञानमुज्ज्वलम् ॥ ३६ ॥
देवैः स्वर्णाम्बुजं तत्र, विहितं सहसा मुनिः । देशनां प्रददौ स्थित्वा, तद्दृष्ट्वा विस्मिता जनाः ॥ ३७ ॥

७८ श्री नमिराजर्षिकथा

अस्तीह भ[भा]रते वर्षेऽवन्तीजनपदेऽद्भुतम् । पुरं सुदर्शनाभिख्यं, निर्जितस्वःपुरं श्रिया ॥ १ ॥
राजा मणिरथस्तत्र, युवराड् युगबाहुकः । प्रिया मदनरेखाऽस्य, रूप–लावण्यदीर्घिका ॥ २ ॥
तस्याश्चन्द्रयशाः सूनुरनूनगुणसेवधिः । राजा मदनरेखायां, रागादिदमचिन्तयत् ॥ ३ ॥
चेद् रेमे नैतया सार्धं, तदा मे निष्फलं जनुः । ततस्तदर्थमेतस्यै, प्रैपीत् पुष्प–फलादिकम् ॥ ४ ॥
ज्येष्ठप्रसाद इति सा, निर्विकारा तदाददे । अन्येद्युर्मदनरेखां, रहो मणिरथोऽवदत् ॥ ५ ॥
भद्रे ! मां पुरुषत्वेन, प्रपद्य स्वामिनी भव । मद्राज्यस्येति साऽवोचत्, पुंस्त्वमस्त्येव पार्थिव ! ॥ ६ ॥
स्वकर्मणैव पण्ड–स्त्रीभावशून्यस्य ते पुनः । स्वामित्वं युवराट्पत्न्याः, कः क्षमो हर्तुमत्र मे ? ॥ ७ ॥ युग्मम्
अन्यच्च मृत्युमिच्छन्ति, सन्तोऽकृत्यं न कुर्वते । तत् त्यज त्वं महाराजाकार्यं भजस्व सत्पथम् ॥ ८ ॥
तत् श्रुत्वा चिन्तितं तेन, पाप्मना मामियं ध्रुवम् । नेच्छति भ्रातरि सति, हन्मि तं स्यात् ततो मतम् ॥ ९ ॥
अन्येद्युर्मदनरेखा, स्वप्ने दृष्ट्वा निशाकरम् । भर्तुराख्यच्च सोऽप्याह, प्रिये ! भाव्यद्भुतः सुतः ॥ १० ॥

तदैवाऽऽविरभूद् गर्भस्तृतीये मासि चाभवत् । जिनार्चा–मुनिदानादौ, दोहदोऽस्याः सुकर्मजः ॥ ११ ॥
सम्पूर्णदोहदा गर्भं, दधाना सा सती सुखम् । अनैषीत् समयं पत्युः, प्रेमानुस्यूतमानसा ॥ १२ ॥
वसन्तेऽन्येद्युरुद्याने, जगाम युगबाहुराट् । व्यग्रत्वाद् भक्तपानाद्यैस्तस्यास्तमगमद् रविः ॥ १३ ॥
काष्ठासु प्रसृतं ध्वान्तं, युगबाहू रति(त)श्रमात् । सुप्तो रम्भागृहे सार्द्धं, प्रियामदनरेखया ॥ १४ ॥
अथो मणिरथो दुष्टश्चिन्तयामास चेतसि । अद्याऽऽस्ते शोभनोपायो, युगबाहुविनाशने ॥ १५ ॥
एकं स बहिरुद्याने, स्थितोऽन्यत् चाल्पसेवकः । तृतीयं रजनी(निर्)ध्वान्तं, चतुर्थं हन्मि तेन तम् ॥ १६ ॥
चिन्तयित्वेत्युपादाय, मण्डलाग्रं स उग्रधीः । उद्यानेऽगमदेकाकी, दृष्टः पृष्टोऽङ्गरक्षकैः ॥ १७ ॥
विश्वस्तं घातयत्येनं, माऽनुजं मेऽपरः परः । इत्यागतः पुरान्तस्तं, लात्वा यास्यामि साम्प्रतम् ॥ १८ ॥
दम्भाद् रम्भागृहं सोऽगाद्, युगबाहुः ससम्भ्रमम् । उत्थाय प्रणमन्नुक्तस्तेन यावः पुरान्तरे ॥ १९ ॥
जनापवादमुत्सृज्याविचार्यानार्यकार्यताम् । स पुरान्तर्गमव्यग्रस्तेन स्कन्धे हतोऽसिना ॥ २० ॥
तद्व्यथार्त्तः पपातोर्व्यां, सोऽथो मदनरेखया । पूच्चक्रेऽन्येयुराकृष्टखड्गास्तस्याङ्गरक्षकाः ॥ २१ ॥
प्रमादात् मत्कराद् भद्रे !, पपातासिर्भिया मृतम् । ज्ञात्वा तच्चेष्टितं भृत्यैर्नीतो मणिरथः पुरे ॥ २२ ॥
तैश्चन्द्रयशसः प्रोक्तं, क्रन्दन्नुच्चैः स आगमत् । वैद्यानादाय तैश्चक्रे, व्रणकर्मार्चितः परम् ॥ २३ ॥
नेत्रे निमीलिते रुद्धा, वाग् निश्चेष्टमभूद् वपुः । रुधिरोद्गारतः श्वेता, युगबाहोरभूत् तनुः ॥ २४ ॥
अन्त्यावस्थोचितं ज्ञात्वा कामरेखा ततः पतिम् । स्थित्वा तत्कर्णयो–र्मूलमुवाचैवं मृदुस्वरम् ॥ २५ ॥

राजन् ! कस्योपरि द्वेषं, मा कुर्याः प्रीतिमङ्गिषु । भजस्व चतुःशरणं, निर्वृतिं चेतसो भज ॥ २६ ॥
स्वकृतं दुष्कृतं निन्द, सह व्यसनमागतम् । निमित्तमात्रमत्र स्यात्, परः स्व(स्वं) कर्म भुज्यते ॥ २७ ॥
पाथेयं परलोकस्य, स्मराऽर्हन्तं गुरुं वृषम् । दुष्टान्यष्टादश स्पष्टं, पापस्थानानि वर्जय ॥ २८ ॥
पितृ-मातृ-भ्रातृ-पुत्रादिकं सङ्गव्रजं त्यज । स्मर पञ्चनस्कारं, सारं श्रीजिनशासने ॥ २९ ॥
तत् कृताञ्जलिना सर्वं, प्रपन्नं युगबाहुना । ममार च नमस्कार-जापसारः समाधिना ॥ ३० ॥
पूत्कृतं चन्द्रयशसा, कामरेखेत्यचिन्तयत् । मद्रूपं धिक् कृते यस्यानर्थोऽभूदीदृशो महान् ॥ ३१ ॥
व्यापादयिष्यति क्रूरो, मत्पुत्रमपि मत्कृते । शीलरत्नं तदात्मीयं, गत्वा रक्षामि कुत्रचित् ॥ ३२ ॥
चिन्तयित्वेति पुत्रादि-वर्गं शोकात्मतां गतम् । सम्बोध्यार्द्धनिशि दिशं, प्रतीचीं प्र(प्रति प्राचीं)चचाल सा ॥३३॥
क्रूराटव्यामटन्त्याप, मध्याह्नेऽब्जसरः पुरः । प्राणवृत्तिं फलैश्चक्रे, बलीयो दैवचेष्टितम् ॥ ३४ ॥
साकारानशनं कृत्वा, सा सुप्ता कदलीगृहे । आगता रजनिस्तत्र, पूत्कुर्वन्ति मृगारयः ॥ ३५ ॥
घुर्घुरन्ति वराहौघाः, फेत्कारान् विदधुः शिवाः । नमस्कारपरावर्त्तपरायत्ता मनस्विनी ॥ ३६ ॥
अर्द्धरात्रे बभूवास्या, महत्युदरवेदना । सर्वलक्षणसम्पूर्णं, प्रसूता सा ततः सुतम् ॥ ३७ ॥
सं(सा)वेष्ट्य कम्बलेनैनं, मुद्रां न्यस्यामुचत् पितुः । स्वयं गता सरः प्रातः, क्षालितं वस्त्रमात्मनः ॥ ३८ ॥
स्नानार्थं यावदुत्तीर्णा, तावदागात् पयःकरी । तेनैषा शुण्डयोत्पाट्य, लीलयोल्लालिताऽम्बरे ॥ ३९ ॥
दैवादात्ता सुरूपेति, खेचरेण पतन्त्यसौ । रुदन्ती(ती) सुदती नीता, तेन वैताढ्यभूधरम् ॥ ४० ॥

रुदन्त्या(त्या)ऽसौ तया प्रोक्तो, भो(ऽहो!) महापुरुषाऽऽत्मजम् । अद्य रात्रौ प्रसूताऽहं, तं मुक्त्वा कदलीगृहे ॥४१॥
स्नानार्थं यावदुत्तीर्णा, क्षिप्ता तावद् गजेन खे । त्वया यावदिहाऽऽनीता, त्वदधीनाऽस्मि साम्प्रतम् ॥४२॥ (युग्मम्)
व्यापादयिष्यते वन्यैर्निस्तन्यो वा मरिष्यति । मत्तनुस्तस्य दानेनानुग्रहं कुरु सत्तम ! ॥ ४३ ॥
तमानयात्र वा तत्र, मां नयेत्युदिते तया । युवाऽऽहाऽऽज्ञाकरस्ते स्यां, यदीच्छसि पतिं तु माम् ॥ ४४ ॥
अन्यच्च शृणु गा(ग)न्धारदेशे रत्नावहे पुरे । मणीचूडो नृपस्तस्य, पत्न्यभूत् कमलावती ॥ ४५ ॥
मणीप्रभोऽस्य पुत्रोऽहं द्वयोः श्रेण्योः पिता मम । भुक्त्वा साम्राज्यं प्राव्राजीत्, चारणश्रमणान्तिके ॥ ४६ ॥
विहरन् स्वमिहाऽऽयातः, सोऽगात् नन्दीश्वरेऽधुना । गच्छता वन्दनायास्य, दृष्टा नीता मया ह्यसि ॥ ४७ ॥
त्वत्तनुर्मिथिलेशेन, तत्राऽऽनीतेन वाजिना । गृहीतश्चार्पितो देव्यै, वर्द्धमानोऽस्ति पुत्रवत् ॥ ४८ ॥
प्रज्ञप्त्या विद्यया ज्ञात्वा, मयोक्तं नान्यथा ह्यदः । भद्रे ! मुक्त्वा तदुद्वेगं, भुङ्क्ष्व भोगान्मया समम् ॥ ४९ ॥
श्रुत्वेति सा सती दध्यावहो ! मे कर्मचेष्टितम् । भनाम्यन्यान्यदुःखानां, भाजनं भाग्यवर्जिता ॥ ५० ॥
न प्राणी मदनग्रस्तः, कार्याकार्यं विचारयेत् । नापवादाद् बिभेत्युच्चैः, शङ्कते नान्यलोकतः ॥ ५१ ॥
तत् शीलरत्नं यत्नेन, रक्षणीयं मयाऽधुना । चिन्तयित्वेति मदनरेखोचेऽदो मणिप्रभम् ॥ ५२ ॥
नय नन्दीश्वरं तावत्, करिष्ये त्वद्वचो ध्रुवम् । तत् श्रुत्वा मुदितो दिव्यं, यानं व्यरचयत् खगः ॥ ५३ ॥
तदारोप्य सतीं स्वान्तवेगं वेगादगात् खगः । नन्दीश्वरं द्विपञ्चाशच्चित्यचैत्यविभूषितम् ॥ ५४ ॥
ववन्दे तत्र कृत्वाऽर्चां, तया सार्द्धं मणिप्रभः । ऋषभ–वर्द्धमानाद्याः, प्रतिमाः शाश्वतार्हताम् ॥ ५५ ॥

वन्दितो मणिचूडोऽपि, मुनिस्ताभ्यां ससम्भ्रमम् । चतुर्ज्ञानधरः सोऽप्यज्ञासीद् व्यतिकरं तयोः ॥ ५६ ॥
शिक्षितो(शमितो) मणिचूडेन, धर्मदेशनया खगः । लज्जितस्तां सतीमूचे, भगिनीतः प्रभृत्यपि[सि] ॥ ५७ ॥
ब्रूहि सम्प्रति किं कुर्वे ?, साऽब्रवीत् मेऽखिलं कृतम् । अत्र कारयता यात्रां, तीर्थे मत्तुल्यदुर्लभे ॥ ५८ ॥
उत्पत्तिं वद मत्सूनोः, साऽपृच्छदिति तं मुनिम् (:) । सोऽप्याह प्राग्विदेहेऽभूद्, विजयः पुष्कलावती ॥ ५९ ॥
तत्र मणितोरणाख्ये, पुरेऽमितयशा नृपः । तस्य पुष्पवती पत्नी, रूपरेखाकपोपला ॥ ६० ॥
पुष्पसिंह–रत्नसिंहौ; बुभुजाते तदात्मजौ । साम्राज्यं चतुरशीति–पूर्वलक्षा निरर्गलम् ॥ ६१ ॥
प्रवव्रजतुरभ्यर्णे, चारणर्षेर्विरागतः । षोडशपूर्वलक्षास्तौ, पालयामासतुर्व्रतम् ॥ ६२ ॥
ततो मृत्वाऽच्युते कल्पेऽभूतां सामानिकौ सुरौ । द्वाविंशत्यर्णवायुष्कौ, निस्सीमसुखशालिनौ ॥ ६३ ॥
च्युत्वेतो धातकीखण्डभरतार्द्धेऽर्द्धचक्रिणः । पत्युः समुद्रदत्ताया, हरिषेणाभिधस्य तौ ॥ ६४ ॥
तनयौ सागराद् देव–दत्तौ नाम्ना बभूवतुः । क्रमात् क्रमागतं राज्यं, पालयामासतुश्चिरम् ॥ ६६ ॥ युग्मम्
ततस्तौ द्वादशस्यान्ते, श्रीदृढसुव्रतार्हतः । व्रतं जगृहतुर्जन्मसाफल्यार्थमुभावपि ॥ ६६ ॥
मृत्वोत्पन्नौ महाशुक्रे, विद्युत्पातेन तद्दिने । सप्तदशार्णवायुष्कौ, तौ सुरौ परमर्द्धिकौ ॥ ६७ ॥
द्वाविंशस्यार्हतो जातकेवलस्यान्यदा मुदा । गतौ तौ महिमां कर्त्तुं, पृच्छतः स्म निजाऽऽयतिम् ॥ ६८ ॥
स्वाम्याह भरतेऽत्रैव, च्युत्वेतो मिथिलापुरि । भूभुजो जयसेनस्य, त्वमेको भविता सुतः ॥ ६९ ॥
सुदर्शन(ने)पुरे चान्यो युगबाहोर्महीपतेः । पत्न्या मदनरेखाया, भावी पुत्रस्ततश्च्युतः ॥ ७० ॥

इति श्रुत्वा प्रभुं नत्वा, जग्मतुस्तौ त्रिविष्टपम् । भुक्त्वा देवभवायुष्कं, पूर्वमेकस्ततश्च्युतः ॥ ७१ ॥
उत्पेदे मिथिलापुर्यां, जयसेनमहीपतेः । प्रियायां वनमालायां, पुत्रः पद्मरथाह्वयः ॥ ७२ ॥
यौवने जनको राज्यं, दत्त्वाऽस्मै व्रतमग्रहीत् । पुष्पमालाप्रिययाऽमा, स भोगान् बुभुजेऽधिकम् ॥ ७३ ॥
द्वितीयोऽपि ततश्च्युत्वा, पुत्रो धार्मिकि ! तेऽभवत् । हृतः पद्मरथोऽन्येद्युर्वक्रशिक्षितवाजिना ॥ ७४ ॥
तत्राटव्यामटन्नागादद्य प्रातस्तवाऽऽत्मजम् । दृष्ट्वा पूर्वभवस्नेहात्, मुदितात्मा तमाददे ॥ ७५ ॥
पदानुसारतस्तस्यात्रान्तरे सैन्यमागतम् । सतन्त्रो गजमारुह्य, राजाऽगाद् राजमन्दिरम् ॥ ७६ ॥
प्रियायै पुष्पमालायै पालनायार्पितः सुतः । सवर्द्धापनकं वर्द्धमानोऽस्ति तद्गृहे सुखम् ॥ ७७ ॥
यावत् मुनिरिदं वक्ति, तावदेकं नभस्तलात् । विमानरत्नमुत्तीर्णं, द्युतिद्योतितदिक्तटम् ॥ ७८ ॥
किङ्किणीक्वाणमुखरं, स्वःस्त्रीघुष्टजयस्वरम् । स्वच्छस्फटिकनिर्यूहं, मुक्ताजालकरम्बितम् ॥ ७९ ॥ [युग्मम्]
तदन्तर्निर्ययौ देवः, कुण्डलालङ्कृतश्रुतिः । किरीटसुभगाकारस्तारहारमनोहरः ॥ ८० ॥
स त्रिः प्रदक्षिणीकृत्य, कामरेखां नमोऽकरोत् । पश्चात् मुनिं नमस्कृत्योपविष्टः पुरतो मुनेः ॥ ८१ ॥
वैपरीत्यं तदालोक्य, खेचरः सुरमब्रवीत । अहो ! प्ररूपिता राजनीतयश्चामरैर्नृपैः ॥ ८२ ॥
लुम्पन्ति तास्त एवात्र, कस्याग्रे कथ्यते ततः ? । इति श्रुत्वा सुरोऽवोचत्, सत्यमेतत् परं शृणु ॥ ८३ ॥
सुदर्शनपुरे पूर्वमासीत् मणिरथो नृपः । तद्भ्राता युगबाह्वाह्वः, स तूद्याने गतोऽन्यदा ॥ ८४ ॥
केनचित् पूर्ववैरेण, कन्धरायां हतोऽसिना । भ्रात्रा(ता)मणिरथेनाथ, धर्मदेशनयाऽनया ॥ ८५ ॥

बोधितः स्प(स्पृ)ष्टसम्यक्त्वो, मृत्वा कल्पे स पञ्चमे । इन्द्रसामानिको जज्ञे, दशाब्ध्यायुर्महर्द्धिकः ॥८६॥ [युग्मम्]
सोऽहं तदेषा मे धर्माचार्यत्वेनोपकारिणी । यद् भवेद् दुष्प्रतीकारो, बोधिबीजार्पको जनः ॥ ८७ ॥
अतो नतोऽहमेतस्याः, पूर्वमेव पदद्वयम् । तत् श्रुत्वा खेचरो दध्यावहो ! धर्मस्य जृम्भितम् ॥ ८८ ॥
कामरेखां सुरोऽवोचत्, करवाणि तव प्रियम् । किं साधर्मिकि ! श्रुत्वेति, साऽवगेवं सुरं प्रति ॥ ८९ ॥
देवेन्द्रः परमार्थेन, न प्रियं कर्त्तुमीश्वरः । तथापि नय मां तत्र, यत्राऽऽस्ते मत्सुतो लघुः ॥ ९० ॥
परलोकहितं कुर्वे, यथाऽहं वीक्ष्य तन्मुखम् । नीता क्षणात् सुरेणाथ, ततोऽसौ मिथिलापुरि ॥ ९१ ॥
जन्म-दीक्षा-ज्ञानभूमिर्मल्लि-नम्यर्हतोस्तु सा । अतोऽवतारिता पूर्वं, तीर्थभक्त्याऽर्हदालये ॥ ९२ ॥
तया नतानि चैत्यानि, साध्व्यश्चोपाश्रये नताः । पुरस्तात् कथितो धर्मस्तस्यास्ताभिर्जिनोदितः ॥ ९३ ॥
उक्ता धर्मकथाप्रान्ते तेन देवेन सा सती । भद्रे ! यामो नृपावासे, पुत्रं पश्येति साऽवदत् ॥ ९४ ॥
संसारवर्द्धनेनालं !, प्रेम्णाऽऽदास्ये व्रतं हितम् । स्वाभीष्टं कुरु देवोऽपीत्युक्त्वा नत्वाऽगमद् दिवम् ॥ ९५ ॥
तासामन्ते तयाऽप्यात्तं, वैराग्यादार्हतं व्रतम् । तपस्यन्ती विजह्रेऽसौ सुव्रतार्याऽऽख्यया क्षितौ ॥ ९६ ॥
अथो पद्मरथावासे, तिष्ठत्येष सतीसुतः । प्रतिपक्षा नतास्तस्य, स्वयमेवोपदादिभिः ॥ ९७ ॥
ततोऽस्य गुणनिष्पन्नं, चक्रे नाम नमिर्नृपः । धात्रीभिः पञ्चभिर्लाल्यमानोऽवर्द्धिष्ट सत्सुखम् ॥ ९८ ॥
सर्वशास्त्रार्थसार्थं स, प्राप्तवानष्टवार्षिकः । क्षणाद् दर्शनमात्रेण, प्राच्यपुण्यानुभावतः ॥ ९९ ॥
अष्टोत्तरसहस्राणां, कनीनां ग्राहितः करम् । इक्ष्वाकुवंशजातानां, भूभुजां यौवने नमिः ॥ १०० ॥

पद्मरथोऽपि हि ॥ १०१ ॥
सुरेन्द्र इव भुञ्जानो, भोगांस्ताभिः समं नमिः । अनैषीत् सुखजं कालमथो पद्मरथोऽपि हि ॥ १०२ ॥
विदेहदेशजे राज्येऽभिषिच्य युगबाहुजम् । संसारासारतां ज्ञात्वा, प्रव्रज्याऽऽप शिवश्रियम् ॥ १०२ ॥
अथो मणिरथो रात्रौ, तस्यां दष्टो महाहिना । चतुर्थ्यां नरकपृथ्व्यां, मृत्वोत्पेदेऽतिपाप्मतः ॥ १०३ ॥
संस्कारितावुभौ मन्त्रि—सामन्ताद्यैः सहोदरौ । न्यस्तश्चन्द्रयशा राज्ये, कथञ्चित् प्रतिबोधितः[-ध्य तैः ॥१०४॥
इतश्चालानमुन्मूल्य, श्वेतेभो नमिभूभुजः । अभि विन्ध्याटवीं गच्छन्, सुदर्शनपुरान्तिके ॥ १०५ ॥
दृष्टो गतैश्च वाह्याल्यां, चन्द्रयशोऽनुजीविभिः । उक्तोऽस्मै सोऽपि तं गत्वा, निनाय स्वपुरं रयात् ॥१०६॥ युग्मम्
चरैर्ज्ञात्वा नमेरुक्तं, स चन्द्रयशसे जनम् । प्राहिणोत् मद्गजं देहि, तस्मै सोऽपीदमब्रवीत् ॥ १०७ ॥
रत्नानि शासने न स्युः, कस्यापि लिखितानि भोः ! । यो बलेनाधिकस्तानि, तस्यैवेत्यत्र निर्णयः ॥१०८॥
गत्वा दूतेन तत् प्रोक्तं, नमिराजस्ततोऽनमिः । क्रुद्धः सर्वबलेनालमचालीदग्रजोपरि ॥ १०९ ॥
अथ चन्द्रयशा ज्ञात्वाऽऽगच्छन्तं कटकं नमेः । निर्गच्छन् स्वबलेनापशकुनेन निवारितः ॥ ११० ॥
पिधाय नगरद्वारं, तिष्ठेत्युक्तः स मन्त्रिभिः । कालोचितं करिष्यामः, पुनर्नावसरोऽधुना ॥ १११ ॥
तस्थौ नमिश्चतुर्दिक्षु, पुरमावेष्ट्य सेनया । अश्रौषीत् सुव्रतार्याऽपि, जनश्रुत्याऽसुखं तयोः ॥ ११२ ॥
मा मनुष्यक्षयं कृत्वा, यातामेतावधोगतिम् । इतिप्रवर्त्तिनीं पृष्ट्वा, साऽगात् तद्बोधहेतवे ॥ ११३ ॥
पूर्वं प्राप्ता बहिः सैन्ये, ततोऽस्या दत्तमासनम् । नत्वोपविष्टो भूपीठे, नमिराजः कृताञ्जलिः ॥ ११४ ॥
साऽऽह राजन्नसारेयं, राज्यश्रीर्विषया विषम् । तत्कृते नरके दुःखसहनं युज्यते कथम् ? ॥ ११५ ॥

अन्यच युज्यते युद्धं, ज्येष्ठभ्रात्रा समं कथम्? । कथं भ्रातेति तेनोक्ते, तं सप्रत्ययमाह सा ११६ ॥
तथापि सन्मुखं तस्य, न मानाद् यात्यसावथ[सौ ततः] । साऽऽर्या खडकि[क्कि]काद्वारा, प्रविष्टाऽन्तःपुरं द्रुतम्॥
प्रविशन्ती नृपावासे, स्वजनैः सोपलक्षिता । नत्वा दत्वाऽऽसनं चन्द्रयशाः पुर उपाविशत् ॥ ११८ ॥
ननामान्तः- पुरीलोको, गलद्बाष्पाविलः पदौ । एतां नृपोऽपृच्छदार्ये !, दुष्करं किं श्रितं व्रतम्? ॥ ११९ ॥
कुत्रेदानीं मम भ्राता ?, रुद्धो येनेति साऽवदत् । निर्गतो नगरात् चन्द्र—यशा हर्षप्रकर्षतः ॥ १२० ॥
आयान्तं[तं]तं नमिर्वीक्ष्य, द्रागुत्थायापतत् पदोः । परमप्रेमनिर्मग्नौ, प्रविष्टौ भ्रातरौ पुरम् ॥ १२१ ॥
अवन्तीदेशस्वामित्वे, न्यस्य चन्द्रयशा नमिम् । प्रव्रज्य सुगुरूपान्ते, विजहार यथासुखम् ॥ १२२ ॥
भुञ्जानोऽभवदुग्राज्ञो, नमिर्देशद्वयश्रियम् । जज्ञे षाण्मासिको दाघज्वरोऽस्याङ्गेऽन्यदोत्कटः ॥ १२३ ॥
विज्ञैरप्यौषधविधेः, प्रत्याख्यातश्चिकित्सकैः । घर्षन्ति चन्दनं देव्य आलेपाय महीभुजः ॥ १२४ ॥
तद्हस्तकङ्कणझणज्झणद्ध्वनिभिरास्पदम् । पूर्यते प्राह राजेभिः, कर्णाघातो भवेत् मम ॥ १२५ ॥
ततो देवीभिरेकैकं, मुञ्चन्तीभिः स्वकङ्कणम् । सर्वाण्युत्तारितान्येकं, माङ्गलिक्याय रक्षितम् ॥ १२६ ॥
शब्दायन्ते न किं तानि, राज्ञा पृष्टेऽवदन् स्त्रियः । उत्तारितानि तान्येकं, देव शब्दायते नहि ॥ १२७ ॥
तद्दुःखाभ्याहतो दध्यौ, परलोकसुखोन्मुखः । अयं दोषो बहूनां ते, कलहायन्ते न चैककः ॥ १२८ ॥
उक्तं च—"यथा यथा महत्तन्त्रं, परिकरश्च यथा यथा । तथा तथा महादुःखं[-हद्दुःखं], सुखं च न तथा तथा [१]"॥
एतेभ्यो यदि रोगेभ्यो, मोक्षो मे प्रव्रजामि तत् । चिन्तयित्वेत्यसौ सुप्तो, राकाऽभूत् कार्त्तिकी तदा ॥ १३० ॥

प्रभातायां निशीथिन्यां, श्वेतेभं मन्दरोपरि । तस्मिन्नारूढमात्मानं, स्वप्ने, पश्यति(ऽपश्यत् स) पार्थिवः ॥ १३१ ॥
प्रबुद्धस्तूर्यशब्देन, नीरोगस्तत्क्षणादभूत् । दध्यौ लब्धोऽधुना स्वप्नः, प्रधानमधिकं मया ॥ १३२ ॥
दृष्टः क्वापीदृशश्चाभूत् पर्वतः सुभगाकृतिः । इत्यूहापोहवशतो, जातिस्मृतिमवाप सः ॥ १३३ ॥
विमाने पुष्पोत्तरे प्राच्य(ग्)भवेऽभूवं सुरैः समम् । जिनजन्ममहे तत्र, गतोऽहं मन्दराचले ॥ १३४ ॥
दृष्टस्तत्रायमित्येष, प्रबुद्धश्चिन्तयन् भृशम् । प्रत्येकबुद्धो भगवान्, प्राव्राजीत् स्वयमेव सः ॥ १३५ ॥

इति श्रीमुद्रित–ऋषिमण्डलवृत्तित उद्धृता श्री नमिराजर्षिकथा संपूर्णा.

७९ श्री अतिमुक्तकमुनिकथा

अस्तीह भरतक्षेत्रे, पोलासं नाम पत्तनम् । कमलालङ्कृतं सारं, कासार इव यत् सदा ॥ १ ॥
तत्र शत्रुधरित्रीशकुरङ्गत्रासकेसरी । सदाजयो जयो राजा, राजेवाऽऽनन्दकृत् सताम् ॥ २ ॥
श्रीदेवीव हरेस्तस्य, श्रीदेवी देव्यभूत् प्रिया । या जिगाय जगद्योपित्सौभाग्यं रूपरेखया ॥ ३ ॥
साऽन्यदा द्रुममद्राक्षीद्, रात्रौ स्वप्नेऽतिमुक्तकम् । तदैव दैवतो गर्भं, मञ्जरीव फलं दधौ ॥ ४ ॥
सम्पूर्णलक्षणं सम्पूर्णे दिनेऽसूत सा सुतम् । स्वप्नेऽतिमुक्तको दृष्टोऽभूत् नाम्ना सोऽतिमुक्तकः ॥ ५ ॥
मरालबालवत् पद्मं, पद्मादङ्कमथाङ्कतः । सञ्चरन् सोऽन्ववर्द्धिष्ट, सार्द्धं[माता]पित्रोर्मनोरथैः ॥ ६ ॥
हसंश्चपुटिकादानाद्, जल्पन् मन्मनभाषया । पितुः कूर्चकचान् कर्षन्, सोऽभवद् द्वित्रिवार्षिकः ॥ ७ ॥

इतश्च चरमतीर्थकरो वीरजिनेश्वरः । विहरन् समवासार्षीदित्योद्यानेऽन्यदा पुरः ॥ ८ ॥
जयं वर्द्धापयामासागमेनाऽऽरामिकोऽर्हतः । नृपो ननर्त्त तत् श्रुत्वा, केकीव जलदध्वनिम् ॥ ९ ॥
ततोऽस्मायनृणीकारं, दानं दत्त्वा मुदा नृपः । चचाल श्राक् मनोऽभीष्टे, ह्यौत्सुक्यं जन आगते ॥ १० ॥
स त्रिः प्रदक्षिणीकृत्य, नृपो वीरं नमोऽकरोत् । यथास्थानं निपण्णश्च, पपौ तद्देशनामृतम् ॥ ११ ॥
कैश्चिद् यतित्वं श्राद्धत्वं, सम्यक्त्वं कैश्चिदाश्रितम् । निशम्य देशनां पात्रे, न्यस्ता हि न मुधा सुधा ॥ १२ ॥
अहो रूपं स्फुरद्रूपमहो ! वाग्वैभवोद्भवम् । जैनान् जनो गुणान् गृह्णन्नित्यादीन् स्वाऽऽस्पदं ययौ ॥ १३ ॥
इतश्च षष्ठतपसः, पारणार्थी जगद्गुरुम् । आपृच्छ्य गौतमोऽविक्षत्, पुरान्तः श्रेयसां निधिः ॥ १४ ॥
अतिमुक्तकुमारोऽपि, कुमारैः स्ववयःसमैः । सुवर्णकन्दुकक्रीडां, तदा चक्रे नृपाध्वनि ॥ १५ ॥
धावं धावं विशश्राम, श्रान्तच्छायासु सद्मनः । प्रविष्टं गोचरेऽद्राक्षीत्, कुमारो गौतमं मुनिम् ॥ १६ ॥
स्वभावाद् विनयो राजपुत्रे स्यादित्यसौ शिशुः । द्रागुत्थाय नमश्चक्रे, गौतमांघ्री उवाच च ॥ १७ ॥
के यूयं ? कुत्र वसथ ?, भ्राम्यथेत्थं कथं पुरे ? । स्वाम्याख्यत् साधवः साधो !, वसामोऽन्त्यार्हतोऽन्तिके ॥१८॥
पर्यटामश्च भिक्षार्थमुच्च-नीचकुलेऽन्वहम् । तत् श्रुत्वाऽऽह कुमारोऽसौ, प्राश्चद्रोमांश्चकञ्चुकः ॥ १९ ॥
तर्ह्यायात ममाऽऽवासे, यद् भिक्षां दापयामि वः । इत्युक्त्वाऽऽकृष्य हस्ताभ्यां, वेश्मनेऽचालयत् स तम् ॥२०॥
दूराद् गुरुकरच्छन्नशीर्षमायान्तमात्मजम् । वीक्ष्याभूद् विकसद्गात्रा, प्रसूः प्रसूनवद् भृशम् ॥ २१ ॥
ततः श्रीदेवी देवीव, गुर्वालोकेऽनिमेषदृक् । भक्त्या मुनिं नमस्कृत्य, मोदकैः प्रत्यलाभयत् ॥ २२ ॥

राजाऽः पुनरपृच्छत्, क यूयं यास्यथाधुना ? । गुरुराह गुरूपान्ते, तत्राऽऽयाम्यस्मि सोऽप्यवक् ॥ २३ ॥
गाहः प्रभुः प्रभूपान्ते, तमादायार्भकं ततः । धर्माख्यानाम्भसाऽऽरेमेऽरजसं कर्त्तुमीश्वरः ॥ २४ ॥
अस्मिन्नसारे संसारे, सारं किञ्चिन्न वीक्ष्यते । यौवनं जीवितं देहो, धनं सर्वमशाश्वतम् ॥ २५ ॥
भोगा रोगावहा योगा, योगिनां न सुखावहाः । कुशाग्रलग्नपानीयबिन्दुवत् चाऽऽयुरस्थिरम् ॥ २६ ॥
धर्म एवार्हतोऽशेषदुःखखानिक्षयक्षमः । तत्रापि सारं चारित्रमचिरात् मोक्षसौख्यदम् ॥ २७ ॥
एवमर्हद्वचोदीपदृष्टस्पष्टार्थनिश्चयः । ऊचे च गृहमेत्यादः, पितरावतिमुक्तकः ॥ २८ ॥
शुश्रुवेऽद्य मया वाणी, पितरौ ! चरमार्हतः । मोहनिद्रातमश्छेदे, सहस्रकरसोदरा ॥ २९ ॥
तयोन्मीलितनेत्रोऽहमादास्येऽथाऽऽर्हतं व्रतम् । तावूचतुर्वत्स ! वेत्सि, कथं धर्मं त्वमर्भकः ? ३० ॥
सोऽवग् यदेव जानामि, तदेवापि न वेद्म्यहम् । यद् जाने न तदेवाहं, वेद्मीति परमार्थतः ॥ ३१ ॥
ऊचतुः पितरौ वत्स !, कथं ब्रूपेऽसमञ्जसम् ? । सोऽवादीत् पितरौ ! जाने, जातस्य मरणं ध्रुवम् ॥ ३२ ॥
कदा कस्य ? कथं वेति ?, सम्यगेतन्न वेद्मि नु । न वेद्मि यान्ति कैः श्वभ्रे ?, कर्मभिर्यान्ति वेद्म्यपि ॥३३॥
अथो नृपोऽन्वदत् पुत्र !, कर्कशक्लेशकारिणीम् । दीक्षां कक्षीकरोषि त्वं, कदलीकोमलः कथम् ? ॥ ३४ ॥
पञ्चोत्पाट्या यमाश्चाङ्ग, गुरवः पञ्च मेरवः । तथा शीलभरोऽश्रान्तं, कचलोचोऽतिदुष्करः ॥ ३५ ॥
सोढव्या दुस्सहा बाढं, द्वाविंशतिः परीषहाः । रूक्षं भैक्ष्यं भवेद् भक्ष्यं, समत्वं मित्र–शत्रुषु ॥ ३६ ॥
शोभतेऽवसरे सर्वं, भुक्तभोगश्चरेद्व्रतम् । तत् पुत्रात्राऽऽग्रहं मुञ्च, छत्र भग्ना महारथाः ॥ ३७ ॥

अनिरुक्तोऽवदत् तात !, सर्वं स्याद् दुष्करं नरः । कातराणां न शूराणां, साहसैकावलम्बिनाम् ॥ ३८ ॥
उद्धरन्ति गिरिं चोर्वीं, लङ्घन्तेऽब्धिं तरन्ति च । तद् जगत्नास्ति नोऽसाध्यं, यत् शूराः साधयन्ति न ॥ ३९ ॥
नृपोऽवददनायासात्, कार्यं स्थैर्येण तां भवेत् । सुन्दरश्रेष्ठिवत् कोऽयं, तातेति पृष्टवान् पुनः [मुनः] ॥ ४० ॥
सोऽवग् गुणस्थले ग्रामे, श्रेष्ठयभूत् सुन्दराह्वयः । सुन्दरी दयिता तस्य, पुत्रो नाम्ना पुरन्दरः ॥ ४१ ॥
प्रावृडम्भःप्लुतं तस्य, गेहद्वारमपातयत् । सदाऽऽख्याति पतिं पत्नी, द्वारं वीक्ष्य निरर्गलम् ॥ ४२ ॥
कार्यमार्य ! गृहद्वारं, मा मुषित्वा व्रजेद् गृहम् । कश्चिद् रात्रौ दिवा रक्षां, करोम्येकाकिनी कथम् ॥ ४३ ॥
सोऽवक् करिष्यते लग्नं, कोत्तालाऽस्ति ? स्थिरा भव । व्याघ्रीव कुर्कुरी द्वारे, भषन्त्यस्ति क एष्यति ? ॥ ४४ ॥
कश्चित् मुमुषिषुर्गेहं, भषन्तीमवधीत् शुनीम् । श्रेष्ठिनं सा पुनः प्राह, गेहचिन्ता हि यत् स्त्रियः (याम्) ॥ ४५ ॥
दौवारिका मृता साऽपि, कस्ते रक्षां करिष्यति ? । श्रेष्ठ्याचष्ट वधूटयस्ति, तत्र रक्षाविधा(सहा)यिनी ॥ ४६ ॥
वधूट्यपि मृताऽन्येद्युः, सद्यो रोगाद् विधेर्वशात् । दयिता(तं) पुनराहेदं, कस्ते रक्षाकरः परः ? ॥ ४७ ॥
कथ्यं कुरु कुरु द्वारमुद्वाहय निजात्मजम् । उन्मदिष्णुः श्रियमसौ, किं न निर्नाशयिष्यति ? ॥ ४८ ॥
सुन्दरोऽथावदत् सुभ्रु !, शनैः सर्वं करिष्यते । स्यात् तुन्दपरिमृजानां, स्यात् शुभं स्थैर्यशालिनाम् ॥ ४९ ॥
नीरन्ध्रध्वान्तपूर्णायां, मध्येग्रामं परेद्यवि । रात्रौ सार्थो महानागाद्, देसरोष्ट्रादियानवान् ॥ ५० ॥
तत्रैकाऽश्वतरी सार्थभ्रष्टा पृष्ठस्थवासना । प्रविष्टा श्रेष्ठिनो गेहमाकृष्टा तच्छुभैरिव ॥ ५१ ॥
रोडैः स्खलद्गतेस्तस्याः, पृष्ठाद् दीनारवासना । पपात तद्धणत्काराद्, जजागाराऽऽस्पदाधिपः ॥ ५२ ॥

दीपमाधाय चैक्षिष्ट, वासनानां स विंशतिम् । क्षणं प्रतीक्ष्य चोत्थाप्य, पत्नीमिदमुवाच च ॥ ५३ ॥
कार्यं स्थैर्यं प्रिये ! कार्ये, सर्वस्मिन्निति मन्मतेः । फलं पश्य ह्यनायासाल्लाभोऽभूदावयोरियान् ॥ ५४ ॥
आयान्तीं वेसरीं द्वारे, भषन्ती वारयेत् शुनी । पितृवर्गे वधूर्गत्वाऽकथयिष्यदिदं धनम् ॥ ५५ ॥
तदनेन धनेनोच्चैः, सदनं कारयिष्यते । विवाहश्चोच्चकुल्याभिः, स्त्रीभिः सह सुतस्य तु ॥ ५६ ॥
तत् पुत्र ! स्थिरता श्रेष्ठा, सर्वत्र कुरु तां ततः । उत्तालानां भवेत् पश्चात्तापोऽपि पृष्टगेहिवत् ॥ ५७ ॥
पृष्टाख्योऽभूत् कुटुम्ब्येकः, पुरा ग्रामे कुशस्थले । यक्षः ससोपवस्त्रे[वासे]ण, तेनाऽऽराद्धो धनेच्छया ॥ ५८ ॥
सोऽवग् भद्र ! त्वया ग्राह्यं, पिञ्छमेकं प्रगे प्रगे । सुवर्णबर्हिणीभूय, नृत्यतः पतितं मम ॥ ५९ ॥
सदैवैवं स कुर्वाणो, धनवानचिरादभूत् । दिव्यप्रसादः स्वल्पोऽपि, निकामं कामदो नृणाम् ॥ ६० ॥
अन्येद्युश्चिन्तितं तेन, दूरे यक्षालयेऽन्वहम् । प्रातः प्रातश्च को गन्ता ?, तद् गृह्णाम्येनमक्षतम् ॥ ६१ ॥
ध्यात्वेति वाहितस्तेन, हस्तस्तद्ग्रहणेच्छया । तत्पुण्यवदगात् क्वापि, काकीभूय स केक्यपि ॥ ६२ ॥
ग्रामं ग्रामं प्रगे पृष्टः, कुटुम्बी यक्षसद्मनि । स्वभावजमपि पिञ्छं, कर्हिचिन्नाप बर्हिणः ॥ ६३ ॥
नमस्याभिस्तपस्याभिर्नैरिवस्याभिरन्वहम् । तेनाऽऽराद्धोऽधिकं यक्षो, नैव दर्शनमप्यदात् ॥ ६४ ॥
सन्तापभाजनं पश्चात्तापादेष ह्यजायत । दैवं हि दुर्मतिं दत्ते, चपेटां न कपोलयोः ॥ ६५ ॥
तेनाऽतिमुक्तकोत्तालो, भवन् भूर्माऽनुतापवान् । तत् श्रुत्वाऽभ्यऽभ्यधात् तात !, धर्मे स्थैर्यं न युज्यते ॥ ६६ ॥
चञ्चलं पिप्पलदलमिवाऽऽयुर्मनुजन्मनाम् । तदाश्चर्यमिवाभाति, यत् सुप्त्वोत्थीयते प्रगे ॥ ६७ ॥

उदयास्तमनाक्रान्तिरप्यवस्थात्रयं रवेः । दिनान्तयैत्र संसारे, तत्रान्येषां तु का कथा ? ॥ ६८ ॥
एवं प्रौढोचितं श्रुत्वा, बहुधाऽस्य शिशोर्वचः । श्रीमाता मुदिताऽवादीत्, चिरं जीव बलिः क्रिये ॥ ६९ ॥
ततोऽतिकृच्छ्रतो मातापित्रनुज्ञामवाप्य सः । चकार सङ्घे सत्कार्चां, चैत्येष्वष्टाह्निकामहः ॥ ७० ॥
स्नातानुलिप्तसर्वाङ्गाभरणैर्भूषितो भृशम् । दधानो दण्ड-पात्रादिसाधुवेषं निजान्तिके ॥ ७१ ॥
आरुह्य शिबिकां शूरः, सहस्रनरवाहिनीम् । दानं ददानो दीनानां, जयजयारावादिनाम् ॥ ७२ ॥
धृतच्छत्रः पितृ-मातृ-भ्रातृ-मित्रपरीवृतः । उद्यद्बहुविधाऽऽतोद्यमुखरीकृतदिङ्मुखः ॥ ७३ ॥
मनो विस्मापयन्नन्यजनानां रागिणामपि । अश्रूणि पातयन्नागादतिमुक्तोऽन्तिकेऽर्हतः ॥ ७४॥ चतुर्भिः कलापकम्
प्रभुं नत्वा जयो राजा, श्रीमाताऽप्याहतुस्ततः । भगवन्नावयोः सूनोर्देहि दीक्षा—कनीं निजाम् ॥ ७५ ॥
एवं पितृभ्यां विज्ञप्तः, षड्वार्षिकमपि प्रभुः । दीक्षयामास तं योग्यं, जानन् ज्ञानेन भास्वता ॥ ७६ ॥
पितृन्नथावदद् वीरो, धन्या यूयं ययोः सुतः । शिवंगमी भवेऽत्रैव, बालोऽप्ययमबालधीः ॥ ७७ ॥
वैमुख्यं विषये धर्मे, सर्वस्थामोद्यमो भवे । अनास्थाऽऽसन्नभव्यस्य चिह्नमेतद् यदुच्यते ॥ ७८ ॥
परीत्तसंसृती धन्यौ, युवां याभ्यामपीदृशः । व्रताय पुत्रोऽनुज्ञातो, जीवात्मा दर्शनप्रियः ॥ ७९ ॥
कदाऽऽप्स्यावो व्रतमिति, चिन्तयन्तौ च दम्पती । जग्मतुर्गृहमेषोऽपि, विजहाराऽर्हता समम् ॥ ८० ॥
बहिर्भुवं गतोऽन्येद्युर्वर्षाकालेऽतिमुक्तकः । बालकान् क्रीडतोऽद्राक्षीत्, निम्नभूमिस्थवारिषु ॥ ८१ ॥
शैशवे दुर्निवार्या स्यात्, क्रीडेति श्रीसुतो मुनिः । मृदा वहत्पयो बद्ध्वा, जलाश्रयमकल्पयत् ॥ ८२ ॥

क्षिप्त्वा पतद्ग्रहं तत्र, दण्डेन प्रणुदन् ब्रुवन् । ममेयं नौरहं कर्णधारश्चिक्रीड सोऽम्भसि ॥ ८३ ॥
स्थविरैर्मधुरैर्वाक्यैर्निषिद्धः क्षुल्ल ! किं त्वया । मुग्ध ! दुग्धमुखारब्धमकल्प्यमिति वादिभिः ॥ ८४ ॥
तत् श्रुत्वा सोऽधिकं ह्रीणो, जीवाजीवानभिज्ञधीः । विलक्षास्यो निवृत्तोऽस्मात्, नृणां लज्जैव भूषणम् ॥८५॥
पप्रच्छुः स्थविरा वीरं, भवैः कतिपयैर्गमी । शिवं शिशुरसौ स्वामिन् !, जलक्रीडादिलोलुपः ? ॥ ८६ ॥
प्रभुराह भवेऽत्रैव, सेत्स्यत्येष महाशयः । न कार्याऽस्यैरतो गर्हा, गर्हाऽर्हस्यापि चाऽर्हतैः ॥ ८७ ॥
वैयावृत्यं व्यधुः सम्यक्, ततोऽर्हद्वचसाऽस्य ते । पात्रं प्रीणाति हि स्वान्तं, तादृशं वचसा किमु ? ॥ ८८ ॥
पपाठैकादशाङ्गानि, सोऽचिरात् स्थविरान्तिके । स्वर्णपात्रे न(ण) को भिक्षां, क्षिपेत् क्षेमाभिलाषुकः ? ॥ ८९ ॥
ज्ञात्वाऽऽयुश्चात्मनः स्वल्पं, स तेपे दुस्तपं तपः । चतुर्थषष्ठाष्टमादि द्रढीयःकर्मकर्त्तनम् ॥ ९० ॥
गुणरत्नसंवत्सराभिधं चाऽऽरब्धवांस्तपः । गीतार्थसार्थमुख्योऽर्थसाधनार्थमतिदुष्करम् ॥ ९१ ॥
अस्थि-चर्मावशेषाङ्गः, स उग्रतपसाऽभवत् । यथा यथा तथा भङ्गानकं मोहपुरेऽपतत् ॥ ९२ ॥
आव्रतात् सप्तवर्षान्ते, सोऽवधीत् मुनिकेसरी । चतुष्कषायकलभसुलभं मोहदन्तिनम् ॥ ९३ ॥
तज्जयात् साधुवादादिवादिनी केवलाऽवला । वरमालां गलेऽक्षैप्सीत्, श्रीनन्दनमुनेर्मुदा ॥ ९४ ॥
जैनाद्(नं) जैनं निशम्यामलवचनमलं श्रीसुतं श्रीसुतोऽहो !, बुद्ध्वा वब्रादिसज्ञानभिमुखहृदयो योऽवधीदात्मशत्रुम् ।
षष्ठेऽब्दे प्राप्य दीक्षां श्रुतमपठदथाब्दद्वयं सप्तवर्षीं तामाराध्याऽतिमुक्तस्त्रिदशसमसमायुर्गतः सिद्धिसौधम् ॥ ९५ ॥

इति श्री मुद्रित ऋषिमण्डलप्रकरणवृत्तितः उद्धृता श्री अतिमुक्तकमुनिकथा संपूर्णा

८० सुकोशलमुनिकथा

अथ कीर्तिधरो राजाभुक्त वैषयिकं सुखम् । सहदेव्या समं पत्न्या पौलोम्येव पुरंदरः ॥ १ ॥
प्रविव्रजिषुरन्येद्युः स मंत्रिभिरभण्यत । तवानुत्पन्नपुत्रस्य न व्रतादानमर्हति ॥ २ ॥
त्वय्यपुत्रे व्रतभाजि निर्नाथेयं वसुंधरा । तत्प्रतीक्षस्व यावत्ते स्वामिन्नुत्पद्यते सुतः ॥ ३ ॥
ततः कीर्तिधरस्यापि तथैव गृहवासिनः । काले गच्छत्यभूत्पुत्रः सहदेव्यां सुकोशलः ॥ ४ ॥
ज्ञात्वा जातमिमं बालं पतिर्मे प्रव्रजिष्यति । सहदेवीति बुद्ध्या तं जातमात्रमगोपयत् ॥ ५ ॥
विवेद मेदिनीनाथस्तं गुप्तमपि बालकम् । प्राप्तोदयं हि तरणिं तिरोधातुं क ईश्वरः ॥ ६ ॥
राजाथ स्वार्थकुशलो राज्ये न्यस्य सुकोशलम् । सूरेर्विजयसेनस्य पादान्ते व्रतमाददे ॥ ७ ॥
तप्यमानस्तपस्तीव्रं सहमानः परीषहान् । स्वगुर्वनुज्ञयैकाकिविहारेणान्यतो ययौ ॥ ८ ॥
साकेतमन्यदा मासोपवासी पारणेच्छया । स आजगाम भिक्षार्थं मध्याह्ने तत्र चाभ्रमत् ॥ ९ ॥
सौधाग्रस्था सहदेवी तं च दृष्ट्वेत्यचिंतयत् । पत्यौ प्रव्रजितेऽमुष्मिन् पतिहीना पुराभवम् ॥ १० ॥
वत्सः सुकोशलोऽप्यद्य दृष्ट्वैनं प्रव्रजेद्यदि । तदा पुत्रोऽपि मे न स्यान्निर्वीरा स्यां ततः परम् ॥ ११ ॥
तस्मान्निरपराधोऽपि भर्तापि व्रतधार्यपि । निर्वास्यो नगरात्सूनो राज्यस्थेमचिकीर्षया ॥ १२ ॥
इत्यन्यलिंगिभिः सार्धं तं राज्ञी निरवासयत् । लोभाभिभूतमनसां विवेकः स्यात्कियच्चिरम् ॥ १३ ॥

धात्री सुकोशलस्याथ स्वामिनं व्रतधारिणम् । पुरान्निर्वासितं ज्ञात्वा रोदिति स्म निरर्गलम् ॥ १४ ॥
किं रोदिषीति पप्रच्छ सुकोशलनृपोऽपि ताम् । कथयामास साप्येवमक्षरैः शोकगद्गदैः ॥ १५ ॥
राज्ये त्वां बालकं न्यस्य तव कीर्तिधरः पिता । प्राव्राजीत् सोऽद्य भिक्षार्थं प्राविक्षदिह पत्तने ॥ १६ ॥
तद्दर्शनात्त्वाप्यद्य व्रतग्रहणशंकया । निर्वासितः स ते मात्रा, दुःखेनानेन रोदिमि ॥ १७ ॥
सुकोशलोऽपि तच्छ्रुत्वा गत्वा च पितुरंतिके । बद्धांजलिर्विरक्तात्मा तस्माद्व्रतमयाचत ॥ १८ ॥
चित्रमाला च तत्पत्नी गुर्व्येत्य सह मंत्रिभिः । उवाचास्वामिकं स्वामिन्न राज्यं त्यक्तुमर्हसि ॥ १९ ॥
राजाप्यवोचद्गर्भस्थोऽपि हि सूनुर्मया तव । राज्येऽभिषिक्तो भाविन्यप्युपचारो हि भूतवत् ॥ २० ॥
इत्युक्त्वा सकलं लोकं संभाष्य पितुरंतिके । सुकोशलः प्रवव्राज तपस्तेपे च दुस्तपम् ॥ २१ ॥
निर्ममौ निष्कषायौ तौ पितापुत्रौ महामुनी । विजह्रतुर्युतावेव पावयंतौ महीतलम् ॥ २२ ॥
तनयस्य वियोगेन खेदभाक् सहदेव्यपि । आर्तध्यानपरा मृत्वा व्याघ्र्यभूद्गिरिगह्वरे ॥ २३ ॥
इतश्च तौ कीर्तिधरसुकोशलमहामुनी । प्रावृट्कालचतुर्मासीमत्येतुं दांतमानसौ ॥ २४ ॥
निःस्पृहौ स्वशरीरेऽपि स्वाध्यायध्यानतत्परौ । गिरेर्गुहायामेकस्य तस्थतुः सुस्थिताकृती ॥ २५ ॥
संप्राप्ते कार्तिके मासि प्रयांतौ पारणाय तौ । दृष्टौ मार्गे तया व्याघ्र्या यमदूत्येव दुष्टया ॥ २६ ॥
सा व्याघ्री शीघ्रमभितो दधावे स्फारितानना । दूरादभ्यागमस्तुल्यो दुर्हृदां सुहृदामपि ॥ २७ ॥
आपतंत्यामपि व्याघ्र्यां तौ क्षमाश्रमणोत्तमौ । धर्मध्यानं प्रपेदानौ कायोत्सर्गेण तस्थतुः ॥ २८ ॥

सा तु व्याघ्री विद्युदिव पपातादौ सुकोशले । दूरापातप्रहारेण पृथ्व्यां च तमपातयत् ॥ २९ ॥
चटच्चटिति तच्चर्म दारं दारं नखांकुशैः । पापा सापादतृप्ताश्रं वारीव मरुपांथिका ॥ ३० ॥
त्रोटयित्वा त्रोटयित्वा त्रटत्त्रटिति सा रदैः । जग्रसे मांसमपि हि वालुंकमिव रंकिका ॥ ३१ ॥
दंतयंत्रातिथीचक्रे कर्कशा कीकसान्यपि । कटत्कटिति कुर्वन्ती सेक्षूनिव मतंगजी ॥ ३२ ॥
कर्मक्षयसहायेयमिति मम्लौ मुनिर्न सः । विशेपतस्त्वभूदुच्चावचरोमांचकंचुकः ॥ ३३ ॥
व्याघ्र्यैवं खाद्यमानोऽपि शुक्लध्यानमुपेयिवान् । तत्कालोत्केवलो मोक्षं सुकोशलमुनिर्ययौ ॥ ३४ ॥
मुनिः कीर्तिधरः सोऽपि समुत्पादितकेवलः । क्रमादासादयामास सुखाद्वैतास्पदं पदम् ॥ ३५ ॥

इति श्रीमुद्रित त्रिपष्ठि शलाका पुरुषचरित्र—सप्तमपर्वादुद्धृता श्री **सुकोशलमुनिकथा संपूर्णा.**

८१ श्री सुदर्शनश्रेष्ठिकथा

अस्त्यङ्गविषये चम्पापुर्यां श्रीदधिवाहनः । पार्थिवस्तत्प्रिया रूपपात्रमत्राऽऽभयाह्वया ॥ १ ॥
तत्राजनिष्ट धर्मिष्ठः श्रेष्ठी श्रेष्ठजनेष्टकृत् । श्रीमानृपभदासाख्योऽर्हद्दासी तत्प्रिया प्रिया ॥ २ ॥
तयोरेकोऽस्ति महिषीपालकः सुभगाह्वयः । स चारयति भद्रात्मा, महिषीः शाड्वलावनौ ॥ ३ ॥
हिमर्त्तौ सोऽन्यदा सायमागच्छन् सदनं प्रति । कायोत्सर्गस्थमद्राक्षीत्, मुनिं मार्गे निरम्बरम् ॥ ४ ॥
स्फीतं शीते पतत्येष, हा ! निरावरणः कथम् ? । मुनिर्भावीति चिन्ताऽऽर्त्तः, कथञ्चिदनयत् निशाम् ? ॥५॥

महिषीर्महिषीपालः, पुरस्कृत्याऽऽत्मनः अगे । सवे[चे]लमचलत् साधुमपश्यच्च तथास्थितम् ॥ ६ ॥
नत्वाऽऽसांनक्रिवान् स्तोकं, सुभगो मुनिसन्निधौ । उदियाय रविस्तावद्, द्वेधाऽप्यस्य तमोऽपहः ॥ ७ ॥
मुनीन्द्रो द्राग् नमो अर(रि)हंताणमित्युदीर्य सः । व्योमोत्पपात पक्षीव, शुश्राव सुभगोऽप्यदः ॥ ८ ॥
इयं खगामिनी विद्या, जानन्निति स सन्मतिः । जजाप तत्पदं तिष्ठन्, स्वपन् जाग्रद् गृहे बहिः ॥ ९ ॥
श्रेष्ठिश्रेष्ठोऽन्यदाऽपृच्छत्, क्वाप्तं पदमिदं त्वया ? । सोऽवक् खगामिनी विद्या, मयाऽऽसर्पि(र्षे)मुखात् सुखात् ॥१०॥
न व्योमगामिनी विद्या, केवलं भद्र ! किं त्वियम् । स्वर्गापवर्गयोर्योगदात्री पात्री यथाऽन्धसाम् ॥११॥
तेनोच्छिष्टेन नो जप्याऽलुप्त्या यान्त्यधिदेवताः । इत्युक्त्वाऽपाठयत् श्रेष्ठी, सर्वां तस्मै नमस्कृतिम् ॥ १२ ॥
धरां धराधरे धाराधोरणीभिर्निरन्तरम् । पूरयत्यथ महिषीर्लात्वाऽगात् सुभगो बहिः ॥ १३ ॥
तदाऽविशन् महिष्योऽन्यक्षेत्रे तीर्त्वा नदीं द्रुतम् । सोऽचिन्तयदुपालम्भो, माऽऽयासीत् स्वामिनो मम ॥ १४ ॥
ततः खगामिनीविद्यां, बुद्ध्वा ध्यात्वा नमस्कृतिम् । झम्पामदादसौ नद्यां, स्थाणुविद्धो मृतो हृदि ॥ १५ ॥
नमस्कृतिस्मृतिवशात्, मराल इव मानसे । सुस्वप्नसूचितः कुक्षौ, सोऽर्हद्दास्या अवातरत् ॥ १६ ॥
पुण्यानपुरयत् श्रेष्ठी, तृतीये मासि दोहदान् । कालेऽम्बा सुषुवे सूनुं, नाम्नाऽऽकृत्या सुदर्शनम् ॥ १७ ॥
वर्द्धमानः कलाशालीन्दुलेखेव सुदर्शनः । केषां चेतश्चकोराणां, न ऊहाराक्षिगोचरः ? ॥१८॥
द्विधा मनोरमां कन्यां, पितृभ्यां परिणायितः । एतयेवेन्द्र इन्द्राण्या, स भोगान् बुभुजे समम् ॥ १९ ॥
कपिलेन समं प्रीतिरभूत् तस्य पुरोधसा । सद्गोष्ठीनिष्ठयोरिष्टः, कालो याति तयोर्द्वयोः ॥ २० ॥

एकान्तेऽपृच्छदन्येद्युः, कपिलं कपिला प्रिया । प्रियाद्यकल्ये क्व यासि, त्यक्त्वा कार्याणि वेश्मनः ? ॥ २१ ॥
सोऽवक् सुहृद्गोष्ठीनिष्ठो, नान्यत् कार्यं स्मराम्ययि ! । साऽपृच्छत् को वयस्यस्ते ? स्मित्वा स्माह पुरोहितः ॥२२॥
पुण्य-नैपुण्य-लावण्य-सौजन्यादिगुणोत्क(-णाक)रः । किमद्यापि न मन्मित्रम्, श्रुतः श्रुत्या सुदर्शनः ॥ २३ ॥
विशदैस्तद्गुणैश्चित्रं, कपिला रक्ततामगात् । तदाप्त्युपायं ध्यायन्ती, मन्मथोन्मथिता स्थिता ॥ २४ ॥
गूढकार्येऽन्यदा राज्ञा, प्रेषितः कपिलः क्वचित् । कपिलाऽवसरं ज्ञात्वा, श्रेष्ठ्योकोऽगादुवाच च ॥ २५ ॥
निर्दिग्धं बाधया स्निग्धं, श्रेष्ठिन् ! स्वद्दृष्टिवृष्टितः । शीघ्रमाश्वासयाभ्येत्य, दग्धं द्रुममिवाम्बुदः ॥ २६ ॥
सद्यस्तदास्पदं गत्वा, श्रेष्ठ्याचष्ट स मे सुहृत् । क्वास्तीति ? कपिलाऽवोचत्, निर्वातेऽस्ति(च)सुहृत् तव ॥ २७ ॥
इत्युक्त्वाऽसौ प्रमादीव, निगोदे सदनान्तरे । नीतस्तयाऽथ झटिति, जटितः (दत्तः) कपाटसम्पुटः ॥ २८ ॥
नीवीबन्धश्लथा मुक्तकञ्चुका सा सुदर्शनम् । कामुका कामयामास, निकामं कामविह्वला ॥ २९ ॥
प्रत्युत्पन्नमतिः श्रेष्ठी, स्माह यूनां मनोमतम् । इदमेव परं मुग्धे !, क्लैब्ये(क्लीबो) नाऽस्मि विडम्बितः [-म्बनम्] ॥
विलक्षा गच्छ गच्छेति वादिनी कपिला द्रुतम् । द्वारमुद्घाटयामास, निराशास्याऽऽशया सह ॥ ३१ ॥
भिन्नग्रन्थिरिव जीवो, निर्गत्याऽऽस्पदतस्ततः । न गन्तव्यं मयाऽन्येषां, जग्राहाभिग्रहं गृहे ॥ ३२ ॥
ययौ क्रीडितुमन्येद्युरुद्याने दधिवाहनः । सुदर्शन-पुरोधोभ्यां, समं सामन्त-मन्त्रिभिः ॥ ३३ ॥
यानारूढाऽभया राज्ञी, दधिवाहनमन्वगात् । इन्द्राणीव सुरेन्द्रं द्राक्, सख्या कपिलया समम् ॥ ३४ ॥
षड्रसैरिव षट्पुत्रैर्युता याता मनोरमा । तां वीक्ष्य कपिलाऽपृच्छद्, राज्ञीं केयं पुराऽङ्गना ? ॥ ३५ ॥

राज्याह सखि ! किं वेत्सि, नेमां सुदर्शनप्रियाम् ? । साऽऽहेक्षोः फलवत् तर्हि, कुतोऽस्याः सुतसम्भवः ॥३६ ॥
राज्यवोचदसम्बद्धं, जल्पाके ! जल्पसीह किम् ? । तुल्यं हि राज्ञां(ज)रङ्काणां, लक्षणं पुत्रलक्षणम् ॥ ३७ ॥
साऽऽहायं देवि ! पण्ढोऽस्ति, स्मित्वा स्माह नृपप्रिया । धूर्त्ते ! धृष्टाऽसि किं क्वाप्याहर्तेन श्रेष्ठिनाऽमुना ? ॥३८॥
उवाच वञ्चनां प्राच्यां, स्वस्य राज्यै द्विजाङ्गना । राज्यूचेऽयं परस्त्रीषु पण्ढो न त्वात्मनः स्त्रियाम् ॥ ३९ ॥
हुं मुग्धे ! वञ्चिताऽसीति, हसन्त्याह नृपप्रिया । ततो मन्दाक्षवैलक्ष्यादाख्यदेवं द्विजाङ्गना ॥ ४० ॥
वञ्चिता सत्यमस्म्यस्मि, मुधा तेऽपि विदग्धता । साम्प्रतं ज्ञास्यते लग्नं, चेत् समं रमसेऽमुना ॥ ४१ ॥
सगर्वमभयाऽवादीत्, मुधा[ग्धे]! वार्त्ता ह्यमुष्य का ? । भूपोऽपि भ्रूलतोत्क्षेपमात्रेण भ्राम्यते मया ॥४२॥
स्त्रीणां कटाक्षविक्षेपात्, पुष्यन्त्येकेन्द्रिया अपि । पञ्चाक्षस्य मनुष्यस्याऽमुष्य क्षोभे कियान् श्रमः ॥ ४३ ॥
हले ! सहेलं यद्येनं, न रमेऽग्नौ विशामि तत् । इत्युक्त्वा ते वनं गत्वा, सायं स्वगृहमीयतुः ॥ ४४ ॥
प्रतिज्ञां पण्डिताख्याया, धात्र्यास्तामभयाऽवदत् । धात्र्याह पुत्रि ! तत्सङ्गसङ्गरः सुकरो न ते ॥ ४५ ॥
सामान्योऽप्यास्तिकः स्त्रीभिरक्षोभ्योऽर्हन्मतानुगः । धर्मध्यानैकतानस्य, सुदर्शनस्य का कथा ? ॥ ४६ ॥
शेषाहेर्यः शिरोरत्नमुद्धरेत् सिंहकेसरान् । ध्रुवचक्रं चालयेत[-क्रचालने] शक्तः, स तु तच्छीलचालने ॥ ४७ ॥
कथमायात्यसावत्रायातोऽपि रमते कथम् । त्वया परस्त्रिया सार्द्धं ?, साधु तन्न कृतं सुते ! ॥ ४८ ॥
साऽऽहेदं तु कृतं किन्तु दर्शयोपायमम्ब ! मे । धात्र्याह निश्चयस्ते चेदुपायोऽस्त्येक एव हि ॥ ४९ ॥
शून्यागारे स पर्वाहे, कायोत्सर्गेण तिष्ठति । मूर्त्तो योग इवानेयोऽत्रापरोऽवसरोऽपि न ॥ ५० ॥

इतश्च कौमुदीपर्वदिने राजाज्ञया प्रजाः । क्रीडार्थं जग्मुरुद्याने, पटहोद्घोषबोधिताः ॥ ५१ ॥
श्रीमान् सुदर्शनः श्रेष्ठी, च(चा)तुर्मास(सि)कपर्वणि । तस्थौ विज्ञप्य राजानं, तदा धर्मचिकीर्गृहे ॥ ५२ ॥
अभयां पण्डिताऽवोचदद्य स्थेयं त्वया गृहे । प्रतिज्ञापूरणकृते, कृत्वा किञ्चित् मृषोत्तरम् ॥ ५३ ॥
भृशं शिरोऽर्तिरस्तीति, दम्भेनाऽऽपृच्छय सा नृपम् । तस्थावन्तः–पुरान्तःस्था, कपटोत्कटपाटवा ॥ ५४ ॥
स्नात्रार्चादिविधीनर्हि, विधाय विधिनाऽर्हताम् । प्रगृह्य पौषधं श्रेष्ठी, तस्थौ प्रतिमया निशि ॥ ५५ ॥
पण्डिता यानमारोप्याऽभयायै तं तथास्थितम् । यक्षाकृतिरिति द्वाःस्थैरनिरुद्धाऽऽर्पयत् मुदा ॥ ५६ ॥
भ्रूलतोत्क्षेपकोदण्डा कटाक्षोन्मुक्तसायका । श्रेष्ठिनं सा व्यधाद् वेध्यं, शृङ्गारैकतरङ्गिणी ॥ ५७ ॥
हुं तपो दुस्तपं तप्तं, मुग्धाद्य फलितं तव । भजस्व मुञ्च पाखण्डं, मां रूपेणाप्सरःसमाम् ॥ ५८ ॥
स्तनोपपीडमाश्लेषो, हावभावादिकाः क्रियाः । प्रहारा इव वज्राद्रौ, सर्वास्तस्मिन् मुधाऽभवन् ॥ ५९ ॥
स विशेषाद् दधौ ध्यानं, जग्राहेदं त्वभिग्रहम् । पारयामि तदोत्सर्गं, मुच्ये चेत् सङ्कटादतः ॥ ६० ॥
नर्मभिः कर्मभिर्ध्यानवर्मभृद् बहुधाऽप्यसौ । तयोपसर्गितो वात्यया मेरुरिव नाक्षुभत् ॥ ६१ ॥
विलक्षीभूय दक्षास्या, श्रेष्ठिनं सा ततोऽब्रवीत् । स्त्रियो मुग्ध ! सुधास्तुष्टा, रुष्टा हि विषमं विषम् ॥ ६२ ॥
क्षुभ्येत् त यावदातङ्कोक्तिभिर्नो भक्तिभ(यु)क्तिभिः । तावत् नखैर्विदार्य स्वं, पूच्चकाराऽभया प्रगे ॥ ६३ ॥
रे रे प्राहरिकास्तूर्णमेत्य पश्यन्तु मद्वपुः । शीललोपमनिच्छन्त्याः, पाप्मना कीदृशं कृतम् ? ॥ ६४ ॥
दधाविरे प्राहरिका, धृतनानाविधायुधाः । ददृशुः श्रेष्ठिनं, शान्तं, कायोत्सर्गस्थितं पुरः ॥ ६५ ॥

नैव सम्भवति ह्यस्मिन्निन्दावग्नेरिवोद्गमः । इति सञ्चिन्त्य तैर्भूपो, विज्ञप्तः स्वयमागमत् ॥ ६६ ॥
राज्ञे न्यजिज्ञपद् राज्ञी, सबाष्पं गद्गदस्वरम् । देवाहं भवदादेशादावासे यावदागता ॥ ६७ ॥
तावदकाण्डकूष्माण्डोद्भेदभेदमिवाग्रतः । अदर्शमेनं गोवक्त्रं, व्याघ्रं कपटधार्मिकम् ॥ ६८ ॥
कुर्वन् मच्छीललोपार्थं, लब्धि निर्लोठितः स तु । पापो विदारयामास, मां रुपा नखरैः खरैः ॥ ६९ ॥
असम्भाव्यमिदं ह्यस्मिन्, दुग्धे पूतरका इव । विचिन्त्येति नृपोऽपृच्छत्, श्रेष्ठिन् ! ब्रूहि यथास्थितम् ॥ ७० ॥
प्रतिमास्थो न चोवाच, सत्यं श्रेष्ठ्यभयाभयात । राज्ञा ज्ञातं ततो जार–चो[चौ]राणां लक्षणं ह्यदः ॥ ७१ ॥
क्रुधाऽऽदिदेश देवोऽथाऽऽरक्षकांस्तद्वधक्रमे । ततस्ते श्रेष्ठिनो भङ्गं, कारयाञ्चक्रिरे शिरः ॥ ७२ ॥
मषीलिप्तमुखं बद्धकरवीरस्रजं गले । सूर्पछत्रं खरारूढं, पुरोवादितडिण्डिमम् ॥ ७३ ॥
उद्गिरन्तो मुखे जारदोषं तस्य न चेशितुः । निन्युरारक्षकास्तस्य, सद्माभ्यर्णं सुदर्शनम् ॥ ७४ ॥
सतीमतल्लिका वीक्ष्यासम्बद्धं तत् मनोरमा । दध्यौ कदाचिदम्भोधिः, सीमां मुञ्चेर् न मत्पतिः ॥ ७५ ॥
जिनेन्द्रं मनसि कृत्वोद्दिश्य शासनदेवताम् । तस्थौ प्रतिमया गर्भागारमेत्य मनोरमा ॥ ७६ ॥
उत्पातशान्तिर्मे पत्युर्भविष्यति यदा तदा । उत्सर्गं पारयिष्यामि, नान्यथेत्यस्त्वभिग्रहः ॥ ७७ ॥
अत्रान्तरेऽभवद् व्योम्नि, दिव्या वाणी मनोरमे ! । सान्निध्यं ते विधास्यामः, पत्युस्त्वं माऽधृतिं कृथाः ॥७८॥
इतश्चारक्षका निन्युर्बहिर्भूमौ सुदर्शनम् । शूलिकायां न्यधुश्चोग्रा, हाहारवपरे जने ॥ ७९ ॥
जज्ञे दिव्यानुभावेन, शूलिका सिंहविष्टरम् । खड्गप्रहारा हाराश्च, बभूवुः श्रेष्ठिनो गले ॥ ८० ॥

केयूराण्यभवन् बाह्वोः, पादयोनूपुरान् पुनः । ग्रीवायां ग्रीवाभरणं, शस्त्रघाताश्च तत्तनौ ॥ ८१ ॥
ततस्तदद्भुतं राज्ञे, विज्ञप्तमधिकारिभिः । सतन्त्रो विस्मयस्मेरस्तत्रागात् पार्थिवः स्वयम् ॥ ८२ ॥
दिव्यसिंहासनासीनं, नानालङ्कृत्यलङ्कृतम् । कल्पवृक्षमिवैक्षिष्ट, साक्षाद् भूपः सुदर्शनम् ॥ ८३ ॥
ततः सर्वाङ्गमालिङ्ग्य, सानुतापं वहन् मनः । ऊचे पुण्यात्मनैकेन, मत्पुरं शोभतेऽधिकम् ॥ ८४ ॥
हा ! धिग् विचारशून्यस्याज्ञस्याऽज्ञानं ममेदृशम् । स्त्रीणां वचसि विश्वासो यः कुर्यात् स करोतु हा ! ॥८५॥
दिष्ट्या स्वदृष्ट्या दृष्टोऽसि, श्रेष्ठिन् ! जीवन् स्वकर्मभिः । इत्याद्युक्त्वाऽवदद् भूपः, क्षमस्वाऽऽगो महाशय ! ॥८६॥
पट्टेभस्कन्धमारोप्य, ततो राजा सुदर्शनम् । उद्यज्जयजयारावमानयद् राजमन्दिरम् ॥ ८७ ॥
जनस्तां वर्द्धयामास, हर्षोत्कर्षात् मनोरमाम् । धार्मिके ! पार्योत्सर्गं, क्षेमेणाऽऽगात् पतिस्तव ॥ ८८ ॥
निर्बन्धेन नृपपृष्टः, श्रेष्ठी तथ्यमचीकथत् । सोऽवगचीकरः सर्वं, तद्यैवमब्रुवंस्तदा ॥ ८९ ॥
अभयानिग्रहे क्रुद्धं, श्रेष्ठी विज्ञप्य पार्थिवम् । अभयं दापयामास, पीडितोऽपीक्षुरु (स)द्रसः ॥ ९० ॥
सत्कृत्य दिव्यवस्त्राद्यैर्बहुमानपुरस्सरम् । प्राहिणोद् गजमारोप्य, पार्थिवः श्रेष्ठिनं गृहे ॥ ९१ ॥
जिनधर्मानुभावं तद्, वीक्ष्य साक्षात् क्षमापतिः । पिपासुरिव पीयूषेऽर्हद्धर्मे प्रेमवानभूत् ॥ ९२ ॥
स्वभयादभया राज्ञी, स्वमुद्बन्ध्य व्यपद्यत । परस्मिंश्चिन्तितं पापं, प्रायः पतति चाऽऽत्मनि ॥ ९३ ॥
कारागारादिवासारात्, संसारात् श्रीसुदर्शनः । विरक्तात्मा परिव्रज्यामुपादत्तैकचित्ततः ॥ ९४ ॥
पण्डिता पाटलीपुत्रे, देवदत्तान्तिके गता । तत्पुरो वर्णयत्यस्य, शीलदार्ढ्यं मुनेर्भृशम् ॥ ९५ ॥

सामर्षं गणिकाऽप्याख्यत्, किं वर्णयसि तं भृशम्? । अङ्गुल्या नर्त्तयाम्यग्रे, यदि पश्यामि तं क्वचित् ॥ ९६ ॥
भ्रमन् गोचरचर्यायां, दैवात् तत्रागतो मुनिः । कपटश्रावकीभूय, नीतः पण्डितया गृहे ॥ ९७ ॥
बहुधा द्वारमुन्मुद्र्याभ्यर्थितो देवदत्तया । मुनिर्न शीलमर्यादां, वात्ययाऽब्धिरिवामुचत् ॥ ९८ ॥
ततो जातातिनिर्वेदो, मुनिर्निर्गत्य तद्गृहात् । श्मशाने प्रतिमया तस्थौ, कर्मनिर्मूलनैकधीः ॥ ९९ ॥
व्यन्तरीभूतया तत्राऽभययाऽत्युपसर्गितः । सुदर्शनमुनिर्ध्यानातिरेकात् प्राप केवलम् ॥ १०० ॥
सुरैर्निर्मितमध्यास्य, सुवर्णकमलं मुनिः । मोहनिद्रापहां चक्रे, सुधादेश्यां स देशनाम् ॥ १०१ ॥
केचित् यतित्वं केचिच्च, श्रावकत्वं, प्रपेदिरे । प्रबुद्धा चाभया देवदत्ता धात्र्यपि पण्डिता ॥ १०२ ॥

भव्यारविन्दवदनानि विकाश्य तेजोराशिः सुदर्शनमुनिः स्वपदप्रचारैः ।
कर्मास्तभूधरमपास्य निरस्तशोकलोकाग्रमस्तकमणिश्रियमाससाद ॥ १०३ ॥

इति श्री मुद्रित--ऋपिमण्डलप्रकरणवृत्तित उद्धृता श्री सुदर्शनश्रेष्ठीकथा संपूर्णा.

जैनकथार्णवः समाप्तः